૩. આ ગ્રંથમાં રહી જવા પામેલી અશુદ્ધિઓ માટે બે બાબત જવાબદાર છે: એક તો પ્રેસ અને બીજો હું. ટાઈપો તૂટી ગયા અને ઉપસ્યા નથી તે માટે પ્રેસ જવાબદાર છે અને પંક્તિઓ કે અક્ષરો રહી જવા પામ્યાં તે અંગે મારી થોડીક બેદરકારી જ કારણભૂત છે, એ મારે સ્વીકારવું જોઈએ. અભ્યાસીઓને વિનમ્ર નિવેદન કે આ ગ્રંથના છેવાડે અપાયેલ શુદ્ધિપત્રક પ્રમાણે સંશોધન કર્યા વિના આ ગ્રંથનું વાંચન ન કરે.

૪. મારા તથા મારા પૂજ્ય ગુરુમહારાજ આચાર્ય મહારાજ શ્રી વિજયસૂર્યોદયસૂરીશ્વરજી મહારાજના મનમાં એક લાગણી પ્રવર્તતી હતી કે આપણા પરમ ઉપકારી પૂજ્યપુરુષ આચાર્ય શ્રી વિજયનન્દન સૂરીશ્વરજી મહારાજના ગ્રંથો સુઘડ ને વ્યવસ્થિત સ્વરૂપે પ્રકાશિત કરાવવા જોઈએ. એ લાગણીના ફળસ્વરૂપે જ આ પ્રથમ ગ્રંથ

તૈયાર થઇ શક્યો છે અને તે પણ તે પૂજ્યપુરુષની કૃપાનું જ પરિણામ છે એમ લાગે છે.

૫. આ ગ્રંથનું મુદ્રણકાર્ય કરવાનો નિર્ણય સં. ૨૦૩૭ ના પૂનાના ચાતુર્માસ દરમિયાન કર્યો અને ત્યારે પૂનાના શ્રી ગોડી પાર્શ્વનાથ જૈન ટેમ્પલ ટ્રસ્ટ અર્થાત્ શ્રી સંઘના આગેવાનોને આ વાત જણાવતાં તેઓએ આ ગ્રંથના પ્રકાશન અંગેની તમામ દ્રવ્યસહાયનો લાભ પોતાને મળે તેવી માગણી કરી અને તે પ્રમાણે તેમની દ્રવ્ય સહાયથી જ આ ગ્રંથ તૈયાર થયો છે. ગ્રંથનાં મુદ્રણ અંગેની સઘળી વ્યવસ્થા અને જવાબદારી, પ. પૂ. શાસનસમ્રાટ શ્રી વિજયનેમિસૂરીશ્વરજી મહારાજના પરમ શ્રાવક શા. વાડીલાલ બાપુલાલ કાપડિયાના પૌત્ર શ્રી સુરેન્દ્ર મનુભાઈ કાપડિયા (જૈન એડવોકેટ પ્રિ. પ્રેસ, અમદાવાદ) એ ખૂબ ભક્તિ અને ચીવટપૂર્વક સંભાળી છે.

૬. શુદ્ધિપત્રક તથા પરિશિષ્ટો વગેરે તૈયાર કરવામાં મુનિરાજ શ્રી નંદીઘોષવિજયજીએ સારી જહેમત ઉઠાવી છે, તે નોંધનીય છે.

અંતમાં, અભ્યાસીઓને આ ગ્રંથ ઉપયોગી બનશે તો પ્રયત્ન સાર્થક ગણાશે.

— શીલચંદ્રવિજય

# विषयानुक्रमः॥


| | |
|---|---|
| પ્રકાશકીય નિવેદન | ૫ |
| જીવન-સાધનાના સાધક સાધુપુરુષ<br>(પૂજ્ય આચાર્ય શ્રી વિજયનંદનસૂરીશ્વરજી મહારાજનો વ્યક્તિત્વ-પરિચય) | ૬ |
| જાગરણનો સાદ દેતું જીવન<br>(પૂજ્ય આચાર્ય શ્રી વિજયકસ્તૂરસૂરીશ્વરજી મહારાજનો વ્યક્તિત્વ-પરિચય) | ૧૧ |
| ભૂમિકા | ૧૮ |
| નિવેદન | ૩૬ |
| श्रीजैनतर्कसङ्ग्रहे— | |
| द्रव्यखण्डे प्रत्यक्षखण्डः । | १ |
| द्रव्यखण्डे परोक्षखण्डः । | ३६ |
| पर्यायखण्डः । | ५२ |
| धर्मनिरूपणान्तः खण्डः । | ५६ |
| जैन मुक्तावल्यां— | |
| प्रत्यक्षनिरूपणाख्यः प्रथमः परिच्छेदः । | ६२ |
| परोक्षनिरूपणपरिच्छेदः । | १११ |
| जीवभेदादिपर्यायान्तनिरूपणाख्यः परिच्छेदः । | १३५ |
| परिशिष्टानि— | |
| १ श्रीजैनतर्कसङ्ग्रह-सूत्रपाठः । | १५६ |
| २ श्रीजैनमुक्तावलीमूलकारिकाः । | १६८ |
| ३ पण्डित श्रीशशिनाथ झा शर्मणा प्रणीतो निक्षेपविचारः । | १८१ |
| ४ जैनमुक्तावलीकारिकाणामकारादिक्रमः । | १९३ |

| | | |
|---|---|---|
| ५ | जैनतर्कसङ्ग्रह-टिप्पणीगत-साक्षिपाठांशसूचिः । | २०० |
| | जैनमुक्तावलीटीकागत-साक्षिपाठांशसूचिः । | २०१ |
| ६ | सटिप्पण-जैनतर्कसङ्ग्रहगत-ग्रन्थ-ग्रन्थकृदादिविशेषनामसूचिः । | २०३ |
| | सवृत्तिक-जैनमुक्तावलीगत-ग्रन्थ-ग्रन्थकृदादिविशेषनामसूचिः । | २०४ |
| ७ | सटिप्पण-जैनतर्कसङ्ग्रहगत-पारिभाषिकशब्दसूचिः । | २०५ |
| | सवृत्तिक-जैनमुक्तावलीगत-पारिभाषिकशब्दसूचिः । | २१३ |
| | शुद्धिपत्रकम् । | २२५ |

ॐ ऐँ नमः ॥

श्री शङ्खेश्वरपार्श्वनाथाय नमः ॥

नमो नमः श्रीगुरुनेमिसूरये ॥

आचार्य श्रीविजयनन्दनसूरि–विरचितः

# श्री जैनतर्कसङ्ग्रहः ॥

मुनि शीलचन्द्रविजयकृतटिप्पण्यलङ्कृतः ॥

## ( तत्र द्रव्यखण्डे प्रत्यक्षखण्डः )

टिप्पणी :–प्रणम्य सद्गुरुं रम्यं, नेम्यभ्युदयनन्दनम् ।
करोमि टिप्पणीं काञ्चित्, श्रीजैनतर्कसङ्ग्रहे ॥

अथातस्तत्त्वं जिज्ञासूनां जिज्ञासां परिपूरयितुकामो जैनसिद्धान्तमुक्तावल्यादि ग्रन्थरचनाऽवाप्तयशःकीर्त्यभिरामो ग्रन्थस्यास्य प्रणेता आचार्यश्रीविजयनन्दनसूरी रिरचयिषितजैनतर्कसङ्ग्रहग्रन्थव्यूहस्य निष्प्रत्यूहं समाप्तिकामः, **'थयथुइमंगलेणं जीवे नाणदंसणचरित्तबोहिलाभं जणयइ'** इत्यार्षवचनं मनसि निधाय च, देवगुरुनमस्कारात्मकं ग्रन्थादौ मङ्गलमातनोति–

**मूलम्–श्रीनाभेयं नमस्कृत्य, नेमिसूरिं जगद्गुरुम् ।**
**तन्यते बालबोधाय जैनोऽयं तर्कसङ्ग्रहः ॥१॥**

टिप्पणी–**श्रीनाभेयमिति ।** नाभिराजनन्दनं–युगादिजिनं–प्रथमं जैन-तीर्थङ्करमिति यावत् । नेमिसूरिश्च ग्रन्थकर्तुः प्रगुरुः । स च निजनैष्ठिकब्रह्मचर्य –सत्त्वशुद्धि–चारित्रपवित्रता–अदूष्यवैदुष्यादिजनितपरमप्रभावानुभावतो जगतां गुरुरिव, तमपि नमस्कृत्येत्यर्थः । ननु किमर्थमयं प्रणामपरिश्रमः प्रारभ्यत इति चेदाह–**तन्यत इति । तर्कसंग्रह इति ।** तर्क्यन्ते–प्रमितिविषयीक्रियन्त इति प्रसिद्धव्युत्पत्तिबलात् तर्काः–पदार्थाः । तेऽपि जैनाः–प्ररूपितत्वेन जैनतीर्थ-ङ्करस्य सम्बन्धिनः, न तु नैयायिकादिदर्शनप्रसिद्धास्तेषां तु निराकरिष्यमाण-

त्वात् । जैनानां तर्काणां सङ्ग्रहो जैनतर्कसङ्ग्रहः—तन्नामाऽयं ग्रन्थः तन्यते, मयेति शेषः । ननु किमर्थमेतत् तननं ? यतो जैनतर्कभाषाद्या बहवो ग्रन्था एतद्विषयकाः सन्तीति चेदाह—**बालबोधायेति** । सन्त्यपि ते ग्रन्थाः विदुषामेव प्रौढमतीनामेव चोपकारकाः, न तु बालमतीनामपि । ननु को नाम बालः, किं पञ्चवर्षीयादिः ? ननु स कथमेनं पठिष्यति ? । उच्यतेऽत्र, बालो नाम न पञ्चवर्षीयादिः, अपि तु पठितेतरशास्त्रसार्थोऽप्यपठिततर्कशास्त्रः । तादृशस्तु यः कोऽपि सम्भवेत्, तस्योपकारायाऽलमयं सङ्ग्रहो भविष्यतीति बुद्ध्या मयाऽत्र तर्काः संगृह्यन्ते, न तु नवा रच्यन्त इत्याशयः ॥

इह हि जगति भव्यत्वपरिणामिनो जीवा यं कञ्चित् पुरुषार्थमर्थयमाना अप्यन्ततोगत्वा मोक्षमेवाभिलषन्ति । स च न केवलज्ञानं विना शक्यलाभः । तदपि च कर्मोच्छेदे सत्येव भवितुमर्हति । 'कर्मोच्छेदश्चाऽऽस्रवनिरोधरूपसंवराधीनः, तस्मिन् सत्येव कर्मणां नवायाः सन्ततेरवरोधात्' । संवरश्च विरतस्यैव । विरतिकारणं च तत्त्वज्ञानं, '**ज्ञानस्य फलं विरति**' **रिति वचनात्** । एवं च सति मुक्तेर्निदानं तत्त्वज्ञानमेवेति 'किं तत्त्वम् ?' इति जिज्ञासा जिज्ञासूनां स्वाभाविक्येवोद्भवतीति तां निवर्तयितुं प्राह—

**देवगुरुधर्मास्तत्त्वम् ॥१॥**

**देवेति** । दीव्यते—स्तूयते संसारतारकत्वेन रूपेण जगज्जन्तुभिर्यः स देवः । गुरुश्चाऽज्ञानान्धतमसनिमज्जनशीलानां रक्षको जीवानाम् । यदुक्तं—

**" 'गु' शब्दस्त्वन्धकारे स्याद्, 'रु' शब्दस्तन्निरोधकः ।**
**अन्धकारविरोधित्वाद् 'गुरु' रित्यभिधीयते ॥ " इति ।**

दुर्गतौ पततां प्राणिनां धारकश्च धर्मः । "दुर्गतिप्रपतत्प्राणि-धारणाद्धर्म उच्यते" इत्युक्तेः । देवगुर्वोर्लक्षणमनन्तरमेव कथ्यते, धर्मस्य तु परत इत्यवधेयम् । एते त्रयोऽपि समुदिता एव 'तत्त्वं,' न तु पृथक् पृथक्—अन्योन्यनिरपेक्षा इति ज्ञापनार्थं तत्त्वस्य त्रैविध्येऽपि 'तत्त्वं' इत्येकवचनविलासः ॥

ननु कोऽयं देवः, किंस्वरूपश्च, यो जगज्जन्तुभिः संसारतारकत्वेन स्तूयते ? इत्याशङ्कयाह–

**रागद्वेषाज्ञानविनिर्मुक्तोऽर्हन् देवः। स सकलभावसाक्षात्कारी तीर्थ-प्रणेता चतुस्त्रिंशदतिशयशाली ॥२॥**

**रागेति।** यस्य रागः, द्वेषः, अज्ञानं च सर्वथा नष्टाः, यश्च सुरासुरनरेन्द्रादिकृतां पूजां अर्हति स देव इत्यर्थः। **उक्तं च भगवद्भिर्हरिभद्रसूरिभिः–**

**यस्य संक्लेशजननो, रागो नास्त्येव सर्वथा।**
**न च द्वेषोऽपि सत्त्वेषु शमेन्धनदवानलः॥**
**न च मोहोऽपि सज्ज्ञान–च्छादनोऽशुद्धवृत्तकृत्।**
**त्रिलोकख्यातमहिमा, महादेवः स उच्यते॥**

स च देवः करस्थिताऽमलजलबिन्दुवद्विश्वमशेषं साक्षात्कर्तुं विनैवेन्द्रियमनःसहायं समर्थ इत्याह–**स सकलेति**। जैननये सर्वेऽपि तीर्थङ्कराः स्वस्वधर्मतीर्थापेक्षया तीर्थप्रणेतारः, अत एव स्तुतावपि 'आइगराणं तित्थयराणं' इत्युक्तं, तदेवाह–**तीर्थेति।** तीर्थं च द्वादशाङ्गीरूपं धर्मप्रवचनं चातुर्वर्ण्यः श्रमणसंघो वेति ध्येयम्। ईदृशे च देवेऽनेकेऽतिशयाः स्वयमेव प्रकटीभवन्ति, केचिद्बाह्याः पूजार्थं इन्द्रादिदेवैरपि निष्पाद्यन्ते। ते चाऽतिशया मुख्याः चतुस्त्रिंशदित्याह–**चतुस्त्रिंशदिति**। अत्र च 'रागद्वेषाज्ञानविनिर्मुक्त' इत्यनेन अपायापगमातिशय-सूचनम्। गतरागादिदोषस्य च वचनमवितथमेव भवतीति वचनातिशयोऽपि तेनैव संसूचितः। 'अर्हन्' इति पदेन पूजातिशयः, 'सकलभावे'त्यादिना च ज्ञानातिशयो वर्णितः। अत्र 'रागद्वेषाज्ञानविनिर्मुक्तत्वे सति अर्हत्त्वं देवस्य लक्षणं, शेषं तु तत्स्वरूपनिरूपणम्॥

क्रमप्राप्तं गुरुतत्त्वं निरूपयितुमाह–

**सम्यग्भावप्ररूपकः पञ्चमहाव्रतधारी गुरुः ॥३॥**

**सम्यगिति।** अभूवन्, भवन्ति, भविष्यन्ति चेति भावाः। समीचीनाः–

सर्वज्ञैः केवलज्ञानचक्षुषा दृष्टा देशिताश्च, अत एव यथावस्थिता भावाः सम्यग्भावास्तेषां प्ररूपको गुरुः। यद्वा जैनतर्कसङ्ग्रहस्य प्रस्तुतत्वाद् भावा अपि जैना एव, ते च जिनभगवत्प्ररूपितत्वेन समीचीना एव ज्ञेयाः, ततश्च भावानां सम्यग्–उत्सूत्रणविपरीतसूत्रणादिविसंवादादिदोषरहितं यथा स्यात् तथा प्ररूपको गुरुः। **पञ्चेति**। सोऽपि प्राणातिपातविरमण–मृषावादविरमण–अदत्तादानविरमण–मैथुनविरमण–परिग्रहविरमणरूपमहाव्रतपञ्चकधारी सः। अत्र पञ्चमहाव्रतधारित्वं गुरोर्लक्षणम्, सम्यग्भावप्ररूपकत्वं तु स्वरूपाख्यानमिति ध्येयम् ॥

ननु सम्यग्भावप्ररूपक इत्यत्र भावाः के? इत्यत्राह–

**द्रव्यगुणपर्याया भावाः ॥४॥**

द्रव्याणि गुणाः पर्यायाश्च भावाः पदार्था इति यावत्। समग्रं विश्वमेतद् भावत्रयात्मकमिति भावः। वस्तुतस्तु द्रव्यपर्यायावेव भावौ, गुणस्य पर्यायविशेषरूपत्वादिति ध्येयम्। गुणपर्याययोश्च द्रव्येण सह भेदाभेदः सम्बन्धः। न तु समवायादिरेकान्तः, तस्य द्रव्यपर्यायाणामेकान्तपार्थक्ये सत्येव सम्भवात्। जैनास्तु द्रव्यपर्याययोर्नैकान्तेन भेदमभेदं वा स्वीकुर्वन्ति, किन्तु कथञ्चिद्भेदं कथञ्चिदभेदं च मन्वतेऽतो न समवायादिसम्बन्धस्तेषां नये स्वीकारार्होऽपि तु अविष्वग्भावलक्षणो भेदाभेदसम्बन्ध एव। द्रव्यपर्याययोर्भेदाभेदस्त्वित्थम्–मृत्तिकाद्रव्यात् प्रकटितस्य घटपर्यायस्य मृत्तिकाद्रव्याद् भेदः। भिन्नत्वे सत्येव तस्य 'घटः' इति व्यवहारस्य संघटमानत्वात्। अन्यथा–भेदाभावे घटोऽपि 'मृत्तिका' शब्देनैव व्यपदिश्येत!। स च भेदः कथञ्चिदेव, न तु सर्वथा। सर्वथा भेदे सति 'मृण्मयो घट' इति 'मृद्घट' इति च व्यवहारो न स्यात्। न च स नास्त्यतो ज्ञायते यद् मृत्तिकानिर्मितस्य घटस्य मृत्तिकापर्यायत्वेन मृत्तिकया कथञ्चिदभेदोऽप्यस्ति। कथमन्यथा 'मृण्मयो घट' इतिवत् 'तन्तुमयो घट' इत्यादिना न व्यवह्रियते?। एवं, 'कृष्णो घट' इति व्यवहारो द्रव्यगुणयोरभेददर्शकः। 'राजा पुरुष' इतिवत्। 'घटस्य कृष्णत्वं' इति व्यवहारश्च तयोर्भेदसूचकः। 'राज्ञः पुरुष' इतिवत् ॥

क्रमशो द्रव्यगुणपर्यायान् लक्षयितुमिच्छुः प्रथमं द्रव्यलक्षणमाह–

**गुणपर्यायवद् द्रव्यम् ॥**

**गुणेति**। जैनानामयं सिद्धान्तः–"द्रव्यं पर्यायवियुतं नैव भवति कदाचिदपि क्वचिदपि च। पर्याया अपि द्रव्यं मुक्त्वा नैव स्थातुमर्हन्ति।" यदुक्तमपि–

**"द्रव्यं पर्यायवियुतं, पर्याया द्रव्यवर्जिताः।**
**क्व कदा केन किंरूपा दृष्टा मानेन केन वा ? ॥" इति।**

अतो ग्रन्थकारेण द्रव्यस्य 'गुणपर्यायवत्त्वं' लक्षणमभिहितम्। असाधारणधर्मस्य लक्षणत्वात्। असाधारणश्च स एव धर्मो यो कदाचिदपि धर्मिणं नैव विजहात्यतस्तल्लक्षणं सिद्धान्तानुसारित्वेन समीचीनमेव।

ननु नैयायिकानामयं सिद्धान्तो यद् 'उत्पन्नं द्रव्यं क्षणं निर्गुणं निष्क्रियं च तिष्ठती' त्यत उत्पन्नमात्रस्य द्रव्यस्य निर्गुणक्रियत्वेन गुणपर्यायवत्त्वाभावात्तत्राव्याप्तिरितिचेन्न; अस्मन्मते सकलपदार्थस्योत्पादव्ययध्रौव्ययुक्तस्यैव सत्त्वात्, न कोऽपि पदार्थः पूर्वं सर्वथैव नासीदधुना नवोत्पन्न इति युक्तियुक्तं; द्रव्यात्मना सर्वस्यापि पदार्थस्य सर्वदैवास्तित्वात्। तर्हि उत्पन्न इति कोऽर्थः ? पर्यायात् पर्यायान्तरमापन्नः। घटः पूर्वमन्यपर्यायत्वेनाऽऽसीदधुना तु घटपर्यायतामाप्तवान् इत्येव 'उत्पत्ति' पदार्थः। तथा च यथा तत्पुरोगामिपर्याये तथा घटपर्यायेऽपि मृत्तिकात्मकं द्रव्यमनुस्यूतमेव, तच्च ध्रुवम्। पर्यायत्वेन तस्योत्पादव्ययात्मकत्वेऽपि द्रव्यात्मना नित्यत्वात्। एवं चोभयपर्यायानुस्यूतद्रव्ये वर्णगन्धरसस्पर्शादिगुणाः पूरणगलनादिरूपाः क्रियाश्च सन्त्येव सदा। गुणवियुतं द्रव्यं नास्त्येवात्र विश्वे इत्युक्तपूर्वत्वात्। तथा च द्रव्यगता गुणक्रियाः पर्यायेष्वप्यनुगता एवेति न नाम किञ्चिदपि द्रव्यं सर्वथा नवोत्पन्नं न वा कदाचिदपि गुणादिहीनमतो नाव्याप्तिव्याप्तिरिति ॥

द्रव्यस्य अन्यान्यपि लक्षणानि महामहोपाध्यायैर्ग्रथितानीत्थम्–**'गुणाश्रयो द्रव्यं वा'**। गुण–पर्याययोरैक्यं गुणप्राधान्यं वाऽऽश्रित्येदम्। यद्वा द्रवति–

विविधान् स्वपर्यायान् स्वीकरोति त्यजति चेति द्रव्यम् । द्रूयते वा–स्वपर्यायैरेवा-द्रियते हीयते वा द्रव्यम् । 'द्रु' शब्दः सत्तार्थकः, द्रोः–सत्ताया एवावयवो विकारो वा द्रव्यम् । यतोऽवान्तरसत्तारूपाणि द्रव्याणि महासत्ताया विकारोऽवयवो वा भवन्त्येव । संद्रावः–गुणानां रसादीनां समूहो घटाद्यात्मको द्रव्यम् । तथा भाविनः पर्यायस्य (भावस्य), योग्यं यत्तद् द्रव्यम् । राजपर्यायार्हकुमारवत् । एवमेव भूतस्य पर्यायस्याधारोऽपि द्रव्यं, अनुभूतघृतपर्याय–रिक्तघटवत् । उक्तं चान्यत्र—

"भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके ।
तद्द्रव्यं तत्त्वज्ञैः, सचेतनाचेतनं कथितम् ॥" इति ।

अत्रेदं ध्येयं–भूतस्य भाविनो वा पर्यायस्य यद् योग्यं तदेव द्रव्यम् । अन्यथा सर्वेषामपि पर्यायाणां भूतकालेऽनुभूतत्वादनुभविष्यमाणत्वाच्च भविष्यत्काले सर्वस्यापि पुद्गलादेः सर्वदा सर्वद्रव्यत्वप्रसङ्गादिति । द्रव्यं च जीवास्तिकाय–अजीवास्तिकायभेदाद् द्विप्रकारं, जीवधर्माऽधर्मा–ऽऽकाशास्तिकाय–काल–पुद्गलभेदाद्वा षट्प्रकारं वक्ष्यते ॥

गुणलक्षणमाह–

**द्रव्याश्रिता निर्गुणा गुणाः ॥**

द्रव्याश्रितत्वे सति निर्गुणत्वं गुणस्य लक्षणम् । निर्गुणत्वमात्रोक्तौ पर्यायेष्वतिव्याप्तिरतो द्रव्याश्रितत्वम् । द्रव्याश्रितत्वस्य द्रव्येऽपि सत्त्वेन तद्वारणाय निर्गुणत्वम् ॥ ते च गुणा द्विविधाः, सामान्यगुणा विशेषगुणाश्च । तत्र सामान्यगुणा अस्तित्व, वस्तुत्व, सामान्य–विशेषात्मकद्रव्यत्व, प्रमेयत्व, अगुरुलघुत्व, प्रदेशत्व, चेतनत्व, अचेतनत्व, मूर्त्तत्व, अमूर्त्तत्वरूपा दश । सामान्यविशेषात्मकत्वं द्रव्यत्वविशिष्टद्रव्यस्य स्वरूपमिति ध्येयम् । विशेषगुणाश्च ज्ञान, दर्शन, सुख, वीर्य, स्पर्श, रस, गन्ध, वर्ण, गतिहेतुत्व, स्थितिहेतुत्वा, ऽवगाहनहेतुत्व, वर्तनाहेतुत्व, चेतनत्वा, ऽचेतनत्व, मूर्तत्वा, ऽमूर्त्तत्वरूपाः

षोडश । तत्र चेतनद्रव्ये (जीवद्रव्ये) अस्तित्व, वस्तुत्व, द्रव्यत्व, प्रमेयत्व, अगुरुलघुत्व, प्रदेशत्व, चेतनत्वा,ऽमूर्त्तत्वरूपा अष्टौ सामान्यगुणाः; ज्ञान, दर्शन, सुख, वीर्य, चेतनत्व, अमूर्तरूपा विशेषगुणाः षट् च । इदमत्रावधेयं, यद्यपि प्रदेशत्वं असङ्ख्यप्रदेशानुगतत्वेन जातिः, तथापि जैननये पदार्थानां सामान्यविशेषात्मकत्वेन जाति–धर्म–गुण इत्यादीनां पर्यायशब्दत्वमेवेत्यवधार्यम् । तथा च जीवद्रव्यस्याऽसङ्ख्येयप्रदेशमयत्वेन प्रदेशत्वमपि तन्निष्ठं, तच्च जातिर्वा गुणो वा धर्मोवेत्यनर्थान्तरम् । अतो नात्र प्रदेशत्वस्य गुणत्वाभावो जीवद्रव्ये वा तदभावः शङ्क्यः । एवमन्यत्रापि स्वयमेव विचार्यमिति । अचेतनद्रव्ये च जीवेतरस्मिन् सामान्यगुणाः चेतनत्वाऽमूर्त्तत्वरहिता अष्टौ पुद्‌गलस्य, चेतनत्व–मूर्त्तत्वरहिता अष्टौ च धर्मास्तिकाय–अधर्मास्तिकाय–आकाशास्तिकाय–कालेषु । विशेषगुणा अपि पुद्‌गलद्रव्ये स्पर्श, रस, गन्ध, वर्ण, अचेतनत्व, मूर्त्तत्वरूपाः षट् । धर्मास्तिकाये गतिहेतुत्व, अचेतनत्व, अमूर्त्तत्वरूपाः त्रयः । अधर्मास्तिकाये स्थितिहेतुत्व, अचेतनत्व, अमूर्त्तत्वरूपास्त्रयः । आकाशास्तिकाये अवगाहहेतुत्व, अचेतनत्व, अमूर्त्तत्वरूपास्त्रयः । कालेऽपि वर्त्तनाहेतुत्व, अचेतनत्वा,ऽमूर्त्तत्वरूपास्त्रयः ।

अत्र चेतनत्वं, अचेतनत्वं, मूर्त्तत्वं, अमूर्त्तत्वं चेतिगुणचतुष्कं सामान्यगुणेषु यथा तथा विशेषगुणेष्वपि गण्यते । अनुवृत्तिप्रत्ययहेतुत्वात् ते सामान्याः, व्यावृत्तिप्रत्ययहेतुत्वाच्च विशेषाः । तत्र चेतनत्वं सकलजीववृत्तित्वात् सामान्यं, जीवेतराऽवृत्तित्वाद्विशेषः । अचेतनत्वं सर्वाऽजीववृत्तित्वात् सामान्यं, जीवाऽवृत्तित्वाद्विशेषः । मूर्त्तत्वं सकलपुद्‌गलवृत्तित्वात् सामान्यं, पुद्‌गलेतराऽवृत्तित्वाद्विशेषः । अमूर्त्तत्वं (पुद्गलेतर) अमूर्त्त द्रव्यमात्रवृत्तित्वात् सामान्यं, पुद्गलाऽवृत्तित्वाद्विशेषः ।

जीवादिद्रव्याणां यथा गुणाः पर्यायाश्च, तथा कतिचित् स्वभावा अपि वर्त्तन्ते, परं तेषां गुणपर्यायेष्वेवान्तर्भवनान्न पृथगुपादानम् । तथापि शिष्यमतिवैशद्याय ते उपदर्श्यन्तेऽन्यतोऽत्र–'अस्तिस्वभावः, नास्तिस्वभावः, नित्यस्वभावः, अनित्यस्वभावः, एकस्वभावः, अनेकस्वभावः, भेदस्वभावः, अभेदस्व-

भावः, भव्यस्वभावः, अभव्यस्वभावः, परमस्वभावः। एत एकादश स्वभावाः सामान्यस्वभावाः। विशेषस्वभावा अपि चेतना-ऽचेतन-मूर्त्ता-ऽमूर्त्त-कप्रदेशाऽनेकप्रदेश-विभाव-स्वभाव-शुद्धा-शुद्धोपचरितस्वभावभेदाद् दश। तत्र चेतन-मूर्त्त-विभावा-ऽशुद्धोपचरित-स्वभावान् पञ्चैतान् विशेषस्वभावभेदान् विहाय धर्माऽधर्माऽऽकाशानां प्रत्येकं षोडश स्वभावाः। तानेव पञ्च बहुप्रदेशस्वभावं च त्यक्त्वा कालस्य पञ्चदश। जीवे पुद्गले च सर्वेऽपि-एकविंशतिरपि स्वभावाः सन्ति। अचेतनपुद्गलसंयोगाज्जीवेऽचेतनत्वादिस्वभावाः, चेतनद्रव्यसंगमाच्च पुद्गले चेतनत्वादिस्वभावा अपि सङ्गच्छन्ते इति नोद्भावनीयो विरोध इति॥

अथ पर्यायं लक्षयति-

**उभयाश्रिताः पर्यायाः ॥५॥**

द्रव्य-गुणोभयाश्रितत्वं पर्यायत्वमित्यर्थः। वस्तुतस्तु गुणविकारा एव पर्यायास्ते च वृद्धिहानिभ्यां षट् षड् इति द्वादशधा। तद्यथा-अनन्तभागवृद्धिः, असङ्ख्यातभागवृद्धिः, सङ्ख्यातभागवृद्धिः, अनन्तगुणवृद्धिः, असङ्ख्यातगुणवृद्धिः, सङ्ख्यातगुणवृद्धिः। हानिश्च अनन्तभागहानिः, असङ्ख्यातभागहानिः, सङ्ख्यातभागहानिः, अनन्तगुणहानिः, असङ्ख्यातगुणहानिः, सङ्ख्यातगुणहानिः। वृद्धिर्हानिश्च पर्यायाणां षट्षट्प्रकारा यथा स्यात्तथाऽन्यतोऽवसेयम्। सामान्यतः पर्याया द्विधा-स्वभावपर्यायाः, विभावपर्यायाश्च। यस्य यः स्वभावस्तद्रूपेण प्रतिक्षणं भवनं तस्य स्वभावपर्यायः। अगुरुलघुद्रव्यविकाराः स्वभावपर्याया इति यावत्। अगुरुद्रव्यं यथा सिद्धिक्षेत्रं, तच्च स्थिरस्वभावं प्रतिक्षणं तथाभावेनैव परिणमद्वर्त्तते, न कदाचिदप्यन्यथा-अस्थिरं भवति, अतः स तस्य स्वभावपर्यायः। स्वभावादन्यथाभवनं-स्वभावं हित्वा अन्यरूपेण परावर्त्तनं विभावपर्यायः। यथा, नरनारकादिचतुर्गतयो योनयो वा चतुरशीतिलक्षसङ्ख्याकाः॥

सप्तपदार्थवादिनां नैयायिकानां षट्पदार्थवादिनां वैशेषिकाणां च मतं खण्डयितुं तन्मतं सविस्तरमुपन्यस्यति-

**परे तु द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावाः सप्त पदार्थाः। तत्र द्रव्यगुणौ वक्ष्येते। उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनभेदात् कर्म पञ्चधा। नित्यमनेकसमवेतं सामान्यं, द्रव्यगुणकर्मवृत्ति, परमपरं चेति तद् द्विधा। परं सत्ता, अपरं द्रव्यत्वादि। नित्यद्रव्यवृत्तयो व्यावर्त्तका विशेषा अनन्ताः। नित्यसम्बन्धः समवायः, एक एव, अयुतसिद्धवृत्तिः। अभावश्चतुर्विधः; प्रागभावः, प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्च। तत्राऽनादिः सान्तः प्रागभावः। सादिरनन्तो ध्वंसः। तादात्म्यभिन्नसम्बन्धावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः। तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभाव इति॥**

**परेत्विति**। अयमत्राशयः—जगदिदं द्रव्यात्मकं, द्रव्याणि च नवाग्रे वक्ष्यन्ते। तानि च द्रव्याणि गुणं विना क्रियां विना च नैव द्रव्यत्वं भजन्तीति गुण—कर्मकल्पना क्रियते। समानजातीयेषु द्रव्येषु याऽनुगतप्रतीति 'यं घटोऽयं घट' इत्याद्यात्मिका भवति, सा न निराधारा भवितुमर्हतीति तदर्थं सामान्यं कल्प्यते। अनित्यपदार्थानां परस्परं व्यावर्त्तकाः स्वीया अवयवा एव, नित्यानां तु व्यावृत्तिः परस्परं कथं स्यात्? नित्यत्वेन तुल्यत्वात्। अतस्तदर्थं विशेषपदार्थो मन्यते। द्रव्येषु च गुणकर्मसामान्यविशेषास्तिष्ठन्ति, ते च न संसर्गेण विना स्थातुं तत्र शक्ता इति समवायनामा सम्बन्धात्मकः पदार्थः स्वीक्रियते। या च भवति 'घटो नास्ति' त्याद्याकारा प्रतीतिः, सा नैव निर्मूलेति तन्मूलरूपोऽभावनामा पदार्थः स्वतन्त्रोऽभिप्रीयत इति नैयायिकानां सम्मतम्॥ तेषां मते पदार्थानां लक्षणं स्वरूपं चाह—**तत्रेति। उत्क्षेपणेति**। कर्म चलनस्वरूपम्। तत्रोत्क्षेपणं शरीरादेरूर्ध्वदेशसंयोगहेतुः। अधोदेशसंयोगहेतुस्त्वपक्षेपणम्। शरीरस्य सन्निकृष्टसंयोगहेतुराकुञ्चनम्। प्रसारणं च ततो विपरीतं, विप्रकृष्टसंयोगहेतुरित्यर्थः। एतत्कर्मचतुष्टयं मुक्त्वा गमन—रेचन—स्यन्दनादिबहुप्रकारं कर्म गमनम्। **नित्येति**। वस्तूनामनुगतैकाकारप्रतीतिनियामकं सामान्य इत्यर्थः। तल्लक्षणं तु नित्यत्वे सति अनेकसमवेतत्वम्। यथा—घटत्वं नित्यं, घटसमूहे

समवायेन वृत्तिमत् चापि । तच्च (सामान्यं) द्रव्ये गुणे कर्मणि चेति त्रिष्वेव वर्तते । सामान्यादिषु तत्कल्पने तु जातिबाधकप्रसङ्गः । **जातिबाधकाश्च–**

**व्यक्तेरभेदस्तुल्यत्वं, सङ्करोऽथाऽनवस्थितिः ।**

**रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः ।।" इति ।** विस्तरापेक्षिणा **सिद्धान्तमुक्तावल्यादयो**ऽवलोकनीयाः । परं सत्तेति । सत्ता महासामान्यं, तच्च परमेव । द्रव्यत्वं गुणत्वं कर्मत्वं चाऽवान्तरसामान्यं, तच्च परं अपरं चापि । तत्र सत्तापेक्षयाऽपरत्वं, घटत्वाद्यपेक्षया परत्वं च । घटत्वादिकं तु अपरसामान्यम् । **नित्यद्रव्येति ।** नित्यद्रव्याणि परमाण्वाकाश–काल–दिगात्म–मनांसि । तेषु वर्त्तमानास्तेषां च व्यावर्त्तका विशेषाः । यथा–अयं घट एतस्माद् घटाद् भिन्नः, भिन्नावयवारब्धत्वात्, तथा परमाण्वादिषु नाऽवयवाः सन्ति, नित्यैकरूपत्वात्तेषाम् । तर्हि कस्तेषां भेदकः ? अत आह–विशेषाः । यथा–अयं परमाणुः, एतस्मात् परमाणोर्भिन्नः, भिन्नविशेषात् । ते चाऽनन्ताः परमाणूनामनन्तत्वादिति । **नित्यसम्बन्ध इति ।** अवयवावयविनोः, गुणगुणिनोः, क्रियाक्रियावतोः, जातिव्यक्त्योर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवाय इत्यर्थः । स चाऽयुतसिद्धवृत्तिः । यौ कदाचिदप्यसम्बद्धौ न वर्त्तेते तौ अयुतसिद्धौ,' यथा–घटस्तन्निष्ठगुणाश्च, कपालद्वयं घटश्च, घटस्तन्निष्ठा क्रिया च, घटो घटत्वं च, परमाणुर्विशेषाश्चेति । चतुर्णामभावानां नामग्राहं लक्षणान्युपदर्शयति–**तत्रेति ।** यस्य आदिर्न विद्यते, अन्तश्चाऽस्ति, स प्रागभाव इत्यर्थः । स च 'इह घटो भविष्यती' त्याकारः । यस्य त्वादिरस्ति अन्तश्च नास्ति स ध्वंसः । 'घटोध्वस्त' इत्याकारकः । **तादात्म्यभिन्नेति ।** अत्रेदमाकूतम्–यस्याऽभावो गृह्यते सोऽभावस्य प्रतियोगी । प्रतियोगिनि प्रतियोगिता वर्तते । सा प्रतियोगिता अभावनिरूपिता भवतीत्यभावः प्रतियोगितायाः निरूपकः, अभाव–प्रतियोगितयोश्च निरूप्यनिरूपकभावः सम्बन्धः । सा च प्रतियोगिता प्रतियोगिस्वरूपपदार्थादिनिष्ठधर्मेण सम्बन्धेन च अवच्छिन्ना–विशिष्टा भवति । अतश्च सा प्रतियोगिता तादृशधर्मावच्छिन्ना तादृशसम्बन्धावच्छिन्ना चोच्यते । स च सम्बन्धो यदा

तादात्म्यसम्बन्धेतरसम्बन्धरूपो यः कोऽपि भवति, तदा प्रतियोगिता सा अत्यन्ताभावनिरूपिता भवति। यदा च स सम्बन्धः तादात्म्यं, तदा सा प्रतियोगिता अन्योन्याभावनिरूपिता भवति। 'भूतले घटो नास्ति' 'घटाभाववद्भूतलम्' इत्यादिकोऽत्यन्ताभावः। 'घटो न पट' इत्यादिकश्चाऽन्योन्याभावः॥ मीमांसकाः शक्तिसादृश्यादिकं पदार्थान्तरं यथा मन्यन्ते, न तथा नैयायिकादय इति॥

नैयायिकमतं खण्डयितुमाहाधुना—

**तन्न। यथायथं यथोक्तेष्वन्तर्भावात्। किञ्चाऽवयवाऽवयविनोः गुणगुणिनोः क्रियाक्रियावतोश्च भेदाभेद एव सम्बन्धः। अभावश्चाधिकरणात्मक एवेति॥**

**तन्नेति**। यदुक्तमधुना नैयायिकैस्तन्न विचारसहम्। द्रव्यपदार्थस्याऽस्मदभिमतद्रव्य एव समावेशात्। अस्मदभिमतद्रव्यापेक्षया तुच्छरूपत्वाच्च। गुणकर्मसामान्यविशेषेषु गुणस्य गुणे, शेषाणां च पर्यायेष्वेव समावेशः। तदेवाह—**यथायथमिति। किञ्चेति**। सम्बन्धोऽपि समवायो न युक्तिसहः। स हि एकान्तेन भिन्नानामेव गुणगुण्यादीनां सम्बन्धः। गुणगुण्यादीनामेकान्तभेदश्च न युक्तिसहः। गुणस्य गुणिन एकान्तभिन्नत्वे यथा घटस्य रक्तत्वं तथा तदेव रक्तत्वं पटस्यापि कथं न स्यादित्यापत्तेः। न च घटसमवाययोगाद् घटस्यैव तत्, न तु पटस्येति वाच्यम्। समवायस्य त्वन्मते नित्यत्वादेकत्वाच्च यथा रक्तत्वे घटसमवायस्य योगः सम्भवति, तथैव पटसमवायस्यापि संभवत्येवेति। किञ्च गुणस्य गुणिना सहैकान्तेनाऽभेदे सति यथा घटपदार्थः 'घट' शब्देनाभिधीयते, तथा 'रक्त' शब्देनापि कथं नाभिधीयेत?। 'रक्तो घटः' इत्यकथित्वा 'रक्त' इत्येव व्यवहारः कथं न प्रवर्त्तते?। 'रक्त'पदमपि कुम्भादिवद् घटस्य पर्यायत्वं कथं न?। अतो ज्ञायते यद्—गुणगुण्यादीनां न समवायो न वाऽभेदः, अपि तु भेदाभेदसम्बन्ध एव न्याय्य इति। ननु 'प्रत्येकं यो भवेद्दोषो, द्वयोर्भावे कथं न सः?' इत्युक्तेरत्र भेदपक्षे अभेदपक्षे च ये दोषास्ते समेऽपि

भेदाभेदपक्षे समूहरूपेण समागच्छन्ति, तदा कः पन्थाः ? इति चेत्, न। अत्र द्वयोर्भाव इति न, किन्तु स्वतन्त्र एवोभयपक्षमिश्रणघटितस्तृतीयः पक्षः, नृसिंहादिवत्, तत्र च नैकोऽपि दोषः सम्भवतीति ध्येयम् ॥ अभावोऽपि तुच्छत्वाभावातिरिक्तः पदार्थः। अपि त्वधिकरणरूप एव। तदेवाऽऽह—**अभावश्चेति** ॥

ननु भवतु भवन्मतेऽभावोऽधिकरणात्मकः, परन्तु स कतिभेदः किं स्वरूपश्चेति दर्शनीयमित्यत आह—

**तत्र, यन्निवृत्तावेव कार्यस्य समुत्पत्तिः सोऽस्य प्रागभावः, यथा घटस्य मृत्पिण्डः। यदुत्पत्तौ कार्यस्याऽवश्यं विपत्तिः सोऽस्य प्रध्वंसाभावः, यथा कलशस्य कपालकदम्बकम्। स्वरूपान्तरात् स्वरूपव्यावृत्तिरितरेतराभावः, यथा स्तम्भस्वभावात् कुम्भस्वभावव्यावृत्तिः। कालत्रयापेक्षिणी तादात्म्यपरिणामनिवृत्तिरत्यन्ताभावः, यथा चेतनाचेतनयोः ॥६॥**

तत्र **यन्निवृत्ताविति। घटस्येति।** यदा घटो मृत्पिण्डावस्थस्तदा भवति प्रतीतिः 'इह मृत्पिण्डे घटो भविष्यती'ति। एवं च मृत्पिण्ड एव घटस्य प्रागभावः। न च जैनानामेकस्मिन्नेव पदार्थे समकालमस्तित्व—नास्तित्वधर्मवादिनां मते मृत्पिण्डस्याधिकरणस्याऽभावात्मकत्वं दुर्घटमिति ध्येयम्। प्रध्वंसस्वरूपमाह—**यदुत्पत्ताविति।** यदा घटो ध्वंसते स्वावयवेषु, तदा 'इह कपालयुगले घटो ध्वस्त' इति भवति प्रतीतिः। एवं च कपालकदम्बकस्योत्पत्तिस्तदैव यदा घटस्य नाशः। अतः घटध्वंसस्याधिकरणं कपालकदम्बकमेव घटस्य ध्वंसः। तस्य घटध्वंसाऽभिन्नत्वादिति भावः। **स्वरूपेति।** 'स्तम्भो न कुम्भः' इत्यत्र कुम्भस्वरूपात् स्तम्भस्वरूपस्य पार्थक्यमेवाऽन्योन्याभावः। भेदप्रतियोगी भेदाधिकरणं वा स्तम्भ एवेति। अत्यन्ताभावमाह—**कालेति।** कालत्रयापेक्षी यस्तादात्म्यपरिणामः, तस्य निवृत्तिरेवाऽत्यन्ताभाव इत्यर्थः। यथा चेतने अचेतनत्वं नास्तीत्यत्यन्ताभावः, कालत्रयेऽपि चेतने नाऽचेतनतादात्म्यमित्यत एव संघटते। एवं कालत्रयेऽपि अचेतने नैव चैतन्यं कदाचिदपि सम्भवतीत्यतोऽचेतने

भवति चैतन्यात्यन्ताभावः। नित्यो योऽभावः सोऽत्यन्ताभाव इति यावत्। तत्र चेतन एव अचैतन्याभावरूपः, अचेतन एव च चैतन्याभावरूपः।

**"सर्वमस्ति स्वरूपेण पररूपेण नास्ति च ॥"** इति जैनैः सिद्धान्तितत्वात् ॥

द्रव्यगुणपर्यायाश्रयः पदार्थास्तत्र कानि कति च द्रव्याणीत्यत्राह—

**धर्माधर्माकाशजीवपुद्गलकाला द्रव्याणि ॥७॥ गत्युपष्टम्भको धर्मास्तिकायः। स्थित्युपष्टम्भकोऽधर्मास्तिकायः। अवगाहस्वभाव आकाशः। उपयोगलक्षणो जीवः। ग्रहणगुणः पुद्गलः। वर्त्तना-लक्षणः कालः ॥८॥**

अस्तयः—प्रदेशाः। प्रदेशोऽविभाज्यः सर्वसूक्ष्मो वस्त्वंशः। तेषां कायः—समूहोऽस्तिकायः। धर्म एव, अधर्म एव, आकाश एव, जीव एव, पुद्गल एव वा अस्तिकायो धर्मास्तिकायोऽधर्मास्तिकाय आकाशास्तिकायो जीवास्तिकायः पुद्ग-लास्तिकायः कालश्च इति षड् द्रव्याणि। कालोऽनन्तोः निरवधिश्च, तस्य न प्रदेशाः। शेषाः सप्रदेशाः। प्रत्येकं द्रव्याणां कार्यमाह—**गतीति**। जीवपुद्गल-योर्गतौ—गमनागमने साहाय्यदायको धर्मास्तिकायः। जीवपुद्गलयोरेव स्थितौ—स्थिरतायां गमनागमनाभावरूपायां साहाय्यदानस्वभावोऽधर्मास्तिकायः। तावुभौ चतुर्दशरज्ज्वात्मकलोकव्यापकौ। तौ चाऽचेतनावमूर्त्तौ च। असङ्ख्येय-प्रदेशात्मकौ च। जीवपुद्गलयोरेव यथास्थानमवकाशदानतत्परं आकाशम्, **'अवकाशदमाकाश' मित्युक्तेः**। आकाशं तु लोकालोकव्यापि। तत्र लोका-काशमसङ्ख्यप्रदेशात्मकमितरत्त्वनन्तप्रदेशम्। **उपयोग इति**। उपयोगो ज्ञानं दर्शनं च। स च जीवस्य लक्षणम्। विश्ववर्त्ती यः कोऽपि सूक्ष्मः स्थूलो वा जीवः स जघन्यतोऽप्युपयोगस्याऽव्यक्तमंशं बिभर्त्त्येव, अन्यथा तस्य जीवत्वं न स्यादत एव जीवस्य उपयोगो लक्षणमुक्तम्। **उक्तं च—"उपयोगो लक्षणम्"।**

स च जीवोऽनन्तसङ्ख्यकः। चैतन्यात्मकोऽमूर्त्तश्च। जीवास्तिकायत्वेन रूपेण स सकललोकव्यापीति। प्रतिजीवं चाऽसङ्ख्याताः प्रदेशाः। जीवानां च परस्परं हिताहितबोधदानादिरूप उपकारोऽस्ति। **ग्रहणेति**। जीवैर्गृह्यमाणत्वाद्

ग्रहणं गुणो यस्य स ग्रहणगुणः पुद्गलः । तस्य पूरणगलनादिरूपः स्वभावः । स च पृथ्व्यादिभेदादनेकरूपः । अचेतनो मूर्तश्च । तस्य चत्वारो भागाः, स्कन्धाः, देशाः, प्रदेशाः, परमाणवश्च । धर्माऽधर्माऽऽकाशा अपि स्कन्ध–देश–प्रदेशभेदात् त्रिविधा इति बोध्यम् । अनन्तपरमाणूनां समूहः स्कन्धः । स्कन्धैकदेशो देशः । स्कन्धस्थो देशस्थो वा परमाणुः प्रदेशः । स्कन्धादेश्च्युतः प्रदेशो निर्विभाज्यभागस्वरूपः परमाणुरिति । स च पुद्गलो वर्णगन्धरसस्पर्शसमन्वित एव भवति । **तदुक्तम्–"वण्णगंधरसा फासा, पुग्गलाणं तु लक्खणं"** । इति । **वर्तनेति** । धर्मादिपदार्थानां स्वस्वपर्यायोत्पत्तौ स्वयमेव प्रवर्त्तमानानां तथा करणे प्रेरणं वर्तना । नवत्वजीर्णत्वादिपरिणामा एव वर्त्तनेति यावत् । सा च कालस्य लक्षणम् । कालश्च नाऽस्तिकायरूपः । तत्र देशप्रदेशादिविभागाभावात् ।

**तदुक्तं जीवसमासवृत्तौ–**

**"अथ यथा धर्मास्तिकाय इत्युक्तं तथा कालास्तिकाय इति कस्मान्नोच्यते ? इति चेत्, नैवं, प्रदेशबहुत्व एव तदुपपत्तेः । अत्र च तन्नास्ति । अतीतानागतसमयानां विनष्टानुत्पन्नत्वेन प्रज्ञापकप्ररूपणाकाले वर्त्तमानसमयलक्षणस्यैकस्यैव प्रदेशस्य सद्भावादिति । यद्येवं, आवलिकामुहूर्त्तदिवसादिप्ररूपणाया अप्यभावप्रसङ्गः प्राप्नोति, आवलिकादीनामप्यसङ्ख्येयसमयात्मकत्वेन प्रदेशबहुत्व एवोपपत्तेः ? । सत्यमेतत्, केवलं स्थिरस्थूरकालत्रयवर्त्तिवस्त्वभ्युपगमपरव्यवहारनयमतमाश्रित्यावलिकादिकालः प्ररूप्यते । निश्चयनयस्तु मन्यते, न धर्मास्तिकायादौ प्रदेशराशिरिवावलिकादाववस्थितः समयराशिरस्ति, अतीतानागतानां विनष्टानुत्पन्नत्वेन वर्तमानसमयमात्रस्यैव सत्त्वादिति न वास्तवा आवलिकादयो, नापि कालेऽस्तिकायतेति । अत एव कालोऽन्यत्र वर्तमानसमयमात्रतयैव निर्धार्य प्रोक्तो न सामान्येन । यदाह–"कइ णं भंते ! दव्वा पन्नत्ता ? गोयमा ! छ दव्वा पन्नत्ता, तं जहा–धम्मत्थिकाए अधम्म-**

त्थिकाए आगासत्थिकाए जीवत्थिकाए पोग्गलत्थिकाए अद्धासमए" इत्यलं विस्तरेण" इति ॥

कालसत्त्वे ह्येव च जन्तवः स्वकीयाऽन्यदीयास्तित्वादिभावं ज्ञातुं समर्था भवन्ति, अतः कालस्तत्र निमित्तमिति भावः। स च कालः समयाद्युपाधिभेदाद् बहुविधो बोध्यः ॥

अत्र नैयायिकाभिमतं दूषयितुं तत्सम्मतद्रव्यादिविभागमुपन्यस्यति—

**परे तु, पृथिव्यप्तेजोवाय्वाकाशकालदिग्देहिमनांसि द्रव्याणि। गन्धवत्त्वं शीतस्पर्शवत्त्वमुष्णस्पर्शवत्त्वमपाकजानुष्णाशीतस्पर्शवत्त्वं शब्दसमवायिकारणत्वं अतीतादिव्यवहारहेतुता प्राच्यादिव्यवहारहेतुता ज्ञानवत्त्वं सुखादिसाक्षात्कारहेतुतेति क्रमात्तेषां लक्षणानि। पृथिव्यादयश्चत्वारो नित्या अनित्याश्च। नित्याः परमाणुरूपा अनित्या द्व्यणुकादिरूपाः। ते च शरीरेन्द्रियविषयभेदात् त्रिधा। पृथिव्यां शरीरं योनिजमयोनिजं च मनुजकृम्यादीनाम्। इन्द्रियं घ्राणम्। विषयः पाषाणादिः। जले शरीरमयोनिजं वरुणलोके। इन्द्रियं रसनं, विषयः सरिदादिः। तेजसि शरीरं प्राग्वत्, तच्च सूर्यलोके। इन्द्रियं चक्षुः, विषयो वह्निसुवर्णादिः। वायौ शरीरं प्राग्वत्, तच्च वायुलोके। इन्द्रियं त्वक्, विषयः प्राणादिः। आकाशे इन्द्रियं श्रोत्रम्। आत्मा जीवात्मा परमात्मा च। आद्यः प्रत्यङ्ग भिन्नः। द्वितीयः सर्वत्र एक एव नित्यज्ञानेच्छाकृतिमान्। आकाशादयो विभवो नित्याश्च। मनोऽणुरूपं नित्यमनन्तं चेति ॥**

परे त्विति। कार्यसमवायिकारणं द्रव्यम्। तच्च नवधा पृथ्व्यादिभेदेन। तत्र पृथ्वी क्षितिः, आपो जलानि, तेजो वह्निः, वायुः पवनः, आकाशः, कालः समयः, दिग् दिशा, देही आत्मा, मनश्चेति नव। तेषामसाधारणधर्मरूपाणि क्रमशो लक्षणान्याह—**गन्धेति**। पृथिव्यामेव गन्धः, जल एव शीतस्पर्शः, तेजस्येवोष्णस्पर्शः, वायावेवापाकजानुष्णाशीतस्पर्शश्च। रूपरसगन्धस्पर्शाः पाकजा

अपाकजाश्च, तत्र पाकजाः क्षितौ—क्षितिपरमाणावेव। शेषेषु तु इमेऽपाकजा एव। पाको नाम विलक्षणतेजःसंयोगस्तेन जातः पाकजः। एवं च वायौ यः स्पर्शः सोऽपाकजः, अनुष्णाशीतश्च सः—न उष्णो नापि शीत इति भावः। स वायावेव नान्यत्रेति वायोर्लक्षणं सः। आकाशे—कर्णशष्कुल्यवच्छिन्ने एव शब्दो जायते समवायसम्बन्धेन, अत आकाशः शब्दसमवायिकारणम्। 'इदानीं घट' इत्याद्यतीतानागतवर्त्तमानव्यवहारहेतुत्वं कालस्य। 'इयं प्राची' 'इयं प्रतीची' इत्यादिव्यवहारस्य हेतुभूतं द्रव्यं दिग्। आत्मा ज्ञानवान्। मनश्चाऽऽत्मनिष्ठज्ञानसुखादिगुणानां साक्षात्कारे 'अहं सुखो'त्याद्यात्मके हेतुरिति। पृथ्व्यादीनां विभागमाह—**पृथिव्यादय इति**। स्पष्टम्। **शरीरेति**। चेष्टाश्रयं शरीरम्। हिताहितप्राप्तिपरिहारार्था क्रिया चेष्टा। इन्द्रियत्वं च शब्देतरोद्भूतविशेषगुणाऽनाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम्। भवति चेन्द्रियमात्रं शब्देतरा ये उद्भूता विशेषगुणा उद्भूतरूपरसादयस्तेषामनाश्रयं, ज्ञानकारणीभूतस्येन्द्रियमनःसंयोगस्य चाऽऽश्रयमिति। उपभोगसाधनं च विषय इति। **प्राग्वदिति**। अयोनिजमित्यर्थः। घ्राणेन्द्रियं रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात्पार्थिवं, रसनेन्द्रियं रूपादिषु रसमात्रव्यञ्जकत्वेन जलीयं, चक्षुरिन्द्रियं स्पर्शाऽव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात्तैजसं, स्पर्शमात्राभिव्यञ्जकत्वाच्च त्वगिन्द्रियं वायवीयम्। पार्थिवो विषयः पाषाणप्रस्तरादिः। जलीयः सरित्समुद्रादिः। हिमकरकाद्यपि तस्यैव, न पृथिव्या इति बोध्यम्। वह्निः सुवर्णादिश्च तैजसो विषयः। सुवर्णं तैजसं, असति प्रतिबन्धकेऽत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानद्रवत्वादित्यर्थः। वायवीयो विषयः प्राणः। स चैकोऽपि स्थानभेदात् प्राणापानादिसंज्ञां लभते। आकाशीयमिन्द्रियं श्रोत्रम्। यद्यपि श्रोत्रेन्द्रियं पुरुषभेदान्नाना, आकाशं त्वेकं नित्यस्वरूपमिति कथं श्रोत्रमाकाशीयं स्यादिति शङ्कितुं शक्यते, तथाप्युपाधिभेदात्—कर्णशष्कुल्यात्मकोपाधिभेदादाकाशं नाना सम्भवतीति न दोषः। कर्णशष्कुल्यवच्छिन्नमाकाशमेव श्रोत्रमिति यावत्। कालश्च परापरत्वधीहेतुः, अयमस्मात् परः, अयमस्मादपरः इत्यात्मककालिकपरत्वापरत्वयोर्हेतुरित्यर्थः। स चैकोऽपि उपाधिवशात् क्षणदिनादिभेदं भजति।

उक्तं च—

" जन्यानां जनकः कालो जगतामाश्रयो मतः ।
परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः ॥ '

इति । दैशिकपरत्वापरत्वहेतुश्च दिक् । साप्येकैव, उपाधिभेदात्तु प्राच्यादिव्यपदेशं प्राप्नोति । आत्मेति । तत्र जीवात्मा—इन्द्रियाद्यधिष्ठाता धर्माधर्माधारः 'अहं' प्रत्ययगोचरत्वेन प्रत्यक्षः । तस्य च प्रत्यक्षं मनसैव विशेषगुणसंपर्कवता । बुद्ध्यादिगुणानामाश्रयश्च सः । द्वितीय इति । परमात्मेत्यर्थः । परमात्मा जगतः स्रष्टा, स चैको नित्यश्चेति तस्य गुणा—ज्ञानं, इच्छा, कृतिः—प्रयत्नः—अपि नित्या एवेति । आकाशेति । आकाश—काल—दिग्देहिनो विभवः—व्यापकाः । विभुत्वं च सर्वमूर्त्तसंयोगित्वम् । ते च नित्या—अप्रच्युताऽनुत्पन्नस्थिरैकरूपा इत्यर्थः । मन इति । मनसो व्यापकत्वे ज्ञानानां भिन्नभिन्नेन्द्रियजन्यानां युगपद्भावः संभवेत्, न च भवतीत्यतः कल्प्यते मनोऽणु इति । तदपि नित्यं, अनन्तसङ्ख्यं, प्रतिजीवं पृथक् चेति ॥

एवं नैयायिकमतं निरूप्य तत् खण्डयति—

**तन्न । पृथिव्यप्तेजोमनसां पुद्गलस्वरूपाऽनतिरेकात् पुद्गलत्वप्रतीतेः सर्वत्राविशिष्टत्वात् । किञ्च य एव पुद्गलाः पृथिवीत्वादिना परिणतास्त एव जलत्वादिनाऽपि परिणमन्ति । य एव च जलत्वादिना परिणतास्त एव पृथिवीत्वादिनाऽपि परिणमन्तीति । अन्यथा पटसुवर्णादीनामपि द्रव्यभेदापत्तेः । दिक् च नभःप्रदेशपङ्क्तिरूपैवेति नातिरिच्यते ॥ ९ ॥**

तन्नेति । पृथिव्यबिति । मनोऽपि पौद्गलिकमेव, अत एव न नित्यं, पुद्गलानामपचयोपचयरूपत्वेनाऽनित्यत्वात् । पौद्गलिकत्वादेव च तन्नाणुरूपमिति ध्येयम् । एवं च पृथिव्यादीनां पुद्गलास्तिकाय एव समावेशान्न स्वतन्त्रपदार्थतेति । यथा च मनसोऽणुत्वाभावेऽपि ज्ञानानामयौगपद्यं संभवति तद् 'जुगवं

**दो नत्थि उवओगा'** इति सिद्धान्तानुसारेण प्रतिजीवं प्रतिसमयमेकस्यैवोपयोगस्य सत्त्वादित्यादिकयुक्तिप्रमाणसम्पन्नमिति बोध्यम् । **किञ्चेति** । पृथिवी एव कालान्तरे जलतया, जलमेव च कालान्तरे पृथिवीतया परिणमति। एवमन्यान्यपि पुद्गलद्रव्याणि स्वभिन्नद्रव्यतामाप्नुवन्तीति जैनमतं, एवं च कुतो पृथिवी जलं चोभयमपि स्वतन्त्रे द्रव्ये भवितुमर्हतः । । अन्यथा—चेद् भवन्मतानुसारेण तेषामपि स्वभिन्नद्रव्यतया परिणामिनां द्रव्याणां पार्थक्यं—पृथग्द्रव्यत्वमेवेष्यते तदा इत्यर्थः । **पटेति** । पटोऽपि कदाचित्खण्डपटाद्यात्मकतया परिणमतीत्यतो पटस्य खण्डपटस्यापि च प्रत्येकं स्वतन्त्रद्रव्यत्वमेव स्वीकरणीयं स्यात् । एवं घटोऽपि पार्थिवः, शरावोऽपि तथा । तथा च तावपि स्वतन्त्रे द्रव्ये स्याताम् । यदि च तेषां घटशरावादीनां पार्थिवत्वेन न स्वतन्त्रद्रव्यत्वं, तर्हि पृथिव्यादीनामपि पौद्गलिकत्वेनैव न स्वतन्त्रद्रव्यत्वमिति । न केवलं पृथ्व्यादीनां, अपि तु शब्दान्धकारातपप्रभोद्योतादीनामप्यस्मन्मते पौद्गलिकत्वमेव । उक्तं च—

**"सद्दंधयार उज्जोअ—पभा छायाऽऽतवेहि आ ।**
**वण्णगन्धरसाफासा, पुग्गलाणं तु लक्खणं ॥"** इति ॥

आकाश—काल—आत्मनामस्माभिः स्वतन्त्रद्रव्यत्वमभ्युपगतमेव । न च तेषामप्येकान्तेन नित्यत्वमिति तु विशेषः । अस्मन्मते नित्यमनित्यं वा सर्वमपि द्रव्यजातं द्रव्यात्मना नित्यं पर्यायात्मना चानित्यमिति बोध्यम् । यदुक्तं ग्रन्थकारेणैव **स्वरचितजैनसिद्धान्तमुक्तावल्यां— "अवगाहकानां जीवपुद्गलानां प्रयोगाद्विस्रसातो वा एकस्मान्नभःप्रदेशात् प्रदेशान्तरमुपसर्पणे तैः सममाकाशस्यैकस्मिन् प्रदेशे विभाग उत्तरस्मिंश्च संयोगः । एवं चाकाशस्य पूर्वसंयोगध्वंसरूपपरिणत्यापत्त्या विनाशः, उत्तरसंयोगोत्पत्त्याख्यपरिणत्यनुभवाच्चोत्पादः, विरुद्धधर्माध्यासे धर्मिभेदस्यावश्यंभावित्वात् । ध्रौव्यं चाकाशस्योत्पादव्यययोरधिकरणत्वेनानुगतत्वात् । तद्भावाव्ययं चात्र नित्यं, उत्पादविनाशभावेऽपि अन्वयिरूपात्तद्भावाद् यन्न व्येति तन्नित्यमिति तदर्थः ।**

**एवं प्रदीपादावपि । नहि तैजसाः परमाणवो दीपपर्यायापन्ना वाताभिघातादिना तेजःपर्यायं परिहायान्धकाररूपपरिणत्यन्तरं भजन्तोऽप्येकान्तेनाऽनित्याः, पुद्गलरूपतया व्यवस्थितत्वात्तेषाम् । न हि पूर्वपर्यायनाश उत्तरपर्यायोत्पाद इत्येतावतैवानित्यत्वं । न हि सुवर्णद्रव्यं हारकेयूराद्यवस्थान्तराण्यासादयदप्येकान्ततो ध्वस्तं, आबालगोपालं तेषु सुवर्णद्रव्यानुगमस्य प्रतीतत्वात् । 'घटरूपेण मृद्द्रव्यं नष्टं, न मृद्द्रव्यरूपेण नष्टं' 'घटरूपेण घटो नष्टो न तु मृद्रूपेण' इति प्रतियन्ति च लोका अपि वस्तुनो नित्यानित्यत्वमिति ।''** किञ्च—आत्मा न विभुः; किन्तु शरीरप्रमाणः; तद्गुणानां ज्ञानादीनां तत्रैवोपलभ्यमानत्वात् । यस्य गुणा यत्र देशे उपलभ्यन्ते, स तत्रैव वर्त्तितुं योग्यः शक्यश्च, नान्यत्र, यथा घटपटादिः । तथा चात्मेति । आह च—

**"यत्रैव यो दृष्टगुणः स तत्र, कुम्भादिवन्निष्प्रतिपक्षमेतत् ।**
**तथापि देहाद् बहिरात्मतत्त्व–मतत्त्ववादोपहताः पठन्ति ॥" इति ।**

स चात्मा सङ्कोचविकासशीलः, अत एव यादृशो जीवो गजे तादृश एव कीटिकायामपि स्यादिति सङ्गच्छते । श्रोत्रेन्द्रियमपि निर्वृत्युपकरणरूपं पौद्गलिकमेवेति न तदाकाशीयं, आकाशस्याऽपौद्गलिकत्वेनाऽमूर्त्तत्वात् । दिगपि न स्वतन्त्रं द्रव्यं, किन्त्वाकाशात्मकमेवेत्याह—**दिक् चेति** ॥

ननु षड् द्रव्याणीति सिद्धं, तत्र कानि सक्रियाणि कानि वा निष्क्रियाणि, उत सर्वाण्येवाऽक्रियाणि सक्रियाणि वेति दर्शनीयमित्यत्राह—

**जीवपुद्गलाः सक्रियाः, शेषाण्यक्रियाणि ॥१०॥**

**जीवेति ।** ननु क्रियावत्त्वं मूर्त्तत्वं, जीवश्च भवताऽमूर्त्त उच्यते, तत् कथं तत्र क्रिया सङ्गच्छते ? सत्यं, किन्तु स्याद्वादिनां नायं दोषः । शरीरसमागमादात्माऽपि अस्माकं कथञ्चिन्मूर्त्त एव, तथा च तत्र क्रियावत्त्वे न कोऽपि बाध इति । **शेषाणि**—धर्माधर्माकाशकाला इत्यर्थः ॥

ननु कानि द्रव्याणि कतिसङ्ख्यानीति वाच्यं, इत्यत आह–

**आऽकादाशादेकद्रव्याणि । जीवपुद्गलकाला अनन्तानि ॥११॥**

धर्मास्तिकायोऽधर्मास्तिकाय आकाशास्तिकायश्चैकद्रव्याणि । जीवा अनन्ता इत्युक्तपूर्वं, पुद्गला अप्यनन्ता एव, कालोऽप्यनन्त एव, अनन्तसामयिकत्वादिति ॥

द्रव्याणां मूर्त्तामूर्त्तविभागमाह–

**रूपिणः पुद्गलाः । शेषाण्यरूपीणि ॥१२॥**

स्पष्टम् ॥

क्रमशो द्रव्याणामन्तर्विभागमाह–

**तानि च दशधा । धर्मास्तिकायस्तद्देशस्तत्प्रदेशः । अधर्मास्तिकायस्तद्देशस्तत्प्रदेशः । आकाशास्तिकायस्तद्देशस्तत्प्रदेशः । अद्धा समयश्च; निर्विभागत्वाच्चास्य न देशप्रदेशसम्भवः । सकलदेशप्रदेशानुगतसमानपरिणतिमद्विशिष्टं द्रव्यमस्तिकायः । तस्य सांशो भागस्तद्देशः । निरंशो भागस्तत्प्रदेशः ॥१३॥**

तानि–अरूपीणि, अरूपिष्वपि मध्ये धर्माऽधर्माऽऽकाशकाला इत्यर्थः । जीवभेदानां पुद्गलभेदानां चाग्रे वक्ष्यमाणत्वात् । कालस्त्वेक एवानन्त इति तस्य न स्कन्धदेशादिभेदसम्भव इत्याह–**निर्विभागेति** । धर्माऽधर्माऽऽकाशात्रयः स्वयं स्कन्धरूपाः, तेषां च देशप्रदेशौ प्रत्येकमन्तर्विभागाविति नव, दशमश्च काल इति दशभेदा अरूप्यजीवास्तिकायस्येति रहस्यम् । तत्र कोऽयमस्तिकाय इत्याशङ्कायां तत्स्वरूपमाह–**सकलेति** । सकला ये देशप्रदेशास्तेषु ‘अयं अस्तिकायोऽयमस्तिकाय’ इत्याकारा याऽनुगता–अनुवर्तमाना समाना–समाकारा परिणतिः–बुद्धेः परिणामः, अनुगतप्रतीतिरिति यावत्; अस्तिकायत्वस्य जातित्वेन अनुगतप्रतीतिनियामकत्वात्; तद्वद् विशिष्टं च यद् द्रव्यं सोऽयमस्तिकायः । असङ्ख्यप्रदेशसमूह इति यावत् ॥ तत्र को देशः कश्च प्रदेश

इति चेदाह–**तस्येति** । अस्तिकायस्य स्कन्धात्मकस्येत्यर्थः । सांशः–सावयवो भागः सप्रदेश इति यावत् । प्रदेशश्च तस्यास्तिकायस्य निरंशो–निर्विभाज्यो भाग इति ॥ धर्माऽधर्माऽऽकाशानां सिद्धिस्त्वेवम्–जीवपुद्गला लोके एव गमनागमनादिरूपां गतिं कुर्वते, नाऽलोके । अतो ज्ञायते यत्तेषां लोके गतौ साहाय्यकारकं किमपि द्रव्यं वर्त्तते, तच्च तैरपेक्ष्यते । अलोके च तस्याऽभावान्न तेषां तत्र गतिः । यच्च तद् द्रव्यं स धर्मास्तिकायः । यद्वा जीवपुद्गलानां गत्यात्मकं कार्यं विशिष्टकारणजन्यं विशिष्टकार्यत्वात् शाल्यङ्कुरवत् । यच्च तत्कारणं स धर्मास्तिकायः । एवं जीवपुद्गलानां स्थितिः–स्थिरता लोके एव भवत्येव, न त्वलोके; गमनाभावात् । लोके च गतिकारणधर्मास्तिकायसत्त्वेऽपि यदपेक्षणात् तेषां स्थिरता भवति सोऽधर्मास्तिकायः । जीवादीनां स्थित्यात्मकं कार्यं विशिष्टकारणापेक्षं कार्यविशेषत्वात्, क्षित्यादौ शरीरादिवदिति च प्रयोगः । पक्षैकदेशस्य दृष्टान्तत्वे न कापि हानिरिति ध्येयम् । यश्च तत्रापेक्ष्यते सोऽधर्मास्तिकायः । आकाशसिद्धिस्त्वेवम्–द्रव्याणि यत्किञ्चित्पदार्थमधिष्ठाय तिष्ठन्ति साधारत्वादाधेयत्वान्यथानुपपत्तेर्वा इति ॥

धर्माऽधर्माऽऽकाशान् स्वरूपतः परिचाययति–

**धर्माधर्मौ लोकपरिमाणावसङ्ख्येयप्रदेशकौ ॥१६॥**

**आकाशं लोकालोकभेदाद् द्विविधम् । तल्लक्षणं त्विदं–धर्मादीनां वृत्तिर्द्रव्याणां भवति यत्र तत् क्षेत्रम् । तैर्द्रव्यैः सह लोकस्तद्विपरीतं ह्यलोकाख्यम् ॥ प्रदेशा लोकस्याऽसङ्ख्याता, अलोकस्याऽनन्ताः ॥१५॥**

लोकपरिमाणौ–लोकव्यापकौ । शेषं सर्वमुक्तप्रायत्वात् स्पष्टमेवेति ॥

सर्वे चैतेऽजीवास्तिकाया मुख्यवृत्त्या जीवस्यैवोपयोगिन इति जीवाभावे तेषां निष्प्रयोजनत्वापत्तिरतोऽस्ति जीव इति स्वीकार्यमेव, तस्य चोपयोगो लक्षणमित्युक्तं पूर्वमेव, स च जीवः कतिविधः ? इत्याशङ्काऽधुना वर्तते, तत्राह–

**जीवा द्विधा–मुक्ताः संसारस्थाश्च ॥१६॥**

जीवन्ति दशविधप्राणान् धारयन्तीति जीवाः—प्राणिनः । ते च मुक्त-संसारिभेदाद् द्विधेत्यर्थः । मुक्तिः—कृत्स्नकर्मक्षयजनितपरमानन्दरूपा आप्ता यैस्ते मुक्ताः, संसारातीता इति यावत् । संसरन्ति—अपरापरगतिष्वटन्ति जीवा अस्मिन्निति संसारस्तत्र स्थिताः—संसारस्थाः, कर्ममललिप्तत्वेन मुक्त्यभावात्संसारे चङ्क्रमणशीला इत्यर्थः । अस्मिन् भेदद्वये समस्तजन्तुजातस्य सङ्ग्रह इति मन्तव्यम् ॥

मुक्तजीवप्रकारानाह—

**तत्र मुक्ता जिना-ऽजिन-तीर्था-तीर्थ-स्वयंबुद्ध-प्रत्येकबुद्ध-बुद्धबोधित-नपुंसक-स्त्री-पुंलिङ्ग-गृह्य-न्य-स्वलिङ्ग-का-नेकेतिप्ररूपणाभेदात् पञ्चदशधा ॥**

मुक्तत्वावस्थायां जीवाः सर्वेऽप्येकविधा एव, मुक्तिगमनात्पूर्वदशामपेक्ष्य तु तेषां भेदा इत्यवधार्यम् । **जिनेति** । ये तीर्थकरत्वमवाप्य मुक्ताः—सिद्धाः, ते जिनसिद्धाः । ये तीर्थकरत्वं विनैव केवलित्वमवाप्य सिद्धास्तेऽजिनसिद्धाः । ये तीर्थस्थापनानन्तरं सिद्धास्ते तीर्थसिद्धाः । ये तु तीर्थस्थापनात् पूर्वमेव मरुदेवादिवत् सिद्धास्तेऽतीर्थसिद्धाः । ये अन्यप्रदत्तोपदेशनिरपेक्षं स्वयमेव बुद्धाः सिद्धाश्च ते स्वयंबुद्धसिद्धाः । ये तु एकं कारणं—भववैराग्यकारणमवाप्य बोधमाप्ताः सिद्धाश्च ते प्रत्येकबुद्धसिद्धाः । ये तु गुरूपदेशाद् बोधमाप्तवन्तस्ते बुद्धबोधिताः सिद्धाः । ये नपुंसकलिङ्गाः स्त्रीलिङ्गाः पुंलिङ्गा वा दीक्षामादाय सिद्धास्ते तत्तल्लिङ्गसिद्धाः । ये गृहस्थिता एव, न तु दीक्षा मुनिवेषश्चाद्यापि तैरादत्तौ, तेषां गृहस्थित्वे एव केवलज्ञानमुत्पद्यतेऽतस्ते गृहिलिङ्गसिद्धाः । येऽन्यलिङ्गे—जैनेतरलिङ्ग एव सिध्यन्ति ते अन्यलिङ्गसिद्धाः । ये स्वलिङ्गे—जैनवेष एव सिध्यन्ति ते स्वलिङ्गसिद्धाः । एकस्मिन् समये ये द्व्यादयोऽष्टोत्तरशतपर्यन्ताः सिध्यन्ति तेऽनेकसिद्धाः । एकस्मिन् समये एकस्यैव सिद्धौ स एकसिद्ध इति ॥

ननु मुक्तिः का तर्हीति चेदाह—

**मुक्तिः कर्मक्षयः परमानन्दो वा । न त्वात्यन्तिकदुःखध्वंसो दुरितध्वंसो वा, तस्याऽपुरुषार्थत्वात् ॥१७॥**

जीवस्य संसारवासः कर्महेतुकः । यदा कर्म समग्रं क्षीयते तदाऽऽत्मनोऽनन्तगुणात्मकमानन्दात्मकं स्वाभाविकं स्वरूपमाविर्भवति, तदा चाऽऽत्मा देहवाग्मनोभिः कर्मजनितैर्मुक्तो भवति, कर्मणोऽभावादेव । सिद्धिगतौ च तस्य निवासो भवति । तत्र सोऽनन्तज्ञानानन्तदर्शनानन्तसुखानन्तवीर्यात्मकनिजगुणाननन्तकालमनुभवंस्तिष्ठति । सैव मुक्तिः । सैव च सकलानां संसारव्यग्रपुरुषाणामर्थत्वेन पुरुषार्थः । को नाम दुःखसंकीर्णसुखलेशं हित्वा परमसुखात्मकं मोक्षं नार्थयतीति ? ।

**केचित्तु** दुःखस्यात्यन्तिकं ध्वंसमेव, दुःखकारणदुरितध्वंसमेव वा मोक्षं मन्यन्ते । नैष पक्षः समुचितः । यतस्तेषां मते मोक्षस्य ध्वंसरूपता; मोक्षावाप्त्यनन्तरमपि तेषां आत्मविशेषगुणानामुच्छेदो भवति । वस्तुतस्तु आत्मविशेषगुणोच्छेद एव तेषां मोक्षः । एतादृशो ध्वंसात्मक उच्छेदात्मको वा मोक्षो जडमतीनामेव पुरुषार्थत्वेनाभिमतो भवितुमर्हति, न तु जिनप्रवचनसेवावदातमतीनाम् ।

ननु कर्मक्षयो मुक्तिरित्यत्र किं कर्म ? कतिविधं तत् ? इत्यत्राह—

**ज्ञानदर्शनावरणवेद्यमोहनीयायुर्नामगोत्रान्तरायभेदादष्टधा कर्म, कार्मणवर्गणानिष्पन्नं पौद्गलिकम् ॥१८॥**

**ज्ञानेति** । साकारो—विशेषो वा उपयोगो ज्ञानम् । अनाकारः—सामान्यात्मको वा उपयोगो दर्शनम् । 'इदं किञ्चित्' इति दर्शनं, 'इदं द्रव्यं' इति च ज्ञानम् । यद्वा 'इदं द्रव्यं' इति दर्शनं, 'अयं घट' इति तु ज्ञानम् । तत्र ज्ञानं आव्रियते येन कर्मविशेषेण तज्ज्ञानावरणं कर्म । दर्शनस्यावारकं च दर्शनावरणं कर्म । जीवैः सुखं दुःखं च यस्योदयेन वेद्यते तद्वेद्यं कर्म । जीवो मुह्यति—सारासारविवेकमूढो भवति यद्वशात् तत् कर्म मोहनीयम् । यद्वशाज्जीवो देवादिगतिषु तिष्ठति, स्वयोग्यायुषः समाप्तिं विना च नान्यत्र भवे

गन्तुं शक्नोति, तदायुः कर्म । यद्वशाज्जीवो नमति गत्यादीन् पर्यायान् प्रति तन्नामाभिधं कर्म । 'अयमुच्चः, अयं नीचः' इति यद्वशाज्जीवः कीर्त्यते तद् गोत्रं कर्म । अन्तरायकर्म च जीवस्य दानादिलब्धिस्फोरणे विघ्नकारकम् । अष्टविधमप्येतत् क्रमशः पञ्चनवद्व्यष्टाविंशतिचतुर्द्विचत्वारिंशद्द्विपञ्चभेदम् । एतच्च पौद्गलिकमित्याह–**कार्मणेति** । कर्मपुद्गलसमूहः कार्मणवर्गणा । सा चाऽनन्तपुद्गलस्कन्धमयी । असङ्ख्यातप्रदेशात्मन आत्मनः प्रतिप्रदेशमनन्ताः कर्मपुद्गलस्कन्धाः संलग्नाः सन्ति । ते चानन्तप्रदेशा अनन्तरसाश्च । यदा ते कर्मपुद्गलाः सर्वथा क्षीणा आत्मप्रदेशेभ्यश्च परिशटिता भवन्ति तदैवाऽऽत्मनो मुक्तिसम्भव इति ध्येयं, ततश्च कर्मक्षयाय सदोद्यमवता प्राणिमात्रेण भवितव्यं चेति ॥

ननूक्तं कार्मणवर्गणानिष्पन्नमिति, तत्र का वर्गणा ? कतिविधा च सा ? कार्मणवर्गणायाः क्रमश्च कः ? इत्याद्येवम् । अत आह–

**औदारिकवैक्रियाहारकतैजसभाषोच्छ्वासमनःकार्मणाभिधा वर्गणाः ॥१९॥**

*अन्या अपि दृश्या अदृश्याश्च* बह्व्यो वर्गणाः, अत्र तु प्रकृतत्वाद् जीवोपयोगित्वाच्चाष्टैव दर्शिताः । अस्मदादिमनुष्याणां तिरश्चां च शरीरमौदारिकं, तन्निष्पादकपुद्गलसमूह औदारिकवर्गणा । देवनारकाणां शरीरं वैक्रियं, तन्निष्पादकपुद्गलचयो वैक्रियवर्गणा । चतुर्दशपूर्वधराः समुद्भूतविशिष्टप्रयोजनाः आहारकं शरीरं रचयन्ति, तत्कारणं पुद्गलचय आहारकवर्गणा । भुक्तस्याहारस्य पाचनदीपनहेतुस्तैजसशरीरं, तदुत्पादकपुद्गलमयी तैजसवर्गणा । जैनानां मते भाषा, उच्छ्वासः, मनश्च–द्रव्यात्मका एव । ततश्च भाषानिष्पादकद्रव्यमयी भाषावर्गणा । उच्छ्वाससमुत्पादकपुद्गलमयी उच्छ्वासवर्गणा । मनोजनकद्रव्यसमूहश्च मनोवर्गणा । कार्मणवर्गणा तूक्तैव ॥

आसां च वर्गणानां परिमाणमाह–

**प्रत्येकमभव्यानन्तगुणसिद्धानन्तभागकपरमाणुस्कन्धनिष्पन्नाः ॥२०॥**

**उत्तरोत्तरमनन्तगुणाः ॥२१॥**

**प्रत्येकमिति।** एताः सर्वा अपि वर्गणा अभव्येभ्योऽनन्तगुणाः; येषु कालत्रयेऽपि मोक्षगमनयोग्यता नैव सम्भवति तेऽभव्यजीवाः, तेषां या सङ्ख्या, तस्याः अनन्तसङ्ख्यया गुणनानन्तरं या सङ्ख्या जायते, तावत्परिमाणा ये परमाणूनां स्कन्धास्तैर्निष्पन्नाः। पुनः कीदृशैस्तैर्निष्पन्नाः? इत्याह—**सिद्धानन्तेति।** इह मुक्ताः—सिद्धिगतिमापन्ना जीवा अनन्ताः सन्ति। तेषामनन्ता भागाः क्रियन्ते। तन्मध्याच्चैको योऽनन्ततमो भागः सोऽप्यभव्यजीवेभ्योऽनन्तगुण इति सिद्धान्तः। तस्याऽनन्ततमभागस्य याऽनन्ता सङ्ख्या, तावत्परिमाणा ये परमाणुस्कन्धास्तैर्निष्पन्नाः प्रत्येकमेता वर्गणाः। अष्टापि वर्गणा अभव्यजीवसङ्ख्याया अनन्तगुणप्रमाणैः सिद्धजीवसङ्ख्याया अनन्तभागप्रमाणैश्च पुद्गलसमूहैर्निष्पन्ना इत्याशयः॥ परस्परं च ताः क्रियन्माना इत्यत्राह—**उत्तरेति।** अयं भावः—औदारिकवर्गणामपेक्ष्य वैक्रियवर्गणायामनन्तगुणाः स्कन्धाः। वैक्रियापेक्षया आहारकवर्गणायामनन्तगुणाः स्कन्धाः। एवं क्रमशः कार्मणवर्गणापर्यन्तं बोध्यम्। विशेषजिज्ञासुभिः पञ्चमकर्म्मग्रन्थादयोऽवलोकनीयाः।

जीवप्रथमभेदः मुक्तजीवः सविस्तरं प्ररूपितः, अधुना जीवस्य द्वितीयभेदरूपसंसारिजीवस्य स्वरूपं सप्रकारमाह—

**संसारस्था द्विधा-स्थावराश्च त्रसाश्च ॥२२॥**

तिष्ठन्ति इति स्थावराः। सुखदुःखनिमित्तोत्पत्तावपि ये नैव कदाचिदपि स्वस्थानादन्यत्र गमनागमनं कर्तुं समर्थास्ते स्थावरा इत्यर्थः। त्रस्यन्तीति त्रसाः। सुखनिमित्ते दुःखनिमित्ते वोत्पन्ने ये स्वस्थानादन्यत्र गन्तुमागन्तुं वा समर्थास्ते त्रसा इत्यर्थः॥

पुनस्तद्भेदानाह–

**द्वितयेऽपि द्विधा–पर्याप्ताऽपर्याप्तभेदात् ॥**

द्वितयेऽपि–स्थावरास्त्रसाश्चापीत्यर्थः । स्थावराः पर्याप्ता अपर्याप्ताश्च । एवं त्रसा अपि पर्याप्ता अपर्याप्ताश्च । पर्याप्तिस्वरूपं वक्ष्यति । स्वयोग्यपर्याप्तीन् ये समापयन्ति ते पर्याप्ताः । स्वयोग्यपर्याप्तिं चाऽसमाप्यैव ये म्रियन्ते तेऽपर्याप्ताः । अपर्याप्ता द्विधा करणतो लब्धितश्च । यैः स्वीयपर्याप्तयो नाद्यापि समाप्ताः, अवश्यं समापयिष्यन्ते तु, ते करणाऽपर्याप्ताः । ये तु स्वयोग्यपर्याप्तीनसमाप्यैव म्रियन्ते ते लब्ध्यपर्याप्ताः । एवं पर्याप्ता अपि द्वेधा–करणतो लब्धितश्च । स्वकीयाः पर्याप्तयो यैर्नाद्यापि समाप्ताः, अवश्यं समापयिष्यन्ते तु, ते लब्धिपर्याप्ताः । स्वीयपर्याप्तिसमापकाश्च करणपर्याप्ताः ॥

ननु पर्याप्तिः का ? कतिप्रकारा सा ? इत्याशङ्कायामाह–

**पर्याप्तिश्चाहारादिग्रहणपरिणमनादिहेतुरात्मनः शक्तिविशेषः । आहारशरीरेन्द्रियप्राणभाषामनोभेदात् षड्विधा । ताश्चैकाक्षविकलाक्षपञ्चाक्षाणां क्रमाच्चतस्रः पञ्च षट् च ॥२३॥**

**पर्याप्तिश्चेति । आहारादीति ।** आदिपदाच्छरीरेन्द्रियप्राणभाषामनसां परिग्रहः । यया शक्त्या जीव आहारपुद्गलान् गृहीत्वाऽऽहारतया परिणमयति साऽऽहारपर्याप्तिः । यया त्वौदारिकादिशरीरयोग्यवर्गणादलिकान् गृहीत्वा शरीरत्वेन परिणमयति सा शक्तिः शरीरपर्याप्तिः । यया तु शरीरयोग्यवर्गणामध्यतः सारभूतान् पुद्गलानादायेन्द्रियरूपतया परिणमयति सा जीवस्य शक्तिरिन्द्रियपर्याप्तिः । यया श्वासोच्छ्वासवर्गणापुद्गलान् गृहीत्वा श्वासोच्छ्वासतया परिणमय्य मुञ्चति सा प्राणपर्याप्तिः । यया भाषावर्गणादलिकान् यया च मनोवर्गणादलिकानादाय क्रमशो भाषात्वेन मनस्त्वेन च परिणमय्य विसृजति सा क्रमशो भाषापर्याप्तिर्मनःपर्याप्तिश्चेति । षडप्येताः शक्तयो जीवस्यैव । तत्र कस्य जीवस्य कियत्य इत्याशङ्क्याह–**ताश्चेति ।** एकाक्षविकलाक्षादीनां सभेदं स्वरूपं स्वयमेव वक्ष्यति । एकाक्षा एकेन्द्रियास्तेषां चतस्रः आहारशरीरेन्द्रियप्राण-

भेदात् पर्याप्तयः। विकलाक्षा द्वीन्द्रियादयस्तेषां चतस्रस्ता एव, पञ्चमी तु भाषापर्याप्तिरपि। पञ्चाक्षाः पञ्चेन्द्रियास्तेषां सर्वा अपि—षडपि पर्याप्तय इत्यर्थः॥

स्थावरभेदानाह—

**स्थावरा एकेन्द्रियाः। ते च पृथिव्यप्तेजोवायुवनस्पतयः। तत्र वनस्पतयः प्रत्येकाः साधारणाश्च। प्रत्येका बादरा एव। साधारणाः पृथिव्यप्तेजोवायवश्च सूक्ष्मबादरभेदाद् द्विधा॥२४॥**

एकं स्पर्शनात्मकमिन्द्रियमेषां त एकेन्द्रियाः। स्फटिकमणिपाषाणादयः पृथ्वीकायः। जलादिकमप्कायः। वह्न्यादिस्तेजस्कायः। उद्भ्रामकादिर्वायुर्वायुकायः। वृक्षादिर्वनस्पतिकायश्च। प्रत्येका इति। यत्रैकस्मिन् जीवस्यैकं शरीरं ते प्रत्येकाः। **उक्तं च—'एगसरीरे एगो जीवो जेसिं तु ते य पत्तेया' इति।** यत्र त्वेकस्मिन् शरीरेऽनन्ता जीवास्ते साधारणाः। साधारणवनस्पतय इत्यर्थः। **उक्तं च—'जेसिमणंताणं तणू एगा साहारणा ते उ' इति।** चक्षुषा दृश्यते स बादरः। चक्षुषाऽदृश्यश्च सूक्ष्मः। पञ्चविधा अपि सूक्ष्मैकेन्द्रियाः सकललोकव्यापका इति मन्तव्यम्। **'पत्तेयतरुं मुत्तुं पञ्चवि पुढवाइणो सयलंलोए। सुहुमा हवंति नियमा, अंतमुहुत्ताऊ अदिस्सा' इतिवचनात्॥**

त्रसकायं सप्रभेदमाह—

**त्रसा द्वित्रिचतुःपञ्चेन्द्रियत्वेन चतुर्विधाः। द्वीन्द्रियाः कृमिशङ्खाद्याः। त्रीन्द्रिया यूकामत्कुणादयः। चतुरिन्द्रिया दंशमक्षिकादयः। पञ्चेन्द्रिया नारकतिर्यग्मनुष्यदेवाः॥२५॥**

स्पर्शनरसनलक्षणेन्द्रियद्वयोपेता द्वीन्द्रियाः। स्पर्शनरसनघ्राणोपेतास्त्रीन्द्रियाः। स्पर्शनरसनघ्राणचक्षुरन्विताश्चतुरिन्द्रियाः। स्पर्शनरसनघ्राणचक्षुःश्रोत्रसमन्विताश्च पञ्चेन्द्रियाः॥

पञ्चेन्द्रियविस्तरमाह—

**तत्र नारका रत्नशर्करावालुकापङ्कधूमतमस्तमस्तमःप्रभाभेदात् सप्तधा। तिर्यञ्चो जलचरस्थलचरखेचरभेदाच्च त्रिधा। प्रत्येकं तेऽपि सम्मूर्च्छिमा गर्भजाश्च। तत्र गर्भजाः जरायुपोताण्डभवाः। मनुष्याः सम्मूर्च्छिमगर्भजभेदेन द्विविधाः। अत्र गर्भजा जरायुजा एव। देवा भवनपतिव्यन्तरज्योतिष्कवैमानिकभेदाच्चतुर्द्धा। देवनारकगर्भजाः संज्ञिनः। शेषा असंज्ञिनः ॥२६॥**

रत्नप्रभादीनि पृथ्वीनामानि। पृथ्वीनां सप्तत्वात्तन्निवासिनो जीवा नारका अपि सप्तविधाः। जलचरा मत्स्यादयः। स्थलचरा अश्वादयः। खेचराः पक्षिणः। **तत्र गर्भजा इति**। तद्विपरीतास्तु सम्मूर्च्छिमा इत्यवधेयम्। सम्मूर्च्छनं गर्भनिरपेक्षं भवनं संमूर्च्छस्तस्माज्जाताः सम्मूर्च्छिमा इति यावत्। सम्मूर्च्छिमा मनुष्यास्त्वस्मदादीनां वान्तपित्तादिष्वशुचिपदार्थेषु जायन्ते। **देवा इति**। तत्र भवनपतयोऽधोलोके। व्यन्तरास्तिर्यगधोवर्तिनः। ज्योतिष्कास्तिर्यगूर्ध्ववर्तिनः। वैमानिकास्तूर्ध्वलोके। संज्ञिनः—दीर्घकालिक्यादिसंज्ञोपेता इत्यर्थः। शेषाः—सम्मूर्च्छिमा मनुष्यास्तिर्यञ्चश्च। एकेन्द्रियादिचतुरिन्द्रियान्ता अप्यसंज्ञिन इति बोध्यम् ॥

इन्द्रियपञ्चकं तद्विषयपञ्चकं च नामग्राहं दर्शयति—

**स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रमितीन्द्रियम्। तस्य स्पर्शो रसो गन्धो रूपं शब्दश्च गोचरः ॥२७॥**

इन्द्रियमात्रं द्वेधा—द्रव्येन्द्रियभावेन्द्रियभेदात्। तत्र निर्वृत्त्युपकरणे द्रव्येन्द्रियम्। लब्ध्युपयोगौ च भावेन्द्रियमिति ॥

जीवस्वरूपं प्रदर्शयति—

**प्रदेशाश्चैकैकजीवस्य धर्माधर्मलोकाकाशप्रमिताः। अयं च गमनागमनात् सक्रियः शरीरमात्रः स्वसंविदितश्च ॥२८॥**

यावन्तो धर्मास्तिकायस्य, यावन्तो वाऽधर्मास्तिकायस्य, यावन्तो वाऽऽ-

काशास्तिकाये लोकाकाशस्य प्रदेशास्तावन्तः प्रदेशा एकैकस्येत्यर्थः । **गमनेति ।** कर्मपुद्गलग्रहणं तन्मोचनमपि जीवस्य क्रियेति वेद्यम् । **शरीरेति ।** न सर्वमूर्त्त-विभुरित्यर्थः । **स्वेति ।** आत्मनः स्वीयबोधोत्पत्तौ न संयोगी कस्याप्यपेक्षा, स तु स्वयमेव स्वं बुध्यते इत्यर्थः ॥

ननु संवेदनं बहुविधं भवति, तत्र किं यथार्थं किं वाऽयथार्थमिति ज्ञातुं ज्ञाने प्रामाण्यमप्रामाण्यं च मृग्यं, तच्च प्रमाणं विना नैव ज्ञेयं, ततश्च किं प्रमाणमिति वाच्यमत आह—

**स्वपरव्यवसायि संवेदनं प्रमाणम् ॥२९॥**

स्वं—प्रमाणात्मकं ज्ञानं, परं—विषयं च व्यवसाययति—निश्चाययति यत् तत् संवेदनं—ज्ञानं प्रमाणम् । प्रमाणात्मकज्ञानस्यैष स्वभाव एव यत्, तत् स्वं परं च व्यवसाययत्येव । तथा च प्रयोगः—प्रमाणात्मकं ज्ञानं व्यवसायस्वभावं समारोपविरोधित्वाद्, यन्नैवं तन्नैवं घटवदिति । अत्र स्वपरव्यवसायित्वविशिष्ट-संवेदनत्वं प्रमाणस्य लक्षणम् । 'सामान्योपयोगात्मके दर्शनेऽतिप्रसक्तिवारणाय संवेदनत्वम् । स्वपरबोधकत्वं तु संशयादावपीति तद्वारणाय व्यवसायीति । ज्ञानं परोक्षमितिकादिनां मतनिरासाय स्वेति । बाह्योऽर्थो नास्त्येवेतिबाह्यपदार्थाप-लापिनां मतनिराकरणाय परेति । न त्वनधिगतार्थगन्तृत्वादि प्रमाणं स्मृत्यादेर-प्रामाण्यप्रसङ्गादिति । अत्रत्योऽधिकविस्तारो मुक्तावल्यादेरवसेयः ॥

ननु ज्ञाने प्रामाण्याप्रामाण्यनिश्चये सतीदं प्रमाणं, इदं न प्रमाणं, इति निर्णेतुं शक्यते । तत्र किं प्रामाण्यं, किं चाऽप्रामाण्यं, तच्चोभयमपि कथं जायते ज्ञायते चेति वाच्यं, अत्राह—

**प्रमेयाऽव्यभिचारित्वं प्रामाण्यं, तदितरत्त्वप्रामाण्यं; तदुभयमुत्पत्तौ परत एव, ज्ञप्तौ तु स्वतः परतश्च ॥३०॥**

यज्ज्ञानं प्रमेयं न व्यभिचरति तत्प्रमाणम् । यत्तु तद्व्यभिचरति तदप्रमाण-मित्यर्थः । इदमत्र बोध्यं—सर्वमपि प्रमाणमप्रमाणं वा ज्ञानं स्वापेक्षया प्रमाणम-

व्यभिचारि चैव, स्वस्मिन् स्वव्यभिचारासम्भवात् । प्रामाण्याप्रामाण्यव्यवस्था तु बाह्यार्थमपेक्ष्य व्यवस्थिता । बाह्यार्थस्याप्रमाणत्वे ज्ञानमप्यप्रमाणं, तत्प्रमाणत्वे तु ज्ञानमपि प्रमाणमेव । **तदुभयमिति** । प्रामाण्यमप्रामाण्यं चोभयमपि ज्ञाने विषयगतं गुणं दोषं चापेक्ष्यैवोत्पद्यते । प्रामाण्यस्याप्रामाण्यस्य च निश्चयस्तु अभ्यासदशापन्ने ज्ञाने स्वत एव भवति । अनभ्यासदशापन्नज्ञाने तु संवादकबाधकज्ञानापेक्षयैव भवतीति ध्येयम् । विस्तरार्थिना प्रमाणनयतत्त्वालोकोऽवलोकनीय इति ॥

प्रमाणद्वैविध्यं व्युत्पादयति—

**तद् द्विविधं—प्रत्यक्षं च परोक्षं च ॥३१॥**

केषाञ्चिन्मते द्विधा, त्रिधा, चतुर्द्धा, पञ्चधा, षड्ढा वा प्रमाणानि । **तदुक्तम्—**

**चार्वाकोऽध्यक्षमेकं, सुगतकणभुजौ सानुमानं, सशाब्दं**
**तद्द्वैतं पारमर्षः, सहितमुपमया तत्त्रयं चाक्षपादः ।**
**अर्थापत्त्या प्रभाकृद्वदति स निखिलं, मन्यते भाट्ट एतत्—**
**साभावं, द्वे प्रमाणे जिनपतिसमये स्पष्टतोऽस्पष्टतश्च ॥इति ।**

तत्र नैयायिकाश्चत्वारि मन्यन्ते प्रत्यक्षानुमानोपमानशब्दभेदात्, तन्मतं दूषयति—

**न तु प्रत्यक्षानुमानोपमानशब्दभेदाच्चतुर्धा । अनुमानादीनां परोक्षेऽन्तर्भावात् ॥३२॥**

ननु यदि अनुमानादीनि न प्रमाणानि तदा कथं भवान् पश्यति ?, चक्षुषोऽभावात् । न च चक्षुः प्रत्यक्षविषयमतीन्द्रियत्वात् । तथा चाऽनुमानाभावे **'रे रेऽनुमानं यदि न प्रमाणं, चक्षुस्तवास्तीति किमत्र मान'** मिति चेत्, न । नहि वयमनुमानादीनां प्रमाणत्वं सर्वथैवापलपामः । किन्तु तेषां परोक्षप्रमाण एव समावेशकरणात् स्वतन्त्रप्रमाणत्वमेव वयं निषेधामः । एवं न क्वापि क्षतिरिति ॥

प्रत्यक्षप्रमाणलक्षणमाह—

**स्पष्टं प्रत्यक्षम् ॥३३॥**

अनुमानप्रमाणादिपरोक्षप्रमाणापेक्षयाऽऽधिक्येन विशेषप्रतिभासनं स्पष्टत्वम् । स्पष्टं विशदम् । ज्ञानावरणकर्मणो वीर्यान्तरायस्य च कर्मणः क्षयोपशमात् क्षयाद्वा विशदतयाऽऽविर्भूतं यत्तद् ज्ञानं प्रत्यक्षमित्यर्थः ॥

द्वैविध्यं तस्य व्युत्पादयति–

**तद् द्विधा–सांव्यवहारिकं पारमार्थिकं च । सांव्यवहारिकमिन्द्रियापेक्षम् । पारमार्थिकमुत्पत्तावात्ममात्रापेक्षम् ॥३४॥**

सम्यक्–निर्बाधो व्यवहारः–प्रवृत्तिनिवृत्त्यात्मकः संव्यवहारः, स प्रयोजनमस्येति सांव्यवहारिकम् । तच्चाऽपारमार्थिकं, इन्द्रियाद्यपेक्षणात् । अवध्यादिरूपमिन्द्रियाद्यनपेक्षं तु पारमार्थिकं, आत्ममात्रसंनिध्यपेक्षणादिति ॥

लौकिको व्यवहारः सांव्यवहारिकप्रत्यक्षेणैव प्रचलतीति तद्भेदानाह–

**तत्राद्यं द्विविधमिन्द्रियनिबन्धनमनिन्द्रियनिबन्धनं च । तत्राद्यं स्पार्शनरासनघ्राणजचाक्षुषश्रावणभेदात् पञ्चधा । अन्त्यं मानसम् ॥३५॥**

आद्यं–सांव्यवहारिकम् । आद्यं–इन्द्रियनिबन्धनम् । स्पर्शनेन्द्रियजन्यं प्रत्यक्षं स्पार्शनं, रसनेन्द्रियजन्यं रासनं, घ्राणेन्द्रियजन्यं घ्राणजं, चक्षुर्जन्यं चाक्षुषं, श्रवणेन्द्रियजन्यं श्रावणमित्यर्थः । अनिन्द्रियं मनः । तज्जन्यं मानसं प्रत्यक्षमित्यर्थः । यद्यपि सर्वेन्द्रियजन्येषु प्रत्यक्षेषु मनोऽपेक्ष्यत एव, तथापि तत्र तस्य गौणत्वात् तत्तदिन्द्रियाणां प्रधानत्वाच्च प्रधानानुयायी व्यवहार इति ॥

द्विविधमपि सांव्यवहारिकं विभजते पुनश्चतुर्धा–

**तद्द्वयं अवग्रहेहापायधारणाभेदादेकशश्चतुर्धा ॥३६॥**

इन्द्रियनिबन्धनं सांव्यवहारिकं चतुर्भेदं–अवग्रह, ईहा, अपायो, धारणा चेति । एवमनिन्द्रियमपि ॥

तत्र किमेषां स्वरूपमित्याकाङ्क्षायामाह–

**विषयविषयिसन्निपातानन्तरसमुद्भूतसत्तामात्रगोचरदर्शनाज्जातमाद्यमवान्तरसामान्याकारविशिष्टवस्तुग्रहणमवग्रहः ॥**

विषयो घटपटादि द्रव्यं, विषयि–इन्द्रियं चक्षुरादि, तयोर्यः सन्निपातः–सम्बन्धः, स प्रथमं भवति। तदनन्तरं समुद्भूतं सत्तामात्रगोचरं यद् दर्शनं, ततो जातं, अवान्तरैः सत्ताऽपेक्षयाऽपररूपैर्घटत्वादिभिः सामान्यैर्विशिष्टं यद्वस्तु, तस्य ग्रहणं–बोधोऽवग्रहः। अवग्रहश्च व्यञ्जनावग्रह–अर्थावग्रहभेदाद् द्वेधा। तत्र विषयविषयिसम्बन्धात्मको व्यञ्जनावग्रहः। पदार्थस्याऽव्यक्तं भानं चाऽर्थावग्रहः। प्रायो योऽन्यैर्निर्विकल्पकप्रत्यक्षत्वेन स्वीक्रियते। अत्र बोधप्रक्रियायां प्रथमं विषयविषयिसन्निपातात्मको व्यञ्जनावग्रहः। ततोऽनाकारोपयोगात्मकं दर्शनं सन्मात्रगोचरम्। ततश्च घटत्वादिघटितघटादिपदार्थस्याऽस्पष्टभानात्मकोऽर्थावग्रह इति क्रमः। चक्षुर्मनसोरप्राप्यकारित्वाच्छेषाणामेव च प्राप्यकारित्वात् ॥ यद्यपि व्यञ्जनावग्रहस्य सम्बन्धात्मकतया न ज्ञानत्वं, तथापि अर्थावग्रहरूपज्ञानोपादानत्वेन तत्रापि ज्ञानत्वं, कारणे कार्योपचारादिति ॥ अर्थावग्रहाकारश्च 'इदं किञ्चित्' इति रूपः, 'इदं द्रव्यं' इत्यादिरूपश्चेति ध्येयम् ॥

ईहां निरूपयति–

**अवगृहीतविशेषाकाङ्क्षणमीहा ॥**

अवगृहीतस्य–अवग्रहेण विषयीकृतस्य घटादिपदार्थस्याऽयं किंरूपः ? मृद्घटः सुवर्णघटो वा ? यद्वा इदं किं ? घटः पटो वा ? इत्यादिरूपेणाकाङ्क्षणं–न तु सन्देहः–ईहेति। अनेन घटेनैव भवितव्यं, अनेन सौवर्णेनैव भवितव्यं, इत्यादिरूपा वस्तुविशेषनिर्णयपरा ईहा इति यावत् ॥

अपायं प्ररूपयति–

**ईहितविशेषनिर्णयोऽवायः ॥**

ईहितः–ईहाविचारविषयो यो विशेषः–पदार्थविशेषः, तस्यैव निर्णयोऽवायः। यथा 'अयं घटः' 'अयं सौवर्ण एव घटः' इत्यादि ॥

धारणां दर्शयति—

**स एव दृढतमावस्थापन्नो धारणा ॥३७॥**

सोऽपाय एव निश्चितवस्तुविषयेऽत्यन्तादरवतः प्रमातुश्चित्ते कञ्चित् कालं स्थिरीभवन् सन् 'धारणा' इत्युच्यते। यन्माहात्म्यात् प्रमातुश्चित्तं तत्पदार्थविषयकसंस्कारवासितं कालान्तरे च तत्पदार्थस्मरणसमर्थं भवति ॥

अथ पारमार्थिकप्रत्यक्षप्रकारावाह—

**पारमार्थिकं विकलं सकलं च ॥३८॥**

विकलमपूर्णं, सकलं च पूर्णम् ॥

तत्र विकलभेदावाह—

**विकलमवधिमनःपर्यायभेदाद् द्विधा। अवधिज्ञानावरणकर्मक्षयोपशमसमुद्भवं भवगुणप्रत्ययं रूपिविषयकमाद्यम्। द्वितीयं संयमविशुद्धितदावरणक्षयोपशमसमुद्भवं मनोविषयकम् ॥३९॥**

**विकलमिति।** एकमवधिज्ञानमपरं च मनःपर्यायज्ञानमिति भावः। ज्ञानावरणं कर्म पञ्चभेदम्। मतिज्ञानावरण—श्रुतज्ञानावरणा—ऽवधिज्ञानावरण—मनःपर्यायज्ञानावरण—केवलज्ञानावरणभेदात्। तन्मध्येऽवधिज्ञानावरणस्य यदा क्षयोपशमो भवति तदाऽवधिज्ञानमुत्पद्यते। क्षयोपशमश्च उदीर्णस्य—उदितस्य तत्कर्मणः क्षयः—नाशः, अनुदितस्य चोपशमः—उदयाभावः। तच्चावधिज्ञानं नारकदेवानां भवप्रत्ययम्। तेषां भव एव तज्ज्ञानोत्पत्तौ कारणम्। शेषाणां तु तत्संयमादिगुणप्रत्ययिकम्। तस्य च रूपी—मूर्त्तः पदार्थो विषयः। **द्वितीयमिति।** मनःपर्यायज्ञानमित्यर्थः। तच्च संयमस्य—चारित्रस्य विशुद्धिर्निबन्धनं यस्य तत्तथा। पुनश्च तत् स्वावरणकर्मक्षयोपशमादाविर्भूतम्। तस्य च सार्धतृतीयद्वीपगतसंज्ञिपञ्चेन्द्रियाणां मनोद्रव्याणि विषय इति ॥

सकलमाह—

**सकलं समस्तावरणक्षयापेक्षं निखिलभावसाक्षात्कारिस्वरूपं केवलज्ञानम् ॥४०॥**

समग्रवस्तुविषयकत्वात्सकलम्। तच्च समस्तानां आवरणानां—ज्ञानावरणानां दर्शनावरणानां च; उपलक्षणं चैतत्, ततश्च मोहनीयान्तराययोरपि क्षयमपेक्षते। उक्तकर्मचतुष्टयक्षयसमनन्तरमेव केवलज्ञानं भवतीति भावः। **निखिलेति**। निखिला ये भावा द्रव्यगुणपर्यायाः, लोकोऽलोकश्च, तान् साक्षात्कर्तुं शीलमस्येति साक्षात्कारिस्वभावं तदिति। तच्चानन्तमप्रतिहतमचलं चेति॥

केचिन्नैयायिकादय इन्द्रियजन्यं ज्ञानं प्रत्यक्षं, तत्रेन्द्रियं करणं, इन्द्रियविषयसन्निकर्षश्च व्यापार इति मन्यन्ते, तत् खण्डयितुं तन्मतमुपन्यस्यति—

**एतेन "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षं, तन्निर्विकल्पकं सविकल्पकं चेति। पुनस्तद् घ्राणजादिभेदेन षड्विधं। सन्निकर्षश्च द्रव्यप्रत्यक्षे संयोगः। द्रव्यसमवेतगुणकर्मजातिप्रत्यक्षे संयुक्तसमवायः। द्रव्यसमवेतसमवेतजातिप्रत्यक्षे संयुक्तसमवेतसमवायः। शब्दप्रत्यक्षे समवायः। शब्दसमवेतप्रत्यक्षे समवेतसमवायः। अभावप्रत्यक्षे विशेषणविशेष्यभाव" इति निरस्तम्। सन्निकर्षस्यैवाऽप्रामाणिकत्वात्॥४१॥**

**एतेनेति**। निरस्तमित्यनेनाऽन्वयः। **इन्द्रियार्थेति**। **तथा चोक्तं तन्मते—"इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षं"; "इन्द्रियं करणं मतम्। विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः" इत्यादि**। तन्मते—इन्द्रियस्य विषयेण समं यदा सम्बन्धः सन्निकर्षात्मको भवति, तदा इन्द्रियेण करणभूतेन विषयेन्द्रियसन्निकर्षरूपव्यापारद्वारा यज्ज्ञानं जन्यते तत्प्रत्यक्षम्। तच्च घटघटत्वयोर्वैशिष्ट्याऽनवगाहि निर्विकल्पकम्। वैशिष्ट्यावगाहि तु सविकल्पकम्। निर्विकल्पकज्ञाने इन्द्रियमेव कारणम्। इन्द्रियार्थसन्निकर्षस्तु सविकल्पके। **घ्राणजादीति**। घ्राणजं रासनं स्पार्शनं चाक्षुषं श्रौत्रं मानसं चेत्यर्थः। सन्निकर्षोऽपि षड्विधः। तमेवाह—**सन्निकर्षश्चेति**। तेषाम्मते सर्वेषामेवेन्द्रियाणां प्राप्यकारित्वेनेन्द्रियविषयसम्बन्धोऽवश्यमेष्टव्यः। स च क्वचित्साक्षात्संयोगात्मकः, क्वचिच्च परम्परयेति न किञ्चित्। तत्र पृथ्व्यादिद्रव्यस्य प्रत्यक्षे जननीये संयोगः सन्निकर्षः, इन्द्रियस्यापि द्रव्यत्वात्तस्य

विषयीभूतद्रव्येण संयोगस्य शक्यत्वात् । द्रव्ययोरेव संयोग इति नियमाच्चेन्द्रियस्य विषयगतगुणादिप्रत्यक्षे न संयोगः, किन्तु तत्रेन्द्रियसंयुक्तसमवायः; इन्द्रियसंयुक्तं द्रव्यं, तत्समवेतो गुणादिरिति कृत्वा । एवमेव इन्द्रियसंयुक्तद्रव्यसमवेतरूपादिगुणादिः, तत्र समवेता रूपत्वादिजातिस्तत्प्रत्यक्षे इन्द्रियसंयुक्तसमवेतसमवायः सन्निकर्षः । एते त्रयोऽपि चाक्षुष–स्पार्शनप्रत्यक्षे कारणम् । द्वितीय–तृतीयौ तु घ्राणजे रासने च प्रत्यक्षे हेतुः । शब्दस्य श्रोत्रावच्छिन्ने आकाशे समवेतत्वाच्छब्दश्रावणप्रत्यक्षे श्रोत्रसमवायः सन्निकर्षः । शब्दसमवेतशब्दत्वप्रत्यक्षे च श्रोत्रसमवेतसमवायः सन्निकर्षः । **अभावप्रत्यक्ष-इति** । 'घटाभाववद्भूतल' मित्यत्र भूतलं विशेष्यं, तत्र घटाभावो विशेषणमिति विशेषणतैव सन्निकर्षोऽभावप्रत्यक्षजनकः । एकः पुनः सप्तमश्चतुष्टयसन्निकर्षोऽप्यस्ति । **तदुक्तं केशवमिश्रेण–"घटगतपरिमाणादिग्रहे चतुष्टयसन्निकर्षोऽप्यधिकं कारणमिष्यते । सत्यपि संयुक्तसमवाये तदभावे दूरे परिणामाद्यग्रहात् । चतुष्टयसन्निकर्षो यथा–इन्द्रियावयवैरर्थावयविनां, इन्द्रियावयविनाऽर्थावयवानां, इन्द्रियावयवैरर्थावयवानां, अर्थावयविनामिन्द्रियावयविनां सन्निकर्ष इति"** ॥

तदेतदखिलमालजालं वृथैवेत्यभिप्रायेणाह–**सन्निकर्षस्यैवाऽप्रामाणिकत्वादिति** । तस्याऽज्ञानतया जडत्वात् । न हि ज्ञानस्य करणं व्यापारो वा कदाचिद् जडत्वेन कुत्रापि दृष्टौ । ज्ञानस्य हि करणं सर्वदा चैतन्यमेव, व्यापारोऽपि चैतन्यरूप एव भवितुमर्हति । भवता च ज्ञानस्य करणमपीन्द्रियं जडं स्वीक्रियते, व्यापारोऽपि सन्निकर्षात्मको जड एवाऽभिप्रीयते । तत्कथं प्रमाणपदवीमारुहेदेतत ? । **तदुक्तं प्रमाणनयतत्त्वालोके–"न वै सन्निकर्षादेरज्ञानस्य प्रामाण्यमुपपन्नं, तस्याऽर्थान्तरस्येव स्वार्थव्यवसितौ साधकतमत्वानुपपत्तेः" इति** । यदि च जडस्यापि तस्य करणत्वं व्यापारत्वं च, तदा घटादिपदार्थस्यापि कथं न तत्त्वेत्यलं प्रसङ्गेनेति ॥

**इति श्री जैनतर्कसङ्ग्रहे द्रव्यखण्डे प्रत्यक्षखण्डः ॥**

## अथ द्रव्यखण्डे परोक्षखण्डः ॥

लक्षितं प्रत्यक्षप्रमाणमथ परोक्षं प्रपञ्चयति—

**अस्पष्टं परोक्षम् ॥४२॥**

**स्मरणप्रत्यभिज्ञानतर्कानुमानागमभेदतस्तत्पञ्चप्रकारम् ॥४३॥**

प्रत्यक्षगतस्पष्टत्वविरोधि अस्पष्टत्वं, तद्वत् प्रमाणं परोक्षम्। ज्ञानावरणादि-कर्मणां तथाविधक्षयोपशमान्मन्दमविशदं वाऽऽविर्भूतं ज्ञानमित्यर्थः। नैयायिकादीनां मते स्मृतिः प्रत्यभिज्ञानं तर्कश्च न स्वतन्त्रप्रमाणानि, अस्मन्मते तु तेषां स्वतन्त्रप्रमाणतेति बोध्यम् ॥

स्मरणप्रमाणस्वरूपमाह—

**तत्र संस्कारप्रबोधसम्भूतमनुभूतार्थविषयं तदित्याकारं संवेदनं स्मरणं, यथा तत्तीर्थंकरबिम्बमिति ॥४४॥**

**संस्कारेति।** अनुभवजनितसंस्कारस्य यः प्रबोधः—उद्बोधस्तेन सम्भूतं उत्पन्नं। स्मरणं चानुभवेन विषयीकृतस्यैव भवति इत्यत आह—**अनुभूतार्थ-विषयम्। यथेति।** तत्—पूर्वकाले दृष्टं यत्, तदिदं तीर्थंकरबिम्बमस्तीति। येन पूर्वं तीर्थंकरबिम्बं दृष्टं अस्ति; न केवलं दृष्टमेव, अपि तु स्मृतं, प्रत्य-भिज्ञातं, वितर्कितं, अनुमितं, श्रुतं वाऽपि, स पश्चात्काले कदाचित् तद्बिम्बं पुनः पश्यति, तदा भवति तस्य चित्ते स्मरणं पूर्वानुभवस्य 'तत्तीर्थंकरबिम्ब'-मितिस्वरूपमिति। **केचित्तु,** स्मृतेरनुभवसव्यपेक्षत्वात्, अनुभवविषय—विषय-कत्वाच्च न सा प्रमाणमिति **वदन्ति।** तन्न, स्वोत्पत्तौ स्मृतेः संस्कारद्वाराऽनुभव-सापेक्षत्वेऽपि स्वविषयपरिच्छेदे तस्याः स्वतन्त्रत्वादिति। अन्यथा अनुमानमप्यनु-भूतविषयविषयकत्वेनाऽप्रमाणमापद्येतेत्यादिविस्तरस्तु **तर्कभाषादितोऽवसेयः ॥**

प्रत्यभिज्ञानं प्रमाणयति—

**अनुभवस्मृतिहेतुकं सङ्कलनात्मकं ज्ञानं प्रत्यभिज्ञानं, यथा गोसदृशो गवयः, स एवायं जिनदत्त इत्यादि ॥४५॥**

अनुभवः प्रमाणजनितं ज्ञानं, स्मृतिरुपर्युक्ता, ते हेतुर्यस्य तत्। सङ्कलनं प्रस्तुतपदार्थस्य विवक्षितधर्मान्विततया भानं, तदात्मा यस्य तत् सङ्कलनात्मकं। तस्य च गोत्वघटत्वादिकं तिर्यक्सामान्यं मृत्स्नादिरूपमूर्ध्वतासामान्यं च विषयः। एतच्च सामान्यद्वयं सदृशपरिणामबोधजनकं। एवं विसदृशपरिणामादिर्धर्मसमूहोऽप्यस्यैव गोचरः। **यथा गोसदृश इति। अन्येषां** मते गोसदृशो गवय इति प्रतीतिविषयकमुपमानं स्वतन्त्रं प्रमाणं, तन्न समीचीनं; तथा सति 'गोविसदृशोऽश्व' इति प्रतीतिनियामकमन्यदपि प्रमाणमेष्टव्यं स्यात्। **यद्यप्यनुयोगद्वारेषु** उपमानस्यैव प्रमाणता स्वीकृता, तथाप्यत्र प्रत्यभिज्ञान एव तस्य समावेशनान्न विरोधः ॥

तर्कप्रमाणं निरूपयति—

**उपलम्भानुपलम्भसम्भवं त्रिकालीकलितसाध्यसाधनसम्बन्धाद्यालम्बनं इदमस्मिन् सत्येव भवतीत्याद्याकारं संवेदनमूहापरनामा तर्कः। यथा यावान् कश्चिद् धूमः स सर्वो वह्नौ सत्येव भवतीति तस्मिन्नसत्यसौ न भवत्येवेति ॥४६॥**

उपलम्भः प्रमाणेन ग्रहणं, अनुपलम्भोऽग्रहणं, ताभ्यां सम्भवो यस्य तत् तथा। अन्वयव्यतिरेकाभ्यामुद्भूतमिति यावत्। **त्रिकालीति।** अतीतानागतवर्तमानकालविषयो यः साध्यसाधनयोः सम्बन्धः—अविनाभावात्मकः, तदादि आलम्बनं—विषयो यस्य तत्। अयमत्राशयः—यस्मिन् काले यस्मिन् देशे च धूमः स वह्नेरविनाभावी। ततश्च व्याप्तिनिर्णयेऽयं तर्क उपयोगीति सिद्धम् ॥

अनुमानप्रमाणमाह—

**अनुमानं द्विधा—स्वार्थं परार्थं च। तत्र हेतुग्रहणसम्बन्धस्मरणकारणकं साध्यविज्ञानं स्वार्थम्। तथा हि—यः पूर्वं भूयः सहचारदर्शना-**

**दिना यत्र यत्र धूमस्तत्र तत्राग्निरिति महानसादौ व्याप्तिं गृहीतवान्, स कदाचित् पर्वतसमीपं गतः पर्वते धूमं पश्यन् व्याप्तिं स्मरति–यावान् कश्चिद् धूमः स सर्वो वह्नौ सत्येव भवतीति तदनन्तरं पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते। तदेतत्स्वार्थानुमानम्। न तु मध्ये वह्निव्याप्यधूमवान् अयं पर्वत इतिज्ञानात्मकपरामर्शस्यावश्यकत्वम् ॥४७॥**

स्वार्थानुमानं स्वानुमितिहेतुः। परार्थं तु परानुमितिकारणम्। **हेत्विति।** हेतुः–साध्यगमकः, तस्य ग्रहणं–साध्यधर्मिणि निश्चयः 'पर्वतो धूमवान्' इत्याद्याकारः। तदनन्तरं च सम्बन्धस्य–हेतुसाध्ययोर्व्याप्तेः स्मरणं भवति 'यत्र धूमस्तत्र वह्नि'रित्याद्याकारं। ततोऽनुमितिः 'पर्वतो वह्निमान्' इत्याकारा। ततश्चेदं फलितं–हेतुग्रहणं सम्बन्धस्मरणं च कारणे यस्य साध्यविज्ञानस्य तत् स्वार्थानुमानमिति। व्याप्तिस्मरणकारणभूतमनुभवं प्रदर्श्य हेतुग्रहणव्याप्तिस्मरणानुमितीनां क्रमं स्पष्टं प्रदर्शयति–**तथा हीत्यादिना** ॥

यौगास्तु–अनुमितौ व्याप्तिज्ञानं करणं, पक्षधर्मताज्ञानं सहकारि, लिङ्गपरामर्शश्च विशिष्टवैशिष्ट्यावगाहिज्ञानात्मको व्यापारः, तज्जनितं ज्ञानं चानुमितिरिति मन्यन्ते। तन्मतमयुक्तमित्यतस्तत्खण्डयति–

**एतेन परामर्शजन्यज्ञानमनुमितिः, लिङ्गपरामर्शोऽनुमानं, व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः, व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मत्वमित्यपास्तम् ॥४८॥**

इदमत्र रहस्यम्–ननु हेतुग्रहणमेव पक्षधर्मता, तदर्थं च कोऽयमाडम्बरः ?। किञ्च परामर्शं विनापि व्याप्तिस्मरणमेव साध्यसाधनायाऽलं, ततश्च कथमयमाडम्बरोऽपि नानुचितः ? ॥

हेतुलक्षणं हेतुभेदांश्चाह–

**निश्चितान्यथानुपपत्त्येकलक्षणो हेतुः। स द्विधा–उपलब्ध्यनुपलब्धिभ्यां भिद्यमानत्वात्। तत्रोपलब्धिर्द्विधा–अविरुद्धोपलब्धिर्विरुद्धोपल-**

**ब्धिश्च । यथा अस्त्यत्र गिरिनिकुञ्जे धनञ्जयो धूमसमुपलम्भादिति । न विद्यतेऽस्य क्रोधाद्युपशान्तिर्वदनविकारादेरिति च । अनुपलब्धिर्द्विधा-अविरुद्धानुपलब्धिर्विरुद्धानुपलब्धिश्च । यथा नास्त्यत्र भूतले कुम्भः, उपलब्धिलक्षणप्राप्तस्य तत्स्वभावस्याऽनुपलम्भात्, वस्तुजातमनेकान्तात्मकमेकान्तस्वभावानुपलम्भादिति च ॥४९॥**

अन्यथा–हेतुपदार्थस्य साध्यं विना याऽनुपपत्तिः साऽन्यथानुपपत्तिः, निश्चिता–असन्दिग्धा अन्यथानुपपत्तिर्निश्चितान्यथानुपपत्तिः । सैवैकं लक्षणं यस्य स निश्चितान्यथानुपपत्त्येकलक्षणो हेतुः । अविरुद्धस्य–साध्याऽविरोधिन उपलब्धिरविरुद्धोपलब्धिः । स च विधिसाधको व्याप्य–कार्य–कारण–पूर्वचरो–त्तरचर–सहचरहेतुभेदात् षोढा । **अस्त्यत्रेति** । पर्वतो वह्निमान् धूमादिति दृष्टान्त इत्यर्थः । अत्र साध्यं वह्निः, तदविरुद्धस्य धूमस्य गिरावुपलब्धिरस्तीति वह्निः सिध्यत्यतो धूमोऽविरुद्धोपलब्धिनामा हेतुरत्र, स चाऽविरुद्धव्याप्योपलब्ध्यात्मकः । विरुद्धस्य–साध्याद् विरोधिन उपलब्धिर्विरुद्धोपलब्धिः । स च निषेधात्मकसाध्यसाधकः सप्तधा । तथाहि–निषेध्यस्वभावविरुद्धोपलब्धि-र्निषेध्यविरुद्धव्याप्योपलब्धिर्निषेध्यविरुद्धकार्योपलब्धिर्निषेध्यविरुद्धकारणोपलब्धि–र्निषेध्यविरुद्धपूर्वचरोपलब्धिर्निषेध्यविरुद्धोत्तरचरोपलब्धिर्निषेध्यविरुद्धसहचरोपलब्धिश्चेति । एतेषां दृष्टान्ताः अन्येऽपि हेतुभेदाश्च **तर्कभाषादितो-ऽवसेयाः** । **न विद्यत इति** । अत्र निषेध्यः क्रोधोपशमस्तद्विरुद्धस्य कार्यस्य वदनविकारात्मकस्योपलब्धेरिति हेतुः । तेन च क्रोधोपशमाभावः साध्यः । **अनुपलब्धिरपीति** । पूर्वदर्शिताऽविरुद्धोपलब्धि–विरुद्धोपलब्धिरूपहेतुद्वयं विधिरूपम् । एतच्चाऽविरुद्धानुपलब्धि–विरुद्धानुपलब्धिरूपं हेतुद्वयं प्रतिषेधरूपम् । तत्राऽविरुद्धानुपलब्धिर्विधिसाधकः, इतरश्च प्रतिषेधसाधकः । आद्यः सप्तधा–प्रतिषेध्याऽविरुद्धस्वभाव–व्यापक–कार्य–कारण–पूर्वचर–उत्तरचर–सहचरा–ऽनुपलब्धिभेदात् । द्वितीयश्च पञ्चभेदः–विधेयविरुद्धकार्य–कारण–स्वभाव–व्यापक–

सहचरा–ऽनुपलब्धिभेदात् । **नास्त्यत्रेति ।** प्रतिषेध्याऽविरुद्धस्वभावोऽनुप-लब्धिरूपहेतोरुदाहरणमिदम् । प्रतिषेध्यो घटः, तदविरुद्धः स्वभाव उप-लब्धिः–साक्षात्कारः, तस्या अनुपलब्धेर्निश्चीयते नास्ति घट इति । **वस्तुजात-मिति ।** विधेयविरुद्धस्वभावाऽनुपलब्धिरयं हेतुः । विधेयं वस्तुजातस्याऽने-कान्तात्मकत्वं तद्विरुद्धः स्वभाव एकान्तात्मकत्वं, तस्याऽनुपलब्धेरनेकान्तात्म-कत्वं निर्णीयत इति ॥

ननूक्तं भवता 'हेतुग्रहणसम्बन्धस्मरणकारणकं साध्यविज्ञानं स्वार्थं' तत्र किमिदं नाम साध्यं ? इत्यत्राह–

**अप्रतीतमनिराकृतमभीप्सितं साध्यम् ॥५०॥**

अप्रतीतं प्रमाणान्तरेणाऽनिश्चितं, तच्च शङ्कितं वा स्यात्, विपरीतं वा स्यात्, अनध्यवसितं वा स्यात् । अप्रतीतं सदपि केनापि प्रमाणेन बाधितं चेन्न साध्यं भवितुमर्हतीत्यत आह–**अनिराकृतं इति ।** अप्रतीतमपि अनिराकृत-मपि चाऽभीप्सां साधयितुमिच्छां विना नैव साध्यतां भजतीत्याह-**अभीप्सितं**–सिसाधयिषितं, तच्च प्रतिज्ञायां शब्दत उक्तमनुक्तं चापि साध्यत्वमर्हतीति विभावनीयम् । पर्वते वह्निः साध्यं धूमेन । न च तत्र वह्निरन्येन केनचिदपि प्रमा-णेन निर्णीतः, अतः शङ्कितः सः । नापि तत्र वह्निः केनापि प्रमाणेन निरस्तो निषिद्धो वेत्यनिराकृतोऽपि सः । स चानुमातुः साधयितुं इष्टोऽप्यस्तीत्यभीप्सि-तोऽपि स इति भवति पर्वते धूमेन वह्निः साध्यमिति ॥

अभिहितं साङ्गं स्वार्थानुमानं, अथ परार्थानुमानस्वरूपमाह–

**पक्षहेतुवचनात्मकं परार्थानुमानम् । साध्यविशिष्टो धर्मी पक्षः । हेतुप्रयोगस्तथोपपत्त्यन्यथानुपपत्तिभ्यां द्विप्रकारः । यथा कृशानुमानयं पाकप्रदेशः सत्येव कृशानुमत्त्वे धूमवत्त्वस्योपपत्तेरसत्यनुपपत्तेर्वा । क्वचित् पञ्चावयववाक्यप्रयोगोऽपि ॥५१॥**

परप्रतिपत्तये 'पर्वतो वह्निमान् धूमादि'त्याद्यात्मको यो वचनप्रयोगः स परार्थानुमानम् । साध्यस्याऽस्मदाद्यपेक्षया साध्यमानत्वेपि वस्तुतः धर्मिणि तत्सत्त्वमेवेत्यभिप्रायेणाह—**साध्यविशिष्टो धर्मी पक्ष इति** । तथोपपत्तिरप्यन्यथानुपपत्तेरेव प्रकारः । यस्य यस्मिन् सत्युपपत्तिस्तस्यैव तदभावेऽनुपपत्तेः । अत एव द्वयोरप्येकमेव दृष्टान्तमुक्तम् ॥ पञ्चावयववाक्यं नानिष्टं, तदेकान्तस्त्वनिष्ट इति प्रदर्शनार्थं पञ्चावयववाक्यस्वीकारस्य निराकरिष्यमाणत्वेऽपि तत्स्वीकारं कादाचित्कमाह-**क्वचिदिति** । पञ्चावयवाकारस्त्वनन्तरमेव दर्शयिष्यते ॥

परेषां मतमस्माकं नानिष्टं किन्तु तेषां स्वमताग्रहस्तु नेष्ट एवेति प्रदर्शयितुं परेषां स्वमताग्रहं तुच्छतया प्रकटयितुमाह—

**परेषां तु, पञ्चावयववाक्यमेव परार्थानुमानम् । तथाहि, पर्वतो वह्निमान्, धूमवत्त्वात्, यो यो धूमवान् स स वह्निमान्, यथा महानसं, तथा चायं, तस्मात्तथा । प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः । हेतुस्त्रिविधः—अन्वयव्यतिरेकी केवलान्वयी केवलव्यतिरेकी च । तत्रान्वयेन व्यतिरेकेण च व्याप्तिमान् आद्यः । यथा वह्नौ साध्ये धूमवत्त्वम् । अन्वयमात्रव्याप्तिको द्वितीयो यथा घटोऽभिधेयः प्रमेयत्वात् । व्यतिरेकमात्रव्याप्तिकस्तृतीयो यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादिति ॥५२॥**

परेषां—नैयायिकानाम् । पञ्चावयववाक्यमेव—नान्यथेति तेषामाग्रहः । 'पर्वतो वह्निमानि'ति प्रतिज्ञा । धूमवत्त्वादिति हेतुः । यो यो धूमवान् स स वह्निमान् यथा महानसमित्युदाहरणम् । तथा चायं—धूमवाँश्चायं इत्युपनयः । तस्मात्तथा—तस्मात्—धूमवत्त्वात्, तथा—वह्निमानिति निगमनम् । **अन्वयव्यतिरेकीति** । वह्निसत्त्वे धूमसत्त्वं अन्वयः, वह्न्यभावे धूमाभावो व्यतिरेकः । तद्वांश्च धूम इति सोऽन्वयव्यतिरेकी । **अन्वयमात्रेति** । केवलान्वयित्वमत्यन्ताभावाऽप्रतियोगित्वम् । अभिधेयत्वप्रमेयत्वयोः सर्वत्र सत्त्वान्नास्त्यत्यन्ताभाव इति भवति प्रमेयत्वं

केवलान्वयि । इदं पुनर्ध्येयम्-नैयायिकनये प्रमेयत्वमिव वाच्यत्वमपि केवलान्वयितया प्रतिपाद्यते । यत्र यत्र पदार्थत्वं तत्र तत्र वाच्यत्वमिति तेषां मतिः । एतच्चिन्त्यम् । यतो जैननये त्वनन्तानां भावानां पदार्थत्वे सत्यपि न तत्र वाच्यत्वं, अनभिलाप्यत्वात् । "पन्नवणिज्जा भावा, अणंतभागो उ अणभिलप्पाणं ।
पन्नवणिज्जाणं पुण, अणंतभागो सुयनिबद्धो ॥" इति-शास्त्रवचनानुरोधात् तत्र न वाच्यत्वं, अत एव च न तस्य केवलान्वयित्वमिति ॥

**व्यतिरेकेति ।** यत्र हेत्वभावः साध्याभावस्य व्यापको भवति तत्र व्यतिरेकव्याप्तिः । यथा 'पृथ्वी इतरभेदवती गन्धवत्त्वात्' । अत्र व्याप्तिः—'यत्र गन्धाभावः तत्रेतरभेदाभाव' इत्याकारा । हेत्वभावोऽत्र व्यापकः साध्याभावस्यातोऽत्र भवति गन्धवत्त्वं केवलव्यतिरेकि ॥

हेतुवदाभासन्ते ये ते हेत्वाभासा दुष्टहेतवः । तान्निरूपयति—

**असिद्धविरुद्धानैकान्तिकास्त्रयो हेत्वाभासाः ॥५३॥**

**यस्याऽन्यथानुपपत्तिः प्रमाणेन न प्रतीयते सोऽसिद्धः । स द्विविधः, उभयासिद्धोऽन्यतरासिद्धश्च । आद्यः—शब्दः परिणामी चाक्षुषत्वात् । द्वितीयः—तरवोऽचेतना मरणरहितत्वात् ॥५४॥**

**त्रय इति ।** त्रय एव हेत्वाभासा नाधिका, अधिकानामत्रैव समावेशात् । असिद्धलक्षणमाह—**यस्येति ।** यस्य—असिद्धिदोषग्रस्तस्य हेतोः, अन्यथानुपपत्तिः—हेतोरन्यथानुपपत्त्येकलक्षणत्वेनोक्तत्वात्सा, प्रमाणेन—प्रत्यक्षादिना, न प्रतीयते, अन्यथानुपपत्तिर्यस्य प्रमाणबाधितैव न त्वबाधितेत्यर्थः, सोऽसिद्ध इति । असिद्धशब्दश्च सापेक्षोऽतः काञ्चिद्व्यक्तिमपेक्षते । तथा च कस्यापेक्षया हेतुरसिद्ध इत्याकाङ्क्षायामुच्यते—**उभयासिद्ध इति ।** उभयस्य वादिनः प्रतिवादिनश्चोभयस्यापि मतेऽसिद्धो—न सिद्ध उभयासिद्धः । वादिप्रतिवाद्यन्यतरस्य मतेन चाऽसिद्धोऽन्यतरासिद्धः । क्रमशो दृष्टान्तयति—**आद्य इति । शब्द इति ।** अत्र वादिनो जैनस्य मते, प्रतिवादिनश्च नैयायिकादेर्मते शब्दस्य चाक्षु-

षत्वमसिद्धमेव, शब्दस्य श्रावणत्वस्य प्रमाणप्रसिद्धत्वात् । तथा चात्र चाक्षुषत्वस्य हेतोरन्यथानुपपत्तिः प्रमाणेन नैव सिध्यतीति बोध्यम् । **तरव इति** । अयं चान्यतरासिद्धः, यतो मरणरहितत्वं तरूणां जैनस्य वादिनो मतेऽसिद्धम् । तथा च तस्याप्यन्यथानुपपत्तिः प्रमाणप्रतीता नास्तीति । अत्र यद्यपि स्वरूपासिद्धचादयोऽसिद्धिदोषप्रकाराः सम्भवन्ति, तथापि न तेषां पार्थक्यं, उभयासिद्धादिद्वयमध्य एवान्तर्भवनात् । तथाहि—चाक्षुषत्वाभाववत्त्वं शब्दस्योभयसिद्धमेव, चाक्षुषत्वं तूभयाप्रसिद्धमेव । मरणरहितत्वाभाववत्त्वं अन्यतरवादिसिद्धमित्यतोऽन्यतराऽसिद्धमेव मरणरहितत्वमिति ध्येयम् ॥

विरुद्धनामानं हेत्वाभासं निरूपयति—

**साध्यविपर्ययेणैव यस्यान्यथानुपपत्तिरध्यवसीयते स विरुद्धः । यथा नित्य एव पुरुषोऽनित्य एव वा प्रत्यभिज्ञानादिमत्त्वात् ॥५५॥**

यो हेतुः साध्यं विना नाऽनुपपन्नः किन्तु साध्याभावं विनाऽनुपपन्नः स विरुद्ध इत्यर्थः । पुरुषो नित्यः प्रत्यभिज्ञानादिमत्त्वादिति नित्यत्ववादिना कृतः प्रयोगः, पुरुषोऽनित्यः प्रत्यभिज्ञानादिमत्त्वादिति चानित्यत्ववादिना कृतः प्रयोगः । *उभयमतेऽपि हेतुर्विरुद्धः ।* यतो न पुरुष एकान्तेन नित्योऽनित्यो वा, ततश्च पुरुषस्य नित्यत्वं विना अनित्यत्वं विना च प्रत्यभिज्ञानादिमत्त्वं नैवानुपपन्नमपि तु साध्यविपर्ययं विना—नित्यत्वपक्षे तदभावं विना, अनित्यत्वपक्षे च तदभावं विना तदनुपपन्नं, पुरुषे नित्यत्वस्याऽनित्यत्वस्य प्रत्येकमेकान्तेनाऽभावादतोऽयं हेतुर्विरुद्धः ॥

व्यभिचारापरनामानमनैकान्तिकमुदाहरति—

**यस्याऽन्यथानुपपत्तिः सन्दिह्यते सोऽनैकान्तिकः । स द्वेधा—निर्णीतविपक्षवृत्तिकः सन्दिग्धविपक्षवृत्तिकश्च । आद्यः—शब्दो नित्यः प्रमेयत्वात् । द्वितीयः—विवादापन्नः पुरुषः सर्वज्ञो न भवति, वक्तृत्वात् ॥५६॥**

यस्य-हेतोरन्यथानुपपत्तिः सन्दिह्यते—न निश्चीयते सोऽनैकान्तिकः। **द्वेधा इति।** विपक्षो निश्चितसाध्याभाववान्। निर्णीता विपक्षे वृत्तिर्यस्य स निर्णीतविपक्षवृत्तिकः। सन्दिग्धा विपक्षे वृत्तिर्यस्य स सन्दिग्धविपक्षवृत्तिकः। यथाक्रममुदाहरति—**शब्द इति।** अत्र नित्यत्वाभाववान् घटादिरनित्यः, तत्रापि प्रमेयत्वस्य सत्त्वात्, नित्यत्वं विनापि प्रमेयत्वोपपत्तिसद्भावादयमनैकान्तिकः। **विवादेति।** अत्राऽसर्वज्ञत्वं साध्यं, तदभाववान् सर्वज्ञो विपक्षः, तत्रापि वक्तृत्वं नैव स्यादिति न निर्णयः, किन्तु सन्देह'स्तत्रापि स्यादि'त्याकारः। तथा च वक्तृत्वस्य तत्र सत्त्वे तत् सन्दिग्धविपक्षवृत्तिकं, तच्च वक्तृत्वं असर्वज्ञत्वं विनाप्युपपन्नमतोऽनैकान्तिकमिति॥

अत्र विषये नैयायिकमतं दूषयितुं प्रदर्शयति—

**परे तु, सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः। साधारणाऽसाधारणाऽनुपसंहारिभेदादनैकान्तिकस्त्रिधा। तत्र साध्याभाववद्वृत्तिः साधारणो यथा पर्वतो वह्निमान् प्रमेयत्वात्। सपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणो यथा शब्दो नित्यः शब्दत्वात्। अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी यथा सर्वमभिधेयं प्रमेयत्वात्। साध्यव्यापकीभूताऽभावप्रतियोगी हेतुर्विरुद्धो यथा शब्दो नित्यः कृतकत्वात्। साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षो यथा शब्दो नित्यः श्रावणत्वात्, शब्दोऽनित्यः कार्यत्वात्। असिद्धस्त्रिविधः—आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्च। आद्यः गगनारविन्दं सुरभि अरविन्दत्वात्। द्वितीयः शब्दो गुणश्चाक्षुषत्वात्। सोपाधिको हेतुर्व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः। यथा पर्वतो धूमवान् वह्निमत्त्वादित्यत्र आर्द्रेन्धनसंयोग उपाधिः, सोपाधिकत्वाच्च वह्निमत्त्वं व्याप्यत्वासिद्धम्। यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितो यथा वह्निरनुष्णो द्रव्यत्वादिति॥**

**परेस्त्विति** । नैयायिकाः । वह्न्यभाववति जलह्रदादौ प्रमेयत्वस्य वृत्तित्वात् प्रमेयत्वं साधारणम् । निश्चितसाध्यवान् सपक्षः, निश्चितसाध्याभाववांश्च विपक्षः । ततश्च नित्यत्ववति आकाशादौ नित्यत्वाभाववति च घटादौ शब्दत्वस्याऽसत्त्वादसाधारण्यम् । **सर्वमिति** । अत्र सर्वस्यैव पक्षत्वाद् दृष्टान्ताभावोऽतोऽनुपसंहारी हेतुः । शब्दो नित्यः कृतकत्वादित्यत्र साध्यं नित्यत्वं तद्व्यापकीभूतो योऽभावः स कृतकत्वाभावः, तत्प्रतियोगित्वं कृतकत्वे इति तद्विरुद्धम् । सत्प्रतिपक्षमुदाहरति–**यथेति** । अत्र यथा नित्यत्वसाधकं श्रावणत्वं, तथाऽनित्यत्वसाधकं कार्यत्वमप्यस्तीति श्रावणत्वं सत्प्रतिपक्षः । गगनारविन्दरूपस्याश्रयस्यैवाप्रसिद्धत्वेन अरविन्दत्वं आश्रयासिद्धम् । स्वरूपासिद्धमुदाहरति **शब्द इति** । अत्र शब्दे चाक्षुषत्वं नास्तीति 'हेत्वभाववत्पक्षः स्वरूपासिद्धि'रित्यात्मकस्वरूपासिद्धिसत्त्वात् चाक्षुषत्वं स्वरूपासिद्धम् । यत्र यत्र धूमस्तत्र तत्रार्द्रेन्धनसंयोगस्य सत्त्वात्साध्यव्यापकता, यत्र वह्निस्तत्रायःपिण्डादावार्द्रेन्धनवत्त्वाभावात्साधनाऽव्यापकता चार्द्रेन्धनसंयोगस्याऽतः स उपाधिः । तद्वांश्च वह्निमत्त्वात्मको हेतुरिति स सोपाधिकः । **वह्निरनुष्ण इति** । अत्र वह्नावनुष्णत्वाभावः उष्णत्वात्मकः प्रमाणान्तरेण प्रत्यक्षादिना निश्चितोऽस्तीति द्रव्यत्वं हेतुर्बाधितः ॥

तत्खण्डयति–

**तन्न, सत्प्रतिपक्षबाधयोरतिरिक्तहेत्वाभासत्वे मानाभावात् ॥५७॥**

सत्प्रतिपक्षस्याऽसिद्धेऽन्तर्भावात् । तुल्यबलेन प्रतिपक्षहेतुना मौलहेतोरन्यथानुपपत्तेः प्रमाणबाधितत्वादिति भावः । बाधश्च न स्वतन्त्रो दोषोऽपि तु पक्षाभास एव । एवमाश्रयासिद्धोऽपि पक्षाभास एव । स्वरूपासिद्धादयश्चाऽसिद्धा एवेति न पार्थक्यम् । अनुपसंहारी च न हेतुदोषः, पक्षैकदेशस्यापि दृष्टान्तत्वे बाधाऽभावादिति बोध्यम् ॥

अथाऽऽगमप्रमाणनिरूपणमारभते–

**आप्तवचनादाविर्भूतमर्थसंवेदनमागमः । आप्तवचनं तूपचारात् ॥५८॥**

आप्तवचनं यद्यपि नागमः, तथापि अर्थसंवेदनकारणत्वेन तत्र कारणे कार्योपचारात्तत्राप्यागमत्वमित्याह–आप्तवचनं तूपचारादिति ।

तत्र क आप्तः ? इत्याशङ्कामुत्तरयन्नाह–

**अभिधेयं वस्तु यथावस्थितं यो जानीते यथाज्ञातं चाभिधत्ते स आप्तः । स द्विधा–लौकिको लोकोत्तरश्च । आद्यो जनकादिर्द्वितीयस्तु तीर्थकृदादिः ॥५९॥**

जनकादिरित्यत्राऽऽदिपदाद्व्यासादिः । तीर्थकृदादिरित्यत्राऽदिपदेन श्रुत-केवल्यादिर्ग्राह्यः ॥

आप्तवचनमित्यत्राप्तो दर्शितोऽधुना वचनमाह–

**वर्णपदवाक्यात्मकं वचनम् ॥६०॥**

वर्णोऽकारादिः, स च पौद्गलिकः । वर्णसमूहः पदं, तच्च सङ्केतवत् पदम् । परस्परसापेक्षपदसमूहो वाक्यम् । तदात्मकं च वचनम् ॥

पदं शब्दः, स चार्थस्य वाचकः, अर्थश्च शब्दवाच्य इति द्वयोर्वाच्य-वाचकभावः सम्बन्धः । पदं चार्थे-अर्थविशेषे शक्तं । पदनिष्ठा शक्तिरेवार्थ-बोधिकेति यावत् । न त्वर्थबोधनाय कश्चित् सङ्केतः शक्तिनामकः पदे ईश्वराद् आनेय इत्याह–

**स्वाभाविकसामर्थ्यसमयाभ्यामर्थबोधनिबन्धनं शब्दः । न त्वस्मा-च्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छा शक्तिरिति । मानाभावात् ॥६१॥**

स्वनिष्ठं यत्स्वाभाविकं सामर्थ्यमर्थबोधायालं, यश्चाऽस्मदादिभिर्विहितः सङ्केतः समयापरनामा, ताभ्यां–तयोः साहाय्येनार्थस्य बोधकारणं शब्द इति । केचित्त्वस्माच्छब्दादयमर्थो बोद्धव्य इत्यात्मिकामीश्वरस्येच्छामेव शक्तिं मन्यन्ते; तन्न, ईश्वर एव मानाभावात् । ईश्वर एव नास्ति, तदा कस्य इच्छा शक्तित्वेन मन्तव्या ? अतोऽस्मदादीनामिच्छैव शक्तिरिति ध्येयम् ॥

आगमप्रमाणं सप्तभङ्ग्यात्मकमिति सप्तभङ्गीमाह—

**सर्वत्रायं ध्वनिर्विधिप्रतिषेधाभ्यां स्वार्थमभिदधानः सप्तभङ्गीमनुगच्छति ॥**

सर्वत्र—प्रमाणवाक्ये, ध्वनिः शब्दः । सर्वोऽपि शब्दो विधायको निषेधकश्चापि । स्वार्थविधाने परार्थनिषेधे च कृते एव स्वार्थकथनं सुतरां भवतीति भावः । यद्यत् प्रमाणवाक्यं तत् सप्तभङ्ग्यात्मकमेव । अत एव यत्रैकादिरेव भङ्ग उक्त स्तत्रापि शेषभङ्गा आक्षेप्तव्याः । यत्र तु नैकोऽपि भङ्गस्तादृशं घटोऽयं पटोऽयमित्यादि लौकिकं वाक्यं वस्तुतो नैव प्रमाणम् ॥

सप्त भङ्गानेवाह स्वरूपतः—

**स्यादस्त्येव सर्वमिति विधिकल्पनया प्रथमो भङ्गः । स्यान्नास्त्येव सर्वमिति निषेधकल्पनया द्वितीयः । स्यादस्त्येव स्यान्नास्त्येवेति क्रमतो विधिनिषेधकल्पनया तृतीयः । स्यादवक्तव्यमेवेति युगपद्विधिनिषेधकल्पनया चतुर्थः । स्यादस्त्येव स्यादवक्तव्यमेवेति विधिकल्पनया युगपद्विधिनिषेधकल्पनया च पञ्चमः । स्यान्नास्त्येव स्यादवक्तव्यमेवेति निषेधकल्पनया युगपद्विधिनिषेधकल्पनया च षष्ठः । स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेवेति क्रमतो विधिनिषेधकल्पनया युगपद्विधिनिषेधकल्पनया च सप्तमः ॥**

स्वयमेवैषामर्थमाह—

**तत्र स्यात्—कथञ्चित् स्वद्रव्यक्षेत्रकालभावरूपेणाऽस्त्येव सर्वं कुम्भादि, न पुनः परद्रव्यक्षेत्रकालभावरूपेण । तथाहि—कुम्भो द्रव्यतः पार्थिवत्वेनास्ति, नाऽऽप्यादिरूपत्वेन । क्षेत्रतः पाटलिपुत्रकत्वेन, न कान्यकुब्जादित्वेन । कालतः शैशिरत्वेन, न वासन्तिकादित्वेन । भावतः श्यामत्वेन, न रक्तादित्वेन । अन्यथेतररूपापत्त्या स्वरूपहानिप्रसङ्ग इति ।**

**अवधारणं चात्र भङ्गेऽनभिमतार्थव्यावृत्त्यर्थमुपात्तम् । इतरथाऽनभिहित-तुल्यतैवास्य वाक्यस्य प्रसज्ज्येत । प्रतिनियतस्वार्थोऽनभिधानात् । तथाप्यस्त्येव कुम्भ इत्येतावन्मात्रोपादाने कुम्भस्य स्तम्भाद्यस्तित्वेनापि सर्वप्रकारेणास्तित्वप्राप्तेः प्रतिनियतस्वरूपानुपपत्तिः स्यात् । तत्प्रति-पत्तये 'स्याद्' इति शब्दः प्रयुज्यते । स्यात्–कथञ्चित् स्वद्रव्यादिभिरे-वायमस्ति न परद्रव्यादिभिरपीत्यर्थः ॥६२॥**

अत्र भङ्गानां सप्तत्वमेव कथं ? कथं नाधिक्यं ? अत्रोच्यते, इमे भङ्गा उत्तर-रूपाः । तानि चोत्तराणि सप्तैव, तत्कारणप्रश्नानां सप्तत्वात् । प्रश्ना अपि सप्तैव, तन्मूलजिज्ञासायाः सप्तविधत्वात् । जिज्ञासा अपि सप्तैव, तत्कारण-सन्देहानां सप्तधात्वादिति ॥

सप्तभङ्गीलक्षणमाह–

**एकत्र वस्तुनि एकैकधर्मपर्यनुयोगवशादविरोधेन व्यस्तयोः सम-स्तयोश्च विधिनिषेधयोः कल्पनया स्यात्काराङ्कितः सप्तधा वाक्प्रयोगः सप्तभङ्गी ॥६३॥**

एकत्र–घटादिके वस्तुनि, एकैकधर्मपर्यनुयोगवशात्–घटोऽस्ति ? घटो-नास्ति ? घटोऽस्त्येव नास्त्येव वा क्रमतः ? घटो युगपदस्त्येव नास्त्येव ? घटो-ऽस्ति युगपदस्ति नास्ति च ? घटो नास्ति युगपदस्ति नास्ति च ? घटः क्रमतो-ऽस्ति नास्ति युगपदस्ति नास्ति च ? एवं पर्यनुयोगवशात्, विधिनिषेधयोः– अस्तित्वादिधर्माणां विधेर्निषेधस्य च कल्पनया । स्यादित्यव्ययमनेकान्तद्योतकं, तदङ्कितो यः सप्तधा वाक्यप्रयोगः स सप्तभङ्गीति ॥

उक्तं प्रमाणस्वरूपमथ तदेकदेशात्मकनयस्वरूपमाह–

**प्रमाणपरिच्छिन्नस्यानन्तधर्मात्मकस्य वस्तुनः एकदेशग्राहिणस्त-दितरांशाप्रतिक्षेपिणोऽध्यवसायविशेषा नयाः ॥ नैगमसंग्रहव्यवहारर्जु-सूत्रशब्दसमभिरूढैवम्भूताः सप्त ॥६४॥**

**प्रमाणेति** । वस्तुमात्रमनन्तधर्मात्मकं, तादृशस्य च तस्य परिच्छेदः प्रमाणेन कृतः । नयस्तु तस्यैवाऽनन्तधर्मात्मकवस्तुनोऽनन्तधर्माणां मध्यत एकधर्मं गृह्णाति, तदितरधर्मांश्च न तिरस्करोति,—तिरस्कारे तु दुर्नयत्वापत्तेः—तादृशो योऽध्यवसायः सः । नैगमः सामान्यविशेषवादी । सङ्ग्रहः सामान्यमात्रवादी । व्यवहारो विशेषवादी । ऋजुसूत्रस्तु वर्तमानक्षणिकपदार्थवादी । शब्दस्तु लिङ्गकारकादिभेदेनाऽर्थभेदवादी । पर्यायभेदेनार्थभेदवादी समभिरूढः । तत्तच्छब्दवाच्यक्रियापरिणतवस्त्वेव मन्यत एवम्भूत इति संक्षेपः ॥

ननु प्रमाणान्नयस्य को भेदः ? इत्याह—

**प्रमाणैकदेशत्वाच्चैषां ततो भेदः ॥६५॥**

प्रमाणप्ररूपितानन्तधर्मात्मकवस्तुन एवैकदेशाभिधायिनो नयाः । ततश्च नया एकदेशमभिदधति पदार्थस्य, प्रमाणं च सम्पूर्णमेव वस्त्वभिदधातीति द्वयोर्भेदः ॥

ननूपमानमपि स्वतन्त्रं प्रमाणमस्ति, कथं तदत्र नोक्तमत आह—

**अत्र संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिस्तत्करणं सादृश्यज्ञानमुपमानमिति तु प्रत्यभिज्ञानान्तर्भावादेव न पृथगिति ॥६६॥**

कस्यचिन्मनसि शङ्का जाता 'कीदृग्गवय ?' इति । तदनन्तरं स केनचिदारण्यकेनोक्तः 'यथा गौस्तथा गवयः, गोसदृशो वा गवयपदवाच्यः' इति । ततश्च स जनः कदाचिदरण्यं प्रविष्टस्तत्र च तेन गोसदृशः पदार्थो दृष्टस्तदा गोसादृश्यदर्शनं जायते, तदेवोपमितौ करणम् । ततश्च स आरण्यकोक्तं स्मरति 'गोसदृशो गवयपदवाच्य' इति । एतच्च स्मरणमुपमितौ व्यापारः । तदनन्तरं यद् 'गवयो गवयपदवाच्च' इति ज्ञानं भवति तदुपमितिरिति । एवं च कथमुपमानं न स्वतन्त्रं प्रमाणम् ? अत्राह—**प्रत्यभिज्ञानेति** । यदि सादृश्यज्ञानार्थं उपमानं, तदा वैसदृश्यज्ञानार्थमपि स्वतन्त्रं प्रमाणं किमप्यभ्युपगन्तव्यं । न च तथाऽभ्यु-

पगम्यते । अत एवोपमानमपि न प्रत्यभिज्ञानात्पृथगिति भावः । स एवायं जिनदत्तः इतिवद् गोसदृशो गवयपदवाच्य इत्यस्यापि प्रत्यभिज्ञानाकारत्वात् ॥

इति श्रीजैनतर्कसङ्ग्रहे द्रव्यखण्डे परोक्षखण्डः ॥

---

उक्तं जीवस्वरूपमथ पुद्गलमाह—

**ननु पूर्वमुक्तं 'वण्णगंधरसा फासा पुग्गलाणं तु लक्खणं', 'रूपिणः पुद्गला'** इत्यादि, तत्र के कतिविधाश्च वर्णगन्धरसस्पर्शा इति वक्तव्यं, अत आह—

**कृष्णनीलरोहितपीतशुक्ला वर्णाः । तिक्तकटुकषायाम्लमधुरा रसाः । सुरभ्यसुरभी गन्धौ । शीतोष्णस्निग्धरूक्षगुरुलघुकर्कशमृदवः स्पर्शाः । छायाऽऽतपोद्योतशब्दादयः पुद्गलपरिणामा एव ॥६८॥**

प्रतिपुद्गलं एको वर्ण एको रस एको गन्धः स्पर्शद्वयं चास्त्येवेति । छाया द्विविधा—तद्वर्णविकारात्मिका यथा दर्पणादिस्वच्छपदार्थेष्वस्मच्छाया । प्रतिबिम्बात्मिका चास्माकं प्रतिच्छाया याऽऽतपादिषु प्रकाशादिषु च दृग्गोचरा भवति । सा यदि पौद्गलिकी न स्याद् दृग्गोचराऽपि न स्यादिति । आतपः सूर्यप्रकाशात्मकः, उद्योतश्चन्द्रादिप्रकाशः, तावपि पौद्गलिकौ । शब्दोऽपि पौद्गलिक एव । अधुनातनवैज्ञानिकैः शब्दस्य रेकोर्डयन्त्रादिफयन्त्रेषु सङ्ग्रहः, केमेरायन्त्रद्वारा गृह्यमाणछविषु चास्मदादीनां छायायाः सङ्ग्रहः क्रियते, सोऽपि शब्दच्छाययोः पौद्गलिकत्वसाधनायालमिति ॥

पुद्गलभेदानाह—

**स्कन्धदेशप्रदेशपरमाणुभेदाच्च पुद्गलश्चतुर्द्धा । तत्र परमाणुरप्रदेशः ॥६९॥**

स्कन्धादिस्वरूपं पूर्वं धर्मादिनिरूपणावसर उक्तमेव । **परमाणुरिति ।** सुतीक्ष्णेनापि शस्त्रेण यं छेत्तुं भेत्तुं च नैव कदापि शक्यते स परमाणुः ।

प्रकृष्टः-प्रकर्षप्राप्तः अणुः—परमाणुः—निर्विभाज्यः पुद्गलांशः। स च कारणमेव भवति न कार्यं, नित्यत्वादन्त्यत्वाच्च। तदुक्तम्—

**"कारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः।**
**एकरसवर्णगन्धो द्विस्पर्शः कार्यलिङ्गश्च ॥" इति।**

कालस्य लक्षणं स्वरूपं चाह—

**वर्तनालक्षणः कालः। नवपुराणादिपरिणामा वर्तना। आवलिकादयश्च व्यवहारार्थं कल्प्यन्ते ॥७०॥**

पूर्वमेवेदमुक्तप्रायमिति ॥

**इति श्रीजैनतर्कसङ्ग्रहे द्रव्यखण्डः ॥**

## अथ पर्यायखण्डः ।

गुणानामपि पर्यायत्वेन गुणखण्डमनुक्त्वा पर्यायखण्डमेवाह । पर्यायलक्षणं तु पूर्वमेवोक्तं, अधुना तस्य प्रकारान् आह–

**पर्यायो द्विविधः, क्रमभावी सहभावी च ॥७१॥**

**तत्र सहभाविपर्याया गुणा, यथाऽऽत्मनो विज्ञानव्यक्तिशक्त्यादयः । क्रमभाविनः पर्यायास्त्वात्मनो यथा सुखदुःखशोकहर्षादयः ॥७२॥**

गुणाः यावद्द्रव्यभाविनः । क्रमभाविपर्यायास्त्वयावद्द्रव्यभाविन इति भेदः ॥

पर्यायस्य चातुर्विध्यमाह–

**पर्याया अपि स्वभावविभावाभ्यां द्रव्यगुणाभ्यां च चतुर्भेदाः । तथाहि–स्वभावद्रव्यव्यञ्जनपर्यायाश्चरमशरीरात् किञ्चिन्न्यूनसिद्धपर्यायः । स्वभावगुणव्यञ्जनपर्याया यथा जीवस्यानन्तचतुष्टयरूपाः । विभावद्रव्यव्यञ्जनपर्याया गत्यादयः । विभावगुणव्यञ्जनपर्याया मत्यादयः ॥**

द्रव्यस्य स्वभावात्मकाः, द्रव्यस्य विभावात्मकाः, गुणस्य स्वभावात्मकाः, गुणस्य विभावरूपाः इति चतुर्धा पर्यायाः । **चरमेति** । सिद्धस्य–सिद्धिगतिमाप्तस्य जीवस्यैष स्वभाव एव यत् स चरमशरीरात् किञ्चिन्न्यूनपरिमाणो भवति । स च पर्यायः सिद्धात्मकजीवद्रव्यस्यैव । स च क्रमभावित्वात्पर्यायः, भवनानन्तरं सर्वदा तथैवावस्थानाच्च व्यञ्जनः, **'स्थूलाः कालान्तरस्थायिनः शब्दसङ्केतविषयाः व्यञ्जनपर्याया'** इति वचनात् । एवं च सिद्धस्य स्वचरमशरीरात् किञ्चिन्न्यूनत्वं स्वभावद्रव्यव्यञ्जनपर्यायः । **जीवस्यानन्तेति** । ज्ञानादयो गुणा जीवस्य स्वभावा एव । उत्तरकालं सर्वदाऽवतिष्ठन्ते चेति व्यञ्जनः, क्रमभावित्वाच्च पर्यायाः । **विभावद्रव्येति** । देवगत्यादय उत्पत्त्यनन्तरं सदैव नावतिष्ठन्त इति विभावाः । जीवद्रव्यस्यैवैते । देवादिपदप्रवृत्तिनि-

भिन्नतामुपयान्तीति व्यञ्जनाः। क्रमजन्मत्वाच्च पर्यायाः। **विभावगुणेति**। मत्यादयो ज्ञानादिगुणस्य पर्यायाः। मत्यादिपदप्रवृत्तिनिमित्तत्वाद्व्यञ्जनाः। जीवद्रव्यस्यैवते। न चोत्पत्त्यनन्तरं सर्वदाऽवतिष्ठन्त इति विभावाः॥

अथ पुद्गलपर्यायानाह–

**पुद्गलस्यापि द्व्यणुकादयो विभावद्रव्यव्यञ्जनपर्यायाः। रसरसान्तरगन्धगन्धान्तरादयो विभावगुणव्यञ्जनपर्यायाः। अविभागिपुद्गलपरमाणवः स्वभावद्रव्यव्यञ्जनपर्यायाः। वर्णगन्धरसैकैकाऽविरुद्धस्पर्शद्वये च स्वभावगुणव्यञ्जनपर्यायाः॥**

**द्व्यणुकादय इति**। ते च स्वोत्पत्त्यनन्तरं न सर्वकालमवतिष्ठन्त इति ते पुद्गलद्रव्यस्य विभावाः। क्रमभावित्वात्पर्यायाः। द्रव्यस्यैवैते। द्व्यणुकादिशब्दप्रवृत्तिनिमित्तत्वाच्च व्यञ्जना इति। **रसरसान्तरेति**। एते गुणाः। क्रमजन्मत्वात्पर्यायाः। न च सर्वदाऽवतिष्ठन्तेऽपि तु परावर्तन्त इति विभावाः। पुद्गलद्रव्यस्येमे। मधुरकटुत्वादिसंज्ञां भजन्तीति व्यञ्जनाः। **अविभागीति**। यद्यपि पुद्गलद्रव्ये परमाणूनां गमनागमनं चलत्येव, तथापि परमाणुत्वेन ते पुद्गले सन्त्येव सर्वदेति अविभागिपुद्गलपरमाणवः पुद्गलद्रव्यस्य स्वभावाः। गमनागमनादिपरिणामवत्त्वात् पर्यायाः। पुद्गलद्रव्यस्यैवैते। परमाणुपदप्रवृत्तिनिमित्ततया च व्यञ्जनाः। **वर्णगन्धेति**। प्रत्येकं पुद्गले एको वर्ण एको गन्ध एको रसोऽविरुद्धस्पर्शयुगलं च सदैवाऽवतिष्ठत एवेति स्वभावोऽयं वर्णादिगुणानाम्। स च वर्णादीनां गुणानाम्। अन्यान्यरूपेण परिणमनात्पर्यायः। वर्णादिसंज्ञाहेतुत्वाद्व्यञ्जन इति॥

अन्यानपि द्रव्यस्य पर्यायान् दर्शयति–

**एवमेकत्व-पृथक्त्व-सङ्ख्या-संस्थान-संयोग-विभागादयोऽपि पर्यायाः॥**

ननु व्यञ्जनपर्यायः कः? कश्च तद्विपरीतोऽर्थपर्यायः? अत्राह–

**एवं सकलव्यक्त्यनुगतं सत्त्वं व्यञ्जनपर्यायः । प्रतिव्यक्त्यनुगतं चार्थपर्यायः ॥**

सकलव्यक्तिषु अनुगतं यत्सत्त्वं तदित्यर्थः । सत्त्वापेक्षयाऽल्पसङ्ख्यक-व्यक्तिष्वनुगतं घटत्वादि घटादि चार्थपर्याय इत्यर्थः ॥

ननु किमिदं पदार्थमात्रे सत्त्वं ? अत्राह—

**उत्पादव्ययध्रौव्यात्मकं च सत् ॥७३॥**

न त्वर्थक्रियाकारित्वमात्रं सत्त्वम् । वस्तुमात्रं वर्तमानस्वपर्यायापेक्षयोत्पद्यते, पूर्वपर्यायत्वेन विनश्यति, पर्यायद्वये चैकमेव द्रव्यमनुसरतीति वस्तुमात्रस्योत्पा-दात्मकता, नाशात्मकता, ध्रुवता च ॥

ये तु पर्यायान्नाभिमन्यन्ते, कांश्चिच्च गुणत्वेन मन्यन्ते तन्मतमुपदर्शयति—

**परे तु रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वा-परत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्च-तुर्विंशतिर्गुणाः । रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च, अन्य-त्रापाकजं नित्यमनित्यं च । परिमाणमणु महद् दीर्घं ह्रस्वं च । परत्वा-परत्वे दिक्कृते कालकृते च । द्रवत्वं सांसिद्धिकं नैमित्तिकं च । शब्दो-ध्वन्यात्मको वर्णात्मकश्च । बुद्धिः स्मृतिरनुभवश्च । अनुभवो यथार्थोऽय-थार्थश्च । प्रत्यक्षानुमित्युपमितिशाब्दभेदाच्चतुर्विधोऽपि । तत्करणमपि चतुर्धा । (असाधारणं कारणं करणम्) । समवाय्यसमवायिनिमित्तभेदात् कारणं त्रिविधम् । संशयविपर्ययतर्कभेदादयथार्थानुभवस्त्रिधा । प्रयत्नः प्रवृत्तिनिवृत्तिजीवनयोनिभेदात् त्रिधा । संस्कारो वेगो भावना स्थिति-स्थापकश्च । तत्र "वायोर्नवैकादश तेजसो गुणा, जलक्षितिप्राणभृतां चतु-र्दश । दिक्कालयोः पञ्च षडेव चाम्बरे, महेश्वरेऽष्टौ मनसस्तथैव च" इति॥**

परेत्विति । नैयायिका इत्यर्थः । तेषां मते 'द्रव्याश्रिता निर्गुणक्रिया

गुणाः' । मानव्यवहाराऽसाधारणं कारणं परिमाणम् । पराऽपरव्यवहारासाधारणकारणे परत्वापरत्वे । दूरस्थे समीपस्थे च दैशिकपरत्वापरत्वे । ज्येष्ठे कनिष्ठे च कालिकपरत्वापरत्वे । आद्यपतनाऽसमवायि गुरुत्वम् । आद्यस्यन्दनाऽसमवायिकारणं द्रवत्वं । तच्च सांसिद्धिकं जले, नैमित्तिकं पृथ्वीतेजसोः । चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः । श्रोत्रग्राह्यो गुणः शब्दः । सर्वव्यवहारहेतुर्गुणो बुद्धिः । समवायीति । यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् । कार्यैकार्थ–कारणैकार्थाऽन्यतरप्रत्यासत्त्या समवायिकारणे प्रत्यासन्नं ज्ञानादिभिन्नं कारणमसमवायिकारणम् । तदुभयभिन्नं निमित्तकारणम् । संशयेति । एकस्मिन् धर्मिणि विरुद्धनानाधर्मावगाहिज्ञानं संशयः । मिथ्याज्ञानं विपर्ययः । व्याप्यारोपेण व्यापकारोपस्तर्कः । चिकीर्षादिजनितः प्रयत्नः प्रवृत्तिः । द्विष्टसाधनताज्ञानजनितो यत्नो निवृत्तिः । शरीरनिष्ठप्राणसञ्चारे कारणं जीवनयोनियत्नः । द्वितीयादिपतनाऽसमवायिकारणं वेगः । अनुभवजन्या स्मृतिहेतुर्भावना । अन्यथाकृतस्य पुनस्तदवस्थापादकः संस्कारः स्थितिस्थापकः । वायोर्नवेति । स्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगा वायोः । स्पर्शाद्यष्टकं रूपं वेगो द्रवत्वं च तेजसः । स्पर्शाद्यष्टकं रूपरसस्पर्शाः वेगो गुरुत्वद्रवत्वे स्नेहश्च जलस्य । स्नेहत्यागेन गन्धस्वीकारेण चैत एव चतुर्दश पृथ्व्याम् । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाः सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः भावना धर्माधर्मौ च चतुर्दशैत आत्मनः । सङ्ख्यादिपञ्चकं कालस्य दिशश्च । सङ्ख्यादिपञ्चकं शब्दश्चाकाशस्य । सङ्ख्यादिपञ्चकं बुद्धीच्छाप्रयत्ना ईश्वरस्य । सङ्ख्यादिपञ्चकं परत्वापरत्ववेगाश्च मनस इति द्रव्याणां गुणव्यवस्था ॥

तन्मतं खण्डयति–

**तन्न, यथायथं पर्यायादिष्वन्तर्भावात् ॥७४॥**

क्रमभाविनि सहभाविनि च पर्याय एवामीषां समावेशादिति ॥

**इति श्री जैनतर्कसङ्ग्रहे पर्यायखण्डः ॥**

## अथ धर्मनिरूपणान्तः खण्डः ।

ननु पूर्वं गुरुतत्त्वलक्षणावसरे निरूपितं 'पञ्चमहाव्रतधारी गुरुः' इति । तत्र कानि महाव्रतानीति वाच्यं ? अत्राह—

**महाव्रतानि पञ्च, प्राणातिपातमृषावादाऽदत्तादानमैथुनपरिग्रहविरति-रूपाणि ॥७५॥**

प्राणातिपातो हिंसा । प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा । असदभिधानं अनृतं, तदेव मृषावादः । अदत्तादानं स्तेयं । मैथुनमब्रह्म । मूर्च्छा परिग्रहः । एभ्यः पञ्चभ्यो महादोषेभ्यो विरमणं—सर्वथा विरतिः—पञ्च महाव्रतानीति भावः । महाफलानि चैतानि । अन्यत्राप्युक्तं—**"अहिंसाप्रतिष्ठायां तत्सन्निधौ वैर-त्यागः । सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम् । अस्तेयप्रतिष्ठायां सर्व-रत्नोपस्थानम् । ब्रह्मचर्यप्रतिष्ठायामपूर्ववीर्यलाभः । अपरिग्रहस्थैर्ये जन्म-कथन्तासम्बोध" इति ॥**

प्राणातिपातादिदोषाणां प्रकारानाह—

**प्राणातिपातादयः प्रत्येकं मनोवचःकायभेदात् करणकारणानुमति-भेदाच्च नवधा । ते चास्रवाः । तद्विरतिः संवर ॥७६॥**

प्राणातिपातस्य मनसा स्वयं करणं, अन्येन कारणं, अनुमोदनं चान्यकृत-स्येति त्रिधा । एवं वाचा कायेनापि त्रिधा त्रिधेति नवधा । एवमेव मृषावादादीना-मपि नव नव भेदा बोध्याः । ते च कर्मागमनद्वाररूपत्वादास्रवाः । कर्मागमनहेतुत्वा-देव तेषां विरतिः कार्या, यतः कर्मबन्धो न भवेत्, पुराणं कर्म च हीयेत ॥

ननु 'देवगुरुधर्मास्तत्त्व' मित्यत्र को धर्मः ? इति चेदाह—

**धर्मोऽहिंसा संयमस्तपः ॥७७॥**

हिंसा पूर्वोक्ता, तस्या अभावोऽहिंसा । संयमनं-सर्वविधसावद्यव्यापा-राद्विरमणं संयमः । ताप्यतेऽनेन कर्मेति तपः । एते त्रयोऽपि धर्मप्रकाराः । एते-षामेव दुर्गतिप्रपतज्जन्तुधारणक्षमत्वात् ॥

स च धर्मो द्विविध इति दर्शयति—

**गृहिधर्मः साधुधर्मश्चेति द्विधा ॥७८॥**

**गृहिणां देशतो विरतिः, साधूनां सर्वतः ॥७९॥**

गृहस्थानां संसारिजीवानां धर्म—आचारो गृहिधर्मः । साधूनां स साधुधर्मः । देशतः—स्थूलतः, सावद्ययोगाद्विरतिः । साधूनां च सर्वतः—सर्वसावद्ययोगाद्विरतिरूपो धर्म इत्यनयोर्भेदः ॥

ईदृशंतत्त्वत्रयं ज्ञात्वा किं प्रयोजनं ? इत्याशङ्कायामाह—

**तत्त्वश्रद्धानं सम्यग्दर्शनं शमाद्यभिव्यङ्ग्यः शुभात्मपरिणामः ॥८०॥**

शुद्धतत्त्वानि ज्ञात्वा तानि श्रद्धेयानि—'इमान्येव तत्त्वानि सत्यं, पवित्रं तत्त्वं च, नातोऽन्यत् किञ्चित्तत्त्वम्' इति । एतच्च तत्त्वश्रद्धानं 'सम्यग्दर्शन'-नाम्नोच्यते । सम्यग्दर्शनं च शम-संवेग-निर्वेदा-नुकम्पा-ऽऽस्तिक्यरूपैः पञ्चभिर्लक्षणैर्व्यङ्ग्यः शुभ आत्मपरिणामः ॥

तच्च सम्यग्दर्शनं आत्मपरिणामरूपं कथमवाप्यत इति तद्भेदनिरूपणद्वाराऽऽह—

**औपशमिकं क्षायोपशमिकं क्षायिकमिति तत्त्रिधा ॥८१॥**

मिथ्यात्वमोहनीयस्य कर्मण उपशमाद् भावि सम्यग्दर्शनं औपशमिकमुच्यते । उपशमश्चोदयमागच्छतः कर्मणो विष्कम्भः—स्थिरीकरणं—उदयागमननिरोध इति यावत् । क्षयोपशमः—उदयप्राप्तस्य मिथ्यात्वस्य क्षयः, उदयमागच्छतश्च तस्योपशमः, तेन निष्पन्नं क्षायोपशमिकनामकं सम्यक्त्वम् । क्षायिकं च दर्शनमोहत्रिकस्याऽनन्तानुबन्धिकषायचतुष्कस्य च क्षयेण निर्वृत्तात्मपरिणामरूपम् ॥

नन्वेतत्सम्यग्दर्शनमात्मनि किं करोतीति चेदाह—

**तत्प्रागवस्थो बहिरात्मा । तद्वान् अन्तरात्मा प्राक्कैवल्यात् । केवली परमात्मा ॥८२॥**

तदिति । सम्यग्दर्शनावाप्तेः प्राग् जीवो बहिरात्मेत्युच्यते । सम्यक्त्वप्राप्तिश्च तं 'अन्तरात्म' स्वरूपभाजनं करोति । अन्तरात्मा चाऽवश्यं केवलज्ञानप्रापको भविष्यत्येव । केवलावाप्त्यनन्तरं च स एवात्मा परमात्मा भवतीति ॥

अत्रेदमवधार्यं-त्रिविधा ह्यात्मनोऽवस्था । प्रथमा बहिरात्मदशा, द्वितीया अन्तरात्मदशा, परमात्मदशा च तृतीया । तत्र यदाऽऽत्माऽनधिगतसम्यक्त्वः सन् मिथ्यादर्शनमोहितो भवति, तद्वशाच्च भवं दुःखकारणमपि सुखकारणं सर्वस्वं च मन्यते, तत्रैव च स्वकीयं समग्रं सामर्थ्यं व्ययति, तदा स आत्मनः शुद्धस्वरूपाद् बहिर्भूतः सन् बहिरात्मदशां भजते । एतस्यामात्मनः शुद्धस्वरूपमतीवाऽऽवृतं भवति । यदा तु स एवात्मा प्रबलपुण्यपुरुषार्थयोगतोऽल्पीकृतमोहः सन्नपुनर्बन्धकभावमासाद्य विहितग्रन्थिभेदः करणचतुष्टयक्रमेण सम्यक्त्वमवाप्नोति, तदा स भवं सर्वदुःखानां मूलकारणं मन्वानोऽहिंसासंयमादिरूपं धर्मानुष्ठानमेव परमसुखनिदानं बुध्यते, यथाशक्ति च तत्र व्यापिपर्त्यपि । तदैव च स स्वकीयात्मनः शुद्धस्वरूपसन्मुखमवस्थानादन्तरात्मदशां बिभर्त्ति । अस्यां दशायां यद्यपि नात्मनः पूर्णशुद्धस्वरूपप्राकट्यं, कर्मणामद्यापि विद्यमानत्वात् । तथाप्यत्रात्मनः स्वरूपावारकाणि कर्माणि सुतरां शिथिलीभवन्ति अल्पीभवन्ति च । इयं च दशाऽऽत्मनः परमात्मदशायाः परमकारणम् ।

स चान्तरात्मा यदोत्तरोत्तरं स्वस्वरूपान्तर्मुखो भवति, तदा क्रमशः स सर्वाण्यपि कर्माण्यवधूय स्वकीयं यथार्थं परिपूर्णं निरुपाधिकं निरावरणं स्वरूपं समधिगच्छति । इयमेव च तस्य परमात्मदशा ॥ उक्तं च न्यायविशारदैर्न्यायाचार्यैर्महामहोपाध्यायभगवद्भिरध्यात्मसारे-

"कायादिर्बहिरात्मा, तदधिष्ठातान्तरात्मतामेति ।
गतनिःशेषोपाधिः परमात्मा कीर्तितस्तज्ज्ञैः ॥
विषयकषायावेशः तत्त्वाश्रद्धा गुणेषु च द्वेषः ।
आत्माऽज्ञानं च यदा, बाह्यात्मा स्यात्तदा व्यक्तः ॥

तत्त्वश्रद्धा ज्ञानं, महाव्रतान्यप्रमादपरता च ।
मोहजयश्च यदा स्यात्, तदान्तरात्मा भवेद्व्यक्तः ॥
ज्ञानं केवलसंज्ञं, योगनिरोधः समग्रकर्महतिः ।
सिद्धनिवासश्च यदा, परमात्मा स्यात्तदा व्यक्तः ॥"
तत्रान्तरात्मा ध्याता । परमात्मा ध्येयः ॥

अन्तरात्मना परमात्मा ध्यानेन ध्यातव्यः । परमात्मनो ध्येयत्वात् । ध्येय-ध्यानप्रभावाच्च ध्यातैव ध्येयो भवतीति ध्येयम् ॥

नन्वत्र किं ध्यानं ? इत्याह—

**ऐकाग्र्यसंवित्तिर्ध्यानं । ध्येयैकता समापत्तिः ॥८३॥**

ध्येयतत्त्वस्यैकाग्रभावेन संवेदनं ध्यानमित्यर्थः । 'सोऽहं' इतिरूपेण ध्येयेन सममैक्यं यदा स्यात्तदा तदेव ध्यानं परमप्रकर्षभावं बिभ्रत् समापत्ति-संज्ञां लभते ॥

इदं च ध्यानं कथं साध्यं ? ध्यानस्य च किं फलं ? इत्याह—

**ज्ञानपूर्वककर्मयोगाद् ध्यानयोगः । ध्यानयोगान्मुक्तियोगः ॥८४॥**

न केवलं ज्ञानयोगान्नवा केवलकर्मयोगाद्ध्यानयोगोऽपि तु ज्ञानयोग—कर्मयोगमिश्रणादेव ध्यानयोगः साध्यः । ज्ञानपूर्विकायाः क्रियाया एव सर्वत्र कार्यसिद्धौ समर्थत्वात् । अन्यत्राप्युक्तं '**अभ्यासवैराग्याभ्यां च तन्निरोध**'इति । ध्यानयोगस्य फलं तु मुक्तिरेव । एवं च परमानन्दमय-शुद्धात्मस्वरूपात्मक-मोक्षप्राप्तेः कारणत्वेन ध्यानयोगः सदा सुतरां सेव्य इति भावः ॥

**इति श्रीजैनतर्कसङ्ग्रहे धर्मनिरूपणान्तः खण्डः ॥**

**इति श्रीजैनतर्कसङ्ग्रहः ॥**

## अथ प्रशस्तिः ॥

श्रीमद्वीरजिनो जीयात्, सल्लब्धिर्गौतमः प्रभुः ।
यद्वचःसुधया सिक्ता विबुधा अमराः सदा ॥१॥

साम्राज्यं यस्य प्रौढप्रकटमहिमसज्ज्ञानकर्मप्रधानं,
स्याद्वादाध्यात्मरम्या मितिनयविशदा शुद्धभावा च वाणी ।
सोऽयं प्रोद्दामधामा परमगुणनिधिः सर्वतन्त्रः स्वतन्त्रः,
स्वप्ने वा जागरे वा शरणमनुदिनं नेमिसूरिर्ममास्तु ॥२॥

श्री तपागच्छराजस्य तस्य पट्टनभोमणिः ।
विजयोदयसूरीशः तस्य पट्टभृता मया ॥३॥

गुप्त्यष्टाङ्केन्दु (१९८३) वर्षे श्री-वीरकैवल्यवासरे ।
सूरिणा नन्दनेनायं निर्मितस्तर्कसङ्ग्रहः ॥४॥

इति श्री सर्वतन्त्रस्वतन्त्र शासनसम्राट् सूरिचक्रचक्रवर्ति जगद्गुरु श्रीप्रज्ञप्त्यादिसकलयोगोद्वहनसूरिमन्त्रसमाराधनपूर्वकप्राप्तसूरिपद विद्यापीठादिप्रस्थानपञ्चकसमाराधक श्रीशत्रुञ्जयादिमहापवित्रतीर्थसंरक्षणपरायणग्रथितन्यायव्याकरणाद्यनेकग्रन्थसन्दर्भ तपागच्छाधिराज भट्टारकाचार्यवर्य श्रीमद्विजयनेमिसूरिभगवत्पट्टालङ्कार सिद्धान्तवाचस्पति न्यायविशारद आचार्य श्रीविजयोदयसूरिपट्टालङ्कार न्यायवाचस्पति शास्त्रविशारद सिद्धान्तमार्त्तण्ड कविरत्नाचार्य श्रीविजयनन्दनसूरिणा विरचितः श्रीजैनतर्कसङ्ग्रहः ॥ श्रीः ॥

### (टिप्पण्यां प्रशस्तिः)

श्रीमतां सूरिसम्राजां पूज्यानां नेमिसूरिणाम् ।
पट्टे पूज्या अभूवन् श्री-विज्ञानाभिधसूरयः ॥ १ ॥

तेषां पट्टधराः पूज्याः श्रीलकस्तूरसूरयः ।
तेषां पट्टधराः पूज्याः श्रीयशोभद्रसूरयः ॥ २ ॥

श्रीशुभङ्करसूरीशास्तेषां पट्टधरास्तथा ।
तेषां पट्टे समायाताः श्रीसूर्योदयसूरयः ॥ ३ ॥

मुनिना शीलचन्द्रेण तेषां शिष्याणुना मया ।
रचिता बालबोधार्थं तर्कसङ्ग्रहटिप्पणी ॥ ४ ॥

गुप्तिगुप्तिनभोनेत्र--मिते वैक्रमवत्सरे ।
अश्वयुक्सितपक्षस्य त्रयोदश्यां विधौ कृता ॥ ५ ॥

गोधरानगरे रम्ये, धर्मस्थानविभूषिते ।
रचिता टिप्पणी सेयं, जीयाच्चन्द्रार्यमावधि ॥ ६ ॥

ॐ अर्हं नमः ॥

सर्वलब्धिसम्पन्नाय श्रीगौतमस्वामिने नमः ॥

नमो नमः श्रीगुरुनेमिसूरये ॥

आचार्य श्रीविजयनन्दनसूरि–विरचिता

स्वोपज्ञ–

तत्त्वकल्पलताख्यविवृतिविभूषिता

# जैन मुक्तावली ॥

भव्यसत्त्वतमोग्रन्थि–भेदको जिनपुङ्गवः ।
**धर्मनाथः** शिवं दद्यात्, केवलालोकभास्करः ॥१॥

यद्धैर्येण समानभावकलितो मेरुस्तु दार्ढ्यान्वितो
गाम्भीर्येण समोऽपि यस्य जलधिः क्षारेण सम्पूरितः ।
यद्वक्त्रानुविधानकार्यपि सदा चन्द्रः कलङ्की खलु,
सोऽयं सर्वगुणाकरो विजयते **श्रीवर्द्धमानो** जिनः ॥२॥

यं ध्यायन्ति सरस्वती त्रिभुवनस्वामिन्यथ श्रीमती
श्रीयक्षाधिपतिः सुराधिपतयश्चाशेषसम्पत्प्रदम् ।
सर्वा लब्धय आश्रयन्ति शरणं यं चैव नित्यं मुदा
वन्दे तं भगवन्तमादिममुनिं **श्रीगौतमस्वामिनम्** ॥३॥

आर्द्रं यस्य मनः सुधेव, चरितं चन्द्रप्रभेवामलं,
मृद्वीकेव सदा वचो मधुरिमाधुर्यं प्रमाणानुगम् ।
सम्यक् साधितसूरिमन्त्रप्रवरः श्रीमत्तपागच्छपः,
सोऽयं **श्रीगुरुनेमिसूरिभगवान्** भूयात् सतां श्रेयसे ॥४॥

धर्माधर्मविभाजिका परिमिताकाशप्रतिष्ठानघा
बुद्धात्मप्रथना प्रमाणकलिता सत्पुद्गलैर्निर्मिता ।

कालेनोपगता गुणेन ललिता या जैनमुक्तावलि-
स्तद्वृत्तिर्गुरुनेमिसूरिपदयोर्भक्त्याऽधुना तन्यते ॥५॥

प्रारब्धस्य निष्प्रत्यूहपरिसमाप्त्यर्थं शिष्टाचारपरिपालनार्थं च कृतं मङ्गल-मुत्तरोत्तरशिष्टचर्थं निबध्नाति–

**मूलम्–प्रणमामि महावीरं, चरमं तीर्थनायकम् ।**
**सच्चिदानन्दसम्पूर्णं, भव्याभीष्टार्थदायकम् ॥१॥**

**टीका**–ननु मङ्गलं न समाप्तौ हेतुः, कादम्बर्यादिषु व्यभिचारात् । नापि विघ्नध्वंसे, प्रायश्चित्तादिना व्यभिचारात् । अत्र **प्राञ्चो**ऽविगीतशिष्टाचारविषयत्वेन सफलत्वसिद्धौ असम्भवद्दृष्टफलकत्व एवादृष्टफलकल्पनौचित्यादुपस्थितत्वाच्च समाप्तिरेव मङ्गलस्य फलं, विघ्नध्वंसश्च तद्द्वारं; स्वजन्यविघ्नध्वंसवत्त्वेन मङ्गलाभावाच्च न कादम्बर्यादौ समाप्ति; नास्तिकग्रन्थेषु च जन्मान्तरीयतत्कल्पनेत्या**हुः** । **नव्यास्तु** विघ्नध्वंसविशेष एव मङ्गलस्य फलम् । विघ्नध्वंसविशेषश्च प्रायश्चित्तादेः । इत्थं च मङ्गलस्य विघ्नशङ्कया शिष्टाचारविषयत्वात्, सति विघ्ने च तन्नाशकत्वान्न स्वतः सिद्धविघ्नविरहस्थले काऽपि क्षतिः । प्रतिबन्धकसंसर्गाभावस्य च संसर्गाभावत्वेन कार्यजनकत्वात् । समाप्तिकामस्यापि तत्र प्रवृत्तिरित्या**हुः** ।

अत्रोच्यते । विघ्नध्वंसे एव मङ्गलं हेतुः । प्रायश्चित्तादेरपि मङ्गलत्वमेव । निकाचितकर्मणश्चाऽनपवर्त्तनीयत्वान्न बलवद्विघ्ननाशः । अशुभकर्मविपाकोदयश्च विघ्नः । दुरितनिवृत्त्यसाधारणकारणं च मङ्गलम् । निश्चयतो नत्याद्यभिव्यङ्ग्यभावविशेषस्यैव दुरितनाशकत्वेन नतित्वादिना प्रातिस्विकरूपेण मङ्गलस्याऽहेतुत्वेऽपि न क्षतिः । वस्तुतः शब्दाद्यात्मकनत्यादीनामपि स्वाऽव्यवहितोत्तरविघ्नध्वंसहेतुत्वात् सर्वमनघमिति । नामादिव्युदासार्थं **तीर्थेति** । तीर्थं च प्रवचनम् । स्वार्थसम्पत्तिमाह–**सदिति** । परार्थसम्पत्तिमाह–**भव्येति** ॥१॥

अथ वर्त्तमानप्रवचनोपदेष्टृतया परमासन्नोपकारित्वेन श्रीगौतमं भगवन्तं वन्दते—

**वन्दे श्रीगौतमं देवं, देवतासङ्घसेवितम् ।**
**निःशेषलब्धिसम्पन्नं, प्रथमं गणनायकम् ॥२॥**

**वन्दे इति । निःशेषेति ।** लब्धयश्च सम्भिन्नश्रोतोलब्धिप्रमुखा अनेकभेदाः । सम्भिन्नश्रोतोलब्धिश्चेयम्—

**सर्वेन्द्रियाणां विषयान्, गृह्णात्येकमपीन्द्रियम् ।**
**यत्प्रभावेन सम्भिन्न-श्रोतोलब्धिस्तु सा मता ॥"**

एवं कफौषध्यादयोऽक्षीणमहानसर्द्धि-महाप्रज्ञर्द्धि-बीजबुद्ध्यादयश्चाप्युपलक्षणीयाः ॥ २ ॥

अथ ग्रन्थकृद्, गुरुविनयत एव शास्त्रं सुविनिश्चितार्थं पूज्यं च भवतीति, स्वस्मिंश्च सम्यग्दर्शनज्ञानचारित्राणां संस्थापकत्वेन महोपकारितया सूरिभगवन्तं प्रणौति—

**श्रीमच्छ्रमणसङ्घस्या-ऽधीश्वरं योगशालिनम् ।**
**परमप्रौढसाम्राज्यं, नेमिसूरिं प्रणौमि तम् ॥३॥**

**श्रीमदिति । योगेति ।** योगश्चात्र ज्ञानदर्शनचारित्ररूपः शास्त्रोक्तविधिना श्रीप्रज्ञप्त्यादिमहायोगोद्वहनरूपश्च ॥३॥

एवं चाभिमतशास्त्रसिद्ध्युपायसद्बोधहेतुपरापरशास्त्रप्रवाहनिबन्धनं श्रीगौतमादिवर्त्तमानाचार्य-शासनसम्राट्पर्यन्तं समस्तमप्याप्तप्रवाहं हृदि निधाय प्रतिजानीते—

**सूरेर्भगवतस्तस्य, पादसेवाऽनुभावतः ।**
**जैनमुक्तावली काचिद्, विधियाऽपि विरच्यते ॥४॥**

**सूरेरिति । जैनेति ।** अनेनाऽभिधेयम् । तद्बोधश्च फलम् । तदर्थी चाऽधिकारी । सम्बन्धः स्वयमेवोह्यः ॥४॥

पदार्थमुद्दिशति—

**द्रव्यपर्यायभेदेना-ऽनेकभेदसमन्वितौ ।**
**सत्पदार्थौ समाख्यातौ, कृत्स्नभावप्रकाशिभिः ॥५।**

**द्रव्येति । सत्पदार्थाविति ।** पदार्थौ द्विविधः, द्रव्यं पर्यायश्च । सत्त्वं चोत्पादव्ययध्रौव्ययुक्तत्वं, पदार्थानां स्याद्वादमर्यादानुल्लङ्घित्वात् । स्याद्वादोऽनेकान्तवादः, नित्याऽनित्याद्यनेकधर्मशबलैकवस्त्वभ्युपगम इति यावत् । नन्वप्रच्युतानुत्पन्नस्थिरैकरूपत्वेन नित्यत्वस्य, कथमाकाशादौ नित्यपदार्थे निरुक्तसत्त्वघटनेति चेत्, न । व्योम्नो नित्याऽनित्यत्वात् । तथा ह्यवगाहकानां जीवपुद्गलानां प्रयोगाद् विस्रसातो वा एकस्मान्नभःप्रदेशात् प्रदेशान्तरमुपसर्पणे तैः सममाकाशस्यैकस्मिन् प्रदेशे विभाग उत्तरस्मिंश्च संयोगः । एवं चाकाशस्य पूर्वसंयोगध्वंसरूपपरिणत्यापत्त्या विनाशः, उत्तरसंयोगोत्पत्त्याख्यपरिणामानुभवाच्चोत्पादः । विरुद्धधर्माध्यासे धर्मिभेदस्याऽवश्यम्भावित्वात् । ध्रौव्यं चाकाशद्रव्यस्योत्पादव्यययोरधिकरणत्वेनानुगतत्वात् । तद्भावाव्ययं चात्र नित्यत्वम् । उत्पादविनाशभावेऽपि अन्वयिरूपात् तद्भावाद् यन्न व्येति तन्नित्यमिति तदर्थः । न तूक्तलक्षणम्, उत्पादव्यययोर्निराधारत्वप्रसङ्गादिति ।

एवं प्रदीपादावपि । नहि तैजसाः परमाणवो दीपपर्यायापन्ना वाताभिघातादिना तेजःपर्यायं परिहायान्धकाररूपपरिणत्यन्तरं भजन्तोऽप्येकान्तेनाऽनित्याः; पुद्गलद्रव्यरूपतयाऽवस्थितत्वात्तेषाम् । नहि पूर्वपर्यायनाश उत्तरपर्यायोत्पाद इत्येतावतैवानित्यत्वम् । नहि सुवर्णद्रव्यं हारकेयूराद्यवस्थान्तराण्यासादयदप्येकान्ततो ध्वस्तं; आबालगोपालं तेषु सुवर्णद्रव्यानुगमस्य प्रतीतत्वात् । 'घटरूपेण मृद्द्रव्यं नष्टं, न मृद्द्रव्यरूपेण नष्टं' 'घटरूपेण घटो नष्टो, न तु मृद्रूपेण' इति प्रतियन्ति च लोका अपि वस्तुनो नित्यानित्यत्वमिति ।

**अत्र नैयायिकाः,** द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावाः सप्त पदार्थाः। शक्तिसादृश्यादयो नातिरिक्ताः पदार्थाः। वह्नेरिव मण्याद्यभावस्यापि दाहादिहेतुत्वान्न मण्यादिसमवधाने दाहः। न चोत्तेजके सति प्रतिबन्धकसद्भावेऽपि कथं दाह इति वाच्यम्; उत्तेजकाभावविशिष्टमण्याद्यभावस्य हेतुताविवक्षणात्। वह्नौ दाहानुकूलानन्तशक्ति–तत्प्रागभाव–ध्वंसकल्पनायां च गौरवम्। सादृश्यमपि तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं, यथा चन्द्रसादृश्यं मुखे।

तत्र गुणक्रियाश्रयाः समवायिकारणानि पृथिवीजलतेजोवाय्वाकाशकालदिगात्ममनांसि द्रव्याणि। कार्यस्य संयोगस्य विभागस्य वा समवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धिः। गुणाश्च रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वाऽपरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्माऽधर्मशब्दाः। द्रव्याश्रिता निर्गुणा गुणाः। द्रव्याश्रितत्वं च द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वं; भवति च गुणत्वं द्रव्यत्वव्यापकतावच्छेदकं; द्रव्यत्वं कर्मत्वं वा न तथा, द्रव्यत्वत्वादिकं तु न जातिरिति तद्व्युदासः। निर्गुणत्वमपि सामान्यवत्त्वे सति कर्मान्यत्वे सति निर्गुणत्वं बोध्यमिति न जात्यादावतिव्याप्तिः। द्रव्यकर्मभिन्नसामान्यवन्निष्ठकारणतावच्छेदकतया गुणत्वजातिसिद्धिः।

तत्र चक्षुर्मात्रग्राह्यो गुणो रूपम्। रूपत्वजातिस्तु प्रत्यक्षसिद्धा। एवं नीलत्वादिकमपि तत्। शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात् सप्तविधम्। नीलपीताद्यवयवारब्धस्यावयविनो नीरूपत्वेऽप्रत्यक्षत्वप्रसङ्गात्; तत्र व्याप्यवृत्तिनीलाद्युत्पत्तौ पीतावच्छेदेनाऽपि नीलोपलब्धिप्रसङ्गात्; व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वे विरोधात्; अव्याप्यवृत्तिनीलादेरप्यनुत्पादात्, नानाजातीयरूपैरवयविनि विजातीयं चित्रं रूपमारभ्यते इति चित्ररूपसिद्धिः। इत्थं च पीताद्यारम्भे नीलादीनां प्रतिबन्धकत्वकल्पनादवयविनि न पीताद्युत्पत्तिः। एतेन स्पर्शोऽपि व्याख्यातः। रसादिकमपि नाऽव्याप्यवृत्ति। किन्तु नानाजातीयरस-

वदवयवैरारब्धेऽवयविनि रसाभावेऽपि न क्षतिः। **नव्यास्तु** अवयविन्यव्याप्यवृत्त्येव नानारूपं; प्रतिबध्यप्रतिबन्धकभावकल्पने गौरवात्, उक्तविरोधे मानाभावाच्च। एवं स्पर्शादिकमपि बोध्यमिति **वदन्तीति**।

रसनाग्राह्यो गुणो रसः। स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः। घ्राणग्राह्यो गुणो गन्धः। स द्विविधः, सुरभिरसुरभिश्च। त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। शीतोष्णाऽनुष्णाशीतभेदात् त्रिविधः। अत्र रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च, अन्यत्राऽपाकजमनित्यं नित्यं च। तत्र पृथिवीष्वपि परमाणावेव रूपादीनां पाक इति **वैशेषिकाः**। तथाहि—अवयविनाऽवष्टब्धेष्ववयवेषु पाको न सम्भवति; परन्तु वह्निसंयोगेनाऽवयविषु विनष्टेषु स्वतन्त्रेषु परमाणुषु पाकः। पुनश्च पक्वपरमाणुसंयोगाद् द्व्यणुकादिक्रमेण पुनर्महावयविपर्यन्तमुत्पत्तिरिति। **नैयायिकास्तु** द्व्यणुकादावयविन्यपि पाको भवति। तथा हि—अवयविनां सच्छिद्रत्वाद् वह्नेः सूक्ष्मावयवैरन्तःप्रविष्टैरवयवेष्ववष्टब्धेष्वपि पाको न विरुध्यते; अनन्तावयवितन्नाशकल्पने गौरवात्। इत्थं च 'सोऽयं घट' इत्यादिप्रत्यभिज्ञाऽपि सङ्गच्छते।

एकत्वादिव्यवहारहेतुः सङ्ख्या, एकत्वादिपरार्धपर्यन्ता। एकत्वं नित्यमनित्यं च। द्वित्वादिकं त्वनित्यमेव; पर्याप्तिसम्बन्धेन व्यासज्यवृत्ति अपेक्षाबुद्धिजन्यं च। अपेक्षाबुद्धिश्च 'अयमेकोऽयमेक' इत्याकारिका। तत्र प्रथममपेक्षाबुद्धिः, ततो द्वित्वोत्पत्तिः, ततो द्वित्वत्वनिर्विकल्पज्ञानं, ततो द्वित्वविशिष्टप्रत्यक्षमपेक्षाबुद्धिनाशश्च, ततो द्वित्वनाशः।

मानव्यवहारासाधारणं कारणं परिमाणम्। तच्चतुर्धा, अणु महद् दीर्घं ह्रस्वं चेति। तन्नित्यमनित्यं च। तत्राऽनित्यं त्रिधा—सङ्ख्याजन्यं परिमाणजन्यं प्रचयजन्यं च। तत्राद्यं द्व्यणुकादौ, द्वितीयं घटादौ, तृतीयं तूलकादौ। आश्रयनाशाच्चास्य नाशः। परमाणुविश्लेषे द्व्यणुकस्य नाशः, तन्नाशे च त्रसरेणुनाशः, एवं क्रमेण महावयविनो नाशस्यावश्यकत्वात्। एवं पटादौ तन्त्वन्तर-

संयोगे सति पूर्वपटनाशः ततः पटान्तरोत्पत्तिरित्यपि बोध्यम् । मूर्त्तयोः समानदेशताविरोधाच्च पूर्वतन्तव एव तन्त्वन्तरसंयोगात् पूर्वपटे सत्येव पटान्तरमारभन्त इत्यलम् ।

पृथग्व्यवहारासाधारणकारणं पृथक्त्वं, तन्नित्यतादि सङ्ख्यावत् । संयुक्तव्यवहारहेतुः संयोगः । तत्र श्येनशैलादिसंयोगोऽन्यतरकर्मजः, मेषयोः संयोग उभयकर्मजः, कपालतरुसंयोगात् तरुकुम्भयोः संयोगः संयोगजः संयोगः । तत्र कर्मजोऽप्यभिघातनोदनभेदाद् द्विधा । तत्र शब्दहेतुराद्यः, शब्दाऽहेतुर्द्वितीयः । संयोगनाशको गुणो विभागः । पूर्ववत् त्रिविधः । तृतीयो विभागजो विभागः कारणमात्रविभागजन्यः कारणाऽकारणविभागजन्यश्च । तत्राद्यो यत्रैककपाले कर्म, ततः कपालद्वयविभागः, ततो घटारम्भकसंयोगनाशः, ततो घटनाशः, ततस्तेनैव कपालविभागेन सकर्मणः कपालस्याऽकाशविभागो जन्यते, तत आकाशसंयोगनाशः, तत उत्तरप्रदेशसंयोगः, ततः कर्मनाश इति । एकस्य कर्मण आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्याऽनारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्य च विरोधान्न तेन कर्मणैव देशान्तरविभागो जन्यते । आरम्भकसंयोगप्रतिद्वन्द्विविभागवतोऽवयवस्य सति द्रव्ये देशान्तरविभागाऽसम्भवान्न द्रव्यनाशात् पूर्वमपि देशान्तरविभाग इति । एवं यत्र हस्तक्रियया हस्ततरुविभागे शरीरेऽपि विभक्तप्रत्ययो भवति, तत्र कारणाऽकारणविभागेन कार्याऽकार्यविभाग इति ।

परापरव्यवहारासाधारणकारणे परत्वाऽपरत्वे । ते च द्विविधे, दिक्कृते कालकृते चेति । तत्र बहुतरमूर्त्तसंयोगान्तरितत्वज्ञानाद् दैशिकपरत्वमुत्पद्यते, तदल्पीयस्त्वज्ञानात् तदपरत्वम् । अत्र दिक्पिण्डसंयोगोऽसमवायिकारणम् । एवं बहुतरसूर्यपरिस्पन्दान्तरितजन्मज्ञानात् कालिकपरत्वं, अल्पतरसूर्यपरिस्पन्दान्तरितजन्मज्ञानात् तदपरत्वम् । अत्र कालपिण्डयोः संयोगोऽसमवायिकारणम् । अपेक्षाबुद्धिनाशाच्च तन्नाशः ।

सर्वव्यवहारहेतुर्गुणो बुद्धिः। सा द्विधा, अप्रमा प्रमा च। तत्राऽप्रमां प्रति दोषः कारणं, स च पित्तदूरत्वादिरूपोऽनेकविधः। प्रमां प्रति पुनर्गुणः कारणं; स च प्रत्यक्षे विशेषणवद्विशेष्यसन्निकर्षः; अनुमितौ साध्यवति साध्यव्याप्यवैशिष्ट्यज्ञानं; उपमितौ शक्ये सादृश्यज्ञानं; शाब्दबोधे योग्यतायास्तात्पर्यस्य वा प्रमा इति। निर्विकल्पकं तु न प्रमा, नाऽपि भ्रमः, प्रकारतादिशून्यत्वात्।

अनुकूलवेदनीयं सुखम्। प्रतिकूलवेदनीयं दुःखम्। इच्छा कामः। सा द्विधा, फलविषयिणी उपायविषयिणी च। तत्राऽद्यां प्रति फलज्ञानं कारणं, द्वितीयां प्रति त्विष्टसाधनताज्ञानम्। सुखं दुःखाभावश्च फलम्। एवं कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयिणीच्छा चिकीर्षा; 'पाकं कृत्या साधयामी'ति तदनुभवात्। तां प्रति कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानं च कारणम्; बलवद्द्विष्टसाधनताज्ञानं प्रतिबन्धकम्। प्रयत्नः कृतिः, प्रवृत्ति—निवृत्ति—जीवनयोनियत्नभेदात् त्रिधा। तत्रेच्छाजन्या प्रवृत्तिः। अत्र कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानं बलवदनिष्टाऽननुबन्धित्वज्ञानमपि कारणम्। एवं विधेरपि प्रवर्तकत्वानुरोधेनेष्टसाधनत्वादिकमेवार्थः। आचार्यास्तु आप्ताभिप्रायो विध्यर्थः, लिङ्मात्रस्येच्छावाचित्वात्। 'स्वर्गकामो यजेते'त्यादौ यागः स्वर्गकामकृतिसाध्यतया आप्तेष्ट इत्यर्थ इति। द्वेषजन्या निवृत्तिः। जीवनादृष्टजन्यो गुणो जीवनयोनियत्नः, स चातीन्द्रियः प्राणसञ्चारकारणम्। आद्यपतनाऽसमवायिकारणं गुरुत्वं, नित्यमनित्यं च। आद्यस्यन्दनाऽसमवायिकारणं द्रवत्वं; सांसिद्धिकं नैमित्तिकं च, नित्यमनित्यं च। जलपरमाणौ नित्यमन्यत्राऽनित्यम्। चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः, नित्योऽनित्यश्च। वेगस्थितिस्थापकभावनाभेदात् संस्कारस्त्रिविधः। कर्मजवेगजभेदाद् वेगो द्विविधः, मूर्त्तमात्रवृत्तिः। अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः कटादिपृथिवीवृत्तिरतीन्द्रियः। क्षित्यादिचतुष्टयवृत्तिरिति केचित्। स्मरणप्रत्यभिज्ञाजनकः उपेक्षाऽनात्मकनिश्चयजन्यो जीववृत्तिरतीन्द्रियो भावनासंस्कारः। विहितकर्मजन्यो धर्मः स्वर्गादिसाधनम्। निषिद्ध-

कर्मजन्योऽधर्मो नरकादिसाधनम् । श्रोत्रग्राह्यो गुणः शब्दः, ध्वनि--वर्णभेदाद् द्विधा । वीचितरङ्गन्यायेन तदुत्पत्तिरिति ॥

चलनात्मकं कर्म; उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनभेदात् पञ्चधा । भ्रमणरेचनस्यन्दनोर्ध्वज्वलनतिर्यग्गमनानां गमन एवान्तर्भावः । गुणभिन्नत्वे सत्य-समवायिकारणत्वं कर्मणो लक्षणम् । कर्मत्वजातिः प्रत्यक्षसिद्धा; एवमुत्क्षेपणत्वा-दिकमपि । नित्यत्वे सति अनेकसमवेतत्वं सामान्यत्वम् । संयोगादीनां न नित्यत्वमभावस्य न समवेतत्वं गगनमानादेर्नानेकसमवेतत्वमिति तन्निरासः । तद् द्विविधं परमपरं च । परत्वमधिकदेशवृत्तित्वमपरत्वमल्पदेशवृत्तित्वम् । सर्व-जात्यपेक्षयाऽधिकदेशवृत्तित्वात् सत्तायाः परत्वं, द्रव्यत्वपृथिवीत्वादीनां परत्वम-परत्वं च; चैत्रत्वादिजातेरपरत्वमेव ।

**"व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथाऽनवस्थितिः ।**
**रूपहानिरसम्बन्धो, जातिबाधकसङ्ग्रहः ॥"**

अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः, परमाणूनां तथाऽन्येषां च नित्यद्रव्याणां परस्परभेदकः स्वत एव व्यावृत्तः । नित्यसम्बन्धः समवायः । अवयवाऽवयविनो-र्जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च स सम्बन्धः ।

द्रव्यादिषट्काऽन्योन्याभाववत्त्वमभावत्वं, तद्वानभावः । स द्विधा, संसर्गा-भावान्योन्याभावभेदात् । संसर्गाभावस्त्रिधा—विनाश्यभावः प्रागभावः, जन्याभावो ध्वंसः,नित्यसंसर्गाभावोऽत्यन्ताभावश्चेति । अन्योन्याभावभिन्नाभावः संसर्गाभावः । तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावोऽन्योन्याभावः । अत्र तत्तत्कालीनं तत्तद्भूतलादिकं तत्तदभावानां सम्बन्धः । इत्थं च भूतले घटादावपसारिते पुनरानीते च घटात्यन्ताभावस्य नित्यत्वेऽपि न तत्र घटात्यन्ताभावबुद्धिः । अत्रोत्पादविनाशशाली चतुर्थोऽयमभाव इति **केचित्** । प्रागभावध्वंसौ स्वप्रति-योगिसमवायिकारणवृत्ती । अत्र ध्वंसप्रागभावयोरधिकरणे नात्यन्ताभाव इति **प्राचां मतम्**, ध्वंसादिकालावच्छेदेनाप्यत्यन्ताभावो वर्तते इति **नव्याः** ।

अत्र ज्ञेयत्वादिकं सप्तानां पदार्थानां साधर्म्यम् । समवायित्वमनेकत्वे सति भावत्वं च पञ्चानाम् । द्रव्यादयस्त्रयः सत्तावन्तः । गुणादीनां षण्णां निर्गुणत्वं निष्क्रियत्वं च । सामान्यादीनां सामान्याऽनधिकरणत्वम् । द्रव्यस्य समवायिकारणत्वम् । गुणकर्मभिन्नानामसमवायिकारणत्वं वैधर्म्यम् । कालिकाऽन्यसम्बन्धावच्छिन्नवृत्तित्वं नित्यद्रव्याणां वैधर्म्यम् । अणुपरिमाणकालादिगतपरममहत्परिमाणातीन्द्रियसामान्यविशेषपदार्थानां च कारणत्वं वैधर्म्यं, तदितरेषां साधर्म्यम् । परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वान्नाणुपरिमाणं कारणम् । कारणत्वं चात्राऽन्यथासिद्धिशून्यत्वे सति नियतपूर्ववृत्तित्वम् । तच्च त्रिविधं, समवायिकारणत्वा—ऽसमवायिकारणत्व—निमित्तकारणत्वभेदात् । समवायसम्बन्धेन कार्याश्रयत्वं समवायिकारणत्वम् । समवाय—स्वसमवायिसमवेतत्वाऽन्यतरसम्बन्धेन समवायिकारणे प्रत्यासन्नं कारणं ज्ञानादिभिन्नमसमवायिकारणम् । उक्तकारणद्वयभिन्नकारणत्वं निमित्तकारणत्वम् । अन्यथासिद्धाः पञ्च । यत् कार्यं प्रति कारणस्य पूर्ववर्तिता येन रूपेण गृह्यते, तत्कार्यं प्रति तद्रूपमन्यथासिद्धं, यथा घटं प्रति दण्डत्वम् । यस्य स्वातन्त्र्येणाऽन्वयव्यतिरेकौ न स्तः, किन्तु कारणमादायैवाऽन्वयव्यतिरेकौ गृह्येते तं प्रति तदन्यथासिद्धं, यथा घटं प्रति दण्डरूपम् । अन्यं प्रति पूर्ववर्त्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववर्त्तित्वं गृह्यते, तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वं, यथा घटं प्रत्याकाशस्य । इदं चाऽऽकाशस्य शब्दसमवायिकारणत्वरूपाकाशत्वेनैव घटं प्रति जनकत्वे बोध्यं, शब्दाश्रयत्वेन जनकत्वे तु पञ्चमान्यथासिद्धत्वम् । यत्कार्यजनकं प्रति पूर्ववृत्तितां गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते, तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वं, यथा कुलालपितुः कुलालपितृत्वेन घटं प्रति जनकत्वे । अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तद्भिन्नत्वमन्यथासिद्धत्वं, यथा घटजातीयं प्रति रासभस्य । एवं प्रत्यक्षे महत्त्वं कारणमनेकद्रव्यत्वमन्यथासिद्धं; तत्र हि महत्त्वत्वजातेः कारणतावच्छेदकत्वे लाघवेन महत्त्वस्यैवावश्यक्लृप्तत्वम् । अत्र पञ्चमेनैव सर्वेषां सङ्ग्रहे भेदेनोपादानं शिष्यबुद्धिवैशद्यार्थमिति मन्यन्ते ।

तन्न समीचीनम् । द्रव्यपर्याययोरेव तेषामन्तर्भावात् । रूपादीनां गुणानां हि यथायथं सहभाविनि क्रमभाविनि वा पर्याय एवाऽन्तर्भावः । कर्मापि देशाद् देशान्तरप्राप्तिहेतुः परिस्पन्दात्मको ह्यर्थस्य परिणामः, स च पर्याय एव; उत्क्षेपणादीनां चात्रैवाऽन्तर्भावः । सामान्यविशेषयोश्चाऽनुगतव्यावृत्तधीहेतुतयाऽभ्युपगतयोरपि न पदार्थान्तरता । वस्तुनः सामान्यविशेषात्मकत्वेन तयोश्च कथञ्चित् तदव्यतिरेकाद् द्रव्यग्रहणेनैव ग्रहणात् । स्वभाव एव चाऽयं सर्ववस्तूनां यदनुवृत्तव्यावृत्तप्रतीती स्वत एव जनयन्ति । पट एव हि तावत् तथाविधाकृतिमान् ज्ञानविषयीभवन् सन्नपरानपि तथाऽऽकृतिमतोऽर्थान् पटरूपतया पटशब्दैकवाच्यतया च प्रत्याययन् सामान्यसंज्ञां लभते । स एव चाऽपरेभ्यः सजातीयविजातीयेभ्यो द्रव्यक्षेत्रकालभावैरात्मानं व्यावर्तयन् विशेषाख्यामश्नुते । एवं द्रव्यत्वादेरपि 'द्रव्यं द्रव्य' मित्यनुगतधीकारित्वं, 'इदं द्रव्यं न गुणो न कर्म' तिव्यावृत्तधीकारित्वं च सुप्रतीतमेवेति ।

समवायोऽप्यप्रमाणः, अंशांशिनां गुणगुण्यादीनां सम्बन्धतया भेदाभेदस्यैव सिद्धेः । एकान्तभेदेऽवयवगुरुत्वादवयविगुरुत्वोत्कर्षापत्तिः; एकान्ताभेदे चाऽन्धस्य घटादिज्ञाने तद्रूपादिधीप्रसङ्गः । एवं 'घटः पटो'–'घटो घट' इत्यादिप्रतीत्यभावादत्यन्तभिन्नाभिन्नाभ्यां व्यावृत्तं सामानाधिकरण्यमपि तत्र मानम् । न च गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया, विशिष्टधीत्वाद्, दण्डी पुरुष इति विशिष्टधीवदित्यनुमानात् समवाय एव तत्सम्बन्ध इति वाच्यम्; स्वरूपसम्बन्धेनानर्थान्तरात् । न च स्वरूपाणामानन्त्येन गौरवं, धर्मिकल्पनातो धर्मकल्पनाया लघीयस्त्वात् । किञ्चैवमभावस्याऽपि वैशिष्ट्यं सम्बन्धान्तरं सिद्ध्येत्; न च तस्याऽनित्यत्वे आनन्त्यकल्पने गौरवं, नित्यत्वे च भूतले घटानयनानन्तरमपि घटाभावधीप्रसङ्गो, घटाभावस्य तत्र सत्त्वात्, तस्य च नित्यत्वात्, वैशिष्ट्यस्य तत्र सत्त्वादिति वाच्यम् । तथापि पाकरक्ततादशायां घटे श्यामविशिष्टधीप्रसङ्गात, समवायस्य तत्र सत्त्वात, तस्य चैकत्वात् । न च तत्र तद्रूपसमवायसत्त्वेऽपि तद्रूपाऽभावान्न तद्वत्ताबुद्धिः; प्रतियोगिसम्बन्धसत्त्वे तत्सम्बन्धावच्छि-

न्नाऽभावाऽयोगात् । एतेन वायौ रूपसमवायसत्त्वेऽपि रूपाभावान्न तद्वत्ताधी-रित्यपि निरस्तम् । किञ्च, वायौ रूपवत्ताधीविरहाद् रूपाभावो रूपाभावात् तद्वत्ताधीविरह इत्यन्योन्याश्रयः । इत्थं च समवायिकारणत्वादिप्रवादोऽप्यस्तं गत इति ।

अभावस्यापि लाघवात् क्लृप्ताधिकरणत्वमेव । न चानन्ताधिकरणात्मकत्व-कल्पनापेक्षयाऽतिरिक्तकल्पनाया लघीयस्त्वमिति वाच्यम् । तर्ह्यभावाधिकरणका-ऽभावस्यातिरिक्तत्वेऽपसिद्धान्तापत्तेः, धर्मकल्पनालाघवाच्च । सप्रतियोगिकत्वं चाऽत्राऽभाववृत्त्यभावेऽन्यप्रतियोगिकत्वमिव तत्काले तद्बुद्धिजनितव्यवहारविष-यत्वादिरूपम् । एतेनाधाराधेयभावस्य तत्तदधिकरणानां तत्तदिन्द्रियाऽग्राह्यत्वात् तत्तच्छब्दरसगन्धाद्यभावप्रत्यक्षत्वस्य चाऽघटनं निरस्तम् । इत्थं च 'घटो नास्ती' त्यादावपि तदुपलक्षितं स्वरूपमेव संसर्गः । न चैवं घटकालेऽपि तदभावधीः स्यात्; यत्काले यद्द्रव्यं येन परिणमति तत्काले तस्य तत्स्वरूपत्वात् । प्राग-भावादिविशेषश्च वक्ष्यते । इत्थं चोक्तसाधर्म्यादिप्रक्रियाऽपि खण्डिता । कारणत्व-मपि लाघवादखण्डा शक्तिरेव, नियतपूर्ववर्त्तित्वादिकं च तदभिव्यञ्जकम् । मानं त्वत्र कार्योत्पत्त्यन्यथानुपपत्तिः । सामग्र्या ह्यपि प्रतिनियतायाः प्रतिनियतकार्य-कारित्वमतीन्द्रियशक्तिमन्तरेणाऽसम्भाव्यम् । उत्पत्तिश्चास्याः शक्तादेव । बीजा-ङ्कुरादिवदनादित्वाच्च तत्प्रवाहस्य नानवस्था दोषाय, अदृष्टवत् । एवं च दाहा-दिकं प्रति मण्याद्यभावस्य कारणत्वाकल्पनलाघवमपि । कार्यमपि सदसदात्मकम्, सर्वथा सतोऽसतो वाऽकरणात् । कथञ्चिच्छक्तिरूपेण सत् कार्यं, न तु व्यक्तिरूपे-णेति चेत्, तर्हि भावानां द्रव्यपर्यायशक्त्यात्मकत्वात् शक्तिर्द्रव्यं तद्रूपतया सतः पर्यायरूपतया चाऽसतो घटादेरुत्पत्त्यभ्युपगमे सिद्धमिष्टं नः । इत्थं च सप्तपदा-र्थान्तर्भूतप्रमाणप्रमेयादिषोडशानामप्यतिरिक्तत्वं परास्तमिति कृतं विस्तरेण ॥५॥

द्रव्याणि विभजते—

**धर्माधर्मनभोजीव–पुद्गलानेहसस्तथा ।**
**द्रव्याणि गुणपर्याय–वत्त्वं तत्त्वमुदाहृतम् ॥६॥**

**धर्मेति ।** धर्मास्तिकायाऽधर्मास्तिकायाऽऽकाशास्तिकायजीवास्तिकायपुद्गलास्तिकायकाला द्रव्याणि । गतिपरिणामवतामपि जीवपुद्गलानां नाऽलोके गतिरिति गतिविरहान्यथानुपपत्त्या तत्र गत्यपेक्षाकारणद्रव्याभावे सिद्धे तत्प्रतियोगितया धर्मास्तिकायसिद्धिः । यद्वा 'गतिलक्षणं पुद्गलास्तिकायादिकार्यं विशिष्टकारणप्रभवं, विशिष्टकार्यत्वात् शाल्यङ्कुरादिकार्यवदि' त्यनुमानात् तत्सिद्धिः । एवं स्थितिकायोत्सर्गशयनादिस्थिरभावोपष्टम्भकारणतया अधर्मास्तिकायसिद्धिः । आकाशमपि 'द्रव्याणि यत्किञ्चिदधिष्ठितानि, साधारत्वान्यथाऽनुपपत्ते' रित्यनुमानादाधारैकस्वभावं सिद्ध्यति । प्रतिप्राणि स्वसंवेदनप्रमाणसिद्धचैतन्यान्यथाऽनुपपत्त्या आत्मसिद्धिः । चक्षुरादीनां ज्ञानकरणानां कर्त्तारं विना फलोपधानानुपपत्त्याऽपि तत्सिद्धिः । न हि चैतन्यं देहस्य धर्मः, आनुरूप्याऽभावेन जलकाठिन्ययोरिव धर्मधर्मिभावाऽनुपपत्तेः । एवं शरीरस्य चैतन्ये बाल्ये दृष्टस्य यौवनादौ स्मरणं न स्यात् । अवयवोपचयापचयैः परिमाणभेदेन देहभेदस्यावश्यकत्वाद्, अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावनियमादन्येनाऽनुभूतस्याऽन्येन स्मरणाऽसम्भवाच्च । पूर्वशरीरसंस्कारेणोत्तरशरीरसंस्कारोत्पादने संस्कारानन्त्यप्रसङ्गः । किं चैवं बालकस्य स्तनपानादौ कपिशिशूनां शाखावलम्बने च प्रवृत्तिर्न स्यात्; तद्धेत्विष्टसाधनतानुभवस्य तदानीमभावात् । अत्र तु भावान्तरानुभूतेष्टसाधनत्वस्मरणादेव प्रवृत्तिः । उद्बोधकाभावाच्च नान्यत् स्मरणं, सति तूद्बोधके भवत्यपि । नापि चक्षुरादीनां चैतन्यं; एवं हि पूर्वं चक्षुषाऽनुभूतानां चक्षुर्नाशे स्मरणं न स्यादनुभवितुरभावात् । मनोऽपि न चेतनः, पौद्गलिकत्वात् । यत्तु मनसि चैतन्याङ्गीकारे ज्ञानादिप्रत्यक्षं न स्यात्, महत्त्वस्य तद्धेतुत्वान्मनसश्चाऽणुत्वादिति । तन्न । तदणुत्वाऽसिद्धेः ।

**ननु "ज्ञानाद्वैतमेव;** बाह्यार्थस्याऽसिद्धेः । जडस्य हि न स्वप्रकाशः । परप्रकाशादपि न तत्सिद्धिः; नीलसुखादिव्यतिरिक्तविज्ञानाऽसंवेदनात् । नीलादिकं तस्यैवाकारविशेषः, भावत्वादेव चाऽस्य क्षणिकत्वम् । पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञान त्हेतुवात् सुषुप्तावप्यालयविज्ञानधाराऽस्त्येव, पूर्वपूर्वविज्ञान-

जनितवासनाया उत्तरोत्तरविज्ञाने संक्रमान्नानुपपत्तिः स्मृतेः । तथा चाऽऽत्मापि क्षणिकविज्ञानमेव; तस्य स्वप्रकाशत्वाच्चेतनत्वमिति" चेत् ।

**मैवम्** । अन्तर्बहिर्भासमानतया नीलसंविदोर्भेदात् । न च सहोपलम्भादभेदः, सहार्थस्यैवाऽभेदाऽसहत्वात् । किञ्च तस्य सर्वविषयकत्वे सार्वज्ञ्यापत्तिः, यत्किञ्चिद्विषयकत्वेऽपि विनिगमनाविरहः । 'अहं ज्ञान'मित्यननुभवश्च । सुषुप्तावपि विषयभानप्रसङ्गः स्यात्, तदा निर्विषयत्वे चित्त्वाऽयोगात् । घटाद्याकारस्य ज्ञानस्वभावत्वे च 'ज्ञानं घट' इत्यपि प्रमा स्यात् । किञ्चाकारस्य तद्भिन्नत्वे ज्ञानाऽद्वैतव्याघातः, अनतिरिक्तत्वे च चित्रज्ञाने नीलाकारोऽपि पीताकारः स्यात्; ज्ञानस्य स्वरूपतोऽविशेषात्, अन्यथा क्वापि विरोधावधारणं न स्यात् । न वा वासनासङ्क्रान्तिर्मातापुत्रयोरपि तत्प्रसङ्गात् । नचोपादानोपादेयभावो नियामको, वासनायाः सङ्क्रमाऽयोगात् । न चोत्तरस्मिन्नुत्पत्तिरेव सङ्क्रमः, तदुत्पादकाभावात्; चितां चोत्पादकत्वे तदानन्त्यप्रसङ्गः । नापि क्षणिकविज्ञानेष्वतिशयविशेषकल्पना, मानाभावात्, कल्पनागौरवाच्च । एतेन क्षणिकशरीरेष्वेव चैतन्यं प्रत्युक्तं, 'स एवाय' मित्यापामरप्रत्यभिज्ञानाच्च । इत्थं च बीजादावपि न कुर्वद्रूपत्वकल्पनं, सहकारिलाभालाभाभ्यामेव कार्यकरणाऽकरणयोरुपपत्तेरिति ।

एतेन '**एकमेवाऽद्वितीयं ब्रह्म, नेह नानाऽस्ति किञ्चन**; तच्च निर्विकल्पकमविद्यया भेदरूपं प्रकाशते । तथा च '**नित्यं विज्ञानमेवात्मा**, "**अविनाशी वाऽरेऽयमात्मा**" "**सत्यं ज्ञानमनन्तं ब्रह्मे**" ति श्रुते' रिति निरस्तम् । श्रुतेरमानत्वाच्च । '**सत्यं ज्ञान**' मिति तु ब्रह्मपरं; ज्ञानाज्ञानसुखित्वदुःखित्वादिभिर्जीवानां भेदात् सुतरामीश्वरभेदः । अत एव 'द्वे ब्रह्मणी वेदितव्ये' इत्यपि श्रूयते । अन्यथा बन्धादिव्यवस्था न स्यात् । न च '**तत्त्वमसी**' त्यभेदे मानं; तस्याः स्तुत्यर्थवादत्वेन ईश्वराऽभेदभावनाविषयकयत्नपरत्वात् । अत एव '**सर्वे एते आत्मानः समर्पिता**' इत्यपि सङ्गच्छते । न चाऽज्ञाननिवृत्तौ मोक्षदशायामभेदः; भेदस्य नित्यत्वात्; अनित्यत्वेऽपि व्यक्तिद्वयं स्थास्यत्येव । न च द्वित्वस्याऽपि

नाशः; तत्र निर्धर्मके ब्रह्मणि सत्यत्वाऽभावेऽपि सत्यस्वरूपं तदितिवद् द्वित्वाऽभावेऽपि व्यक्तिद्वयात्मकौ ताविति सुवचत्वात्। तत्र तदात्मको मिथ्यात्वाभावः सत्यत्वमिति चेत्, व्यक्तिद्वयात्मक एकत्वाभावो द्वित्वमित्यप्युच्यताम्। प्रत्येकमेकत्वेऽपि' पृथिवीजलयो र्न गन्ध' इतिव'दुभयं नैक' मित्यस्य सर्वसिद्धत्वात्। **'ब्रह्मविद् ब्रह्मैव भवती'**–त्यपि निर्दुःखत्वादिना साम्यपरं, सम्पदाधिक्ये 'पुरोहितोऽयं राजा संवृत्त' इतिवत्। अत एव **'निरञ्जनः परमं साम्यमुपैती'** त्यपि श्रूयते। किञ्चाऽविद्यायाः सत्त्वे द्वैतापत्तिः, असत्त्वे तु भेदाभासोऽनिबन्धनः स्यात्। ब्रह्माऽभिन्नैव सा भेदनिबन्धनमित्यपि न; प्रमाणाभावात्, भावे वा द्वैतापत्तिरिति।

एतेन त्रिगुणमायाशबलाच्चिदात्मनोऽपञ्चीकृतानि तन्मात्रपदवाच्यानि पञ्चभूतानि जायन्ते। एतैश्च सत्त्वगुणोपेतैर्व्यस्तैः क्रमेण पञ्चज्ञानेन्द्रियाणि, समस्तेभ्यश्च मनोबुद्ध्यहङ्कारचित्तानि। रजोगुणोपेतैश्च तैः पञ्च कर्मेन्द्रियाणि, समस्तेभ्यश्च पञ्च वायवः। तैरेव तमोगुणोपेतैः पञ्चीकृतभूतानि। एवं मायाप्रतिबिम्बमीश्वरचैतन्यमन्तःकरणप्रतिबिम्बं जीवचैतन्यमुभयसाधारणं चैतन्यमात्रं **बिम्बमित्यादि निरस्तम्।**

स्वभावेन प्रयोगेण वा यत् संयुज्यते वियुज्यते चेत्येवं पूरणगलनस्वभावं तत् पुद्गलास्तिकायद्रव्यं प्रतीतमेव। शीतातपादीनामृतुविभागेन भवनान्यथानुपपत्त्या तन्नियतहेतुतया कालसिद्धिः। अस्तिकायश्चाऽत्र प्रदेशसङ्घातः। तत्र सकलदेशप्रदेशानुगतसमानपरिणतिमद्विशिष्टं द्रव्यं धर्मास्तिकायः। एवं तस्यैव धीकल्पितो द्व्यादिप्रदेशात्मको भागस्तद्देशः। तथैव निरंशो भागस्तत्प्रदेशः। एवमधर्मास्तिकायादिप्रकारोऽपि भाव्यः। लक्षणमाह–**गुणेति। एतेन** पूर्वोक्तानि क्षित्यादीनि नव द्रव्याणीति **निरस्तम्।**

### (नैयायिकाभिमत)नवद्रव्यस्वरूपं चैवम् :–

तत्र गन्धस्नेहोष्णस्पर्शविजातीयस्पर्शसुखादिसमवायिकारणतावच्छेदकतया क्रमेण पृथ्वीत्व–जलत्व–तेजस्त्व–वायुत्वा–त्मत्वजातिसिद्धिः। स्नेहत्वस्य नित्या-

ऽनित्यवृत्तित्वेन कार्यतावच्छेदकत्वे, नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भाव-नियमस्य प्रामाणिकत्वे च, जन्यस्नेहजनकतावच्छेदकतया जन्यजलत्वजाति-सिद्ध्या तज्जनकतावच्छेदकतया जलत्वजातिसिद्धिः परमाणावपि भाव्या । एवं तेजस्त्वादिकमपि बोध्यम् । आकाशत्वादिकं त्वेकव्यक्तिवृत्तित्वेन जातिरेव न । मानसप्रत्यक्षकारणतावच्छेदकतया च मनस्त्वं जातिः । अत्र गुणविभाग एवम् :—

"स्पर्शादयोऽष्टौ वेगश्च, द्रवत्वं च गुरुत्वकम् ।
रूपं रसस्तथा गन्धः, क्षितावेते चतुर्दश ॥
गन्धहीनाः स्नेहयुक्ता, वारिण्येते चतुर्दश ।
स्पर्शाद्यष्टौ रूपवेगौ, द्रवत्वं तेजसो गुणाः ॥

स्पर्शादयोऽष्टौ वेगश्च, वायौ व्योम्नि सशब्दकाः ।
पञ्च सङ्ख्यादयः काल—दिशोः सङ्ख्यादिपञ्चकम् ॥

बुद्ध्यादिषट्कं सङ्ख्यादि—पञ्चकं भावना तथा ।
धर्माधर्मौ गुणा एते—आत्मन स्युश्चतुर्दश ॥

सङ्ख्यादिपञ्चकं बुद्धि—रिच्छा यत्नोऽपि चेश्वरे ।
सङ्ख्याधीच्छासुखं यत्नः, पञ्चैवाऽत्रेति नूतनाः ॥
परापरत्वे सङ्ख्यादि, पञ्च वेगश्च मानसे ॥" इति ।

तत्र गन्धवती पृथिवी । अत्र रूपं शुक्लादि नाना, अत्रैव पाकेन नानारूप-सम्भवः । नानारूपत्वं च रूपद्वयवद्वृत्ति—रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजाति-मत्त्वं; इत्थं च यत्राऽनेकरूपं नोत्पन्नं तत्र पीलुपाकमतेऽवयविनि च नाऽव्याप्तिः। एवमग्रेऽपि बोध्यम् । रसो मधुरादिः षड्विधः । गन्धः सौरभासौरभभेदेन द्विधा । स्पर्शः पाकजोऽनुष्णाशीतः । लक्षणं तु पाकजस्पर्शवत्त्वमात्रं, तच्च पाक-जस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजतिमत्त्वं, तेन पटादौ नाऽव्याप्तिः । द्रवत्वं त्वत्र नैमित्तिकम् । स्नेहस्तु घृतादौ तदन्तर्वर्तिजलस्यैव । सा नित्याऽनित्या च । नित्या परमाणुरूपा, अनित्या द्व्यणुकादिरूपा सर्वा; सैवाऽवयववती । इयं च

शरीरेन्द्रियविषयभेदात् त्रिधा। शरीरं मानुषसर्पोद्भिज्जादीनां; गन्धादिमत्त्वाच्चैतच्छरीराणां पार्थिवत्वम्। न च क्लेदादिमत्त्वादाप्यत्वादिकमपि स्यात्, जलत्वपृथिवीत्वादिना साङ्कर्यात्। शरीरत्वं च चेष्टाश्रयत्वं, न तु जातिः, पृथिवीत्वादिना साङ्कर्यात्। हस्तादौ शरीरत्वाऽव्यवहारे अन्त्यावयविमात्रवृत्ति–चेष्टावद्वृत्ति द्रव्यत्वव्याप्यजातिमत्त्वं तद् बोध्यं; तादृशी च जातिर्मानुषत्वादिः, तेन मृतशरीरेऽपि नाऽव्याप्तिः। नृसिंहत्वमपि जातिरेव, कल्पभेदेन तच्छरीरनानात्वादिति नरसिंहशरीरेऽपि नाऽव्याप्तिः। इन्द्रियं घ्राणेन्द्रियं, तच्च पार्थिवं, रूपादिषु मध्ये गन्धस्यैवाऽभिव्यञ्जकत्वात्, कुङ्कुमगन्धाभिव्यञ्जकगोघृतवत्। घ्राणेन्द्रियसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम्। इन्द्रियत्वं च शब्देतरोद्भूतविशेषगुणाऽनाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम्। उपभोगसाधनं विषयो द्व्यणुकादिर्ब्रह्माण्डान्तः। सर्वमेव हि कार्यं साक्षात् परम्परया वाऽदृष्टद्वारोपभोगं जनयत्येवेति। शीतस्पर्शवज्जलं, स ह्येवात्र स्पर्शः। क्वचिदुष्णस्पर्शस्त्वौपाधिकः। रूपं शुक्लमेव। तद्घटितं लक्षणं तु भास्वरशुक्लेतररूपाऽसमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं, तेन स्फटिकादौ नाऽतिव्याप्तिः। कालिन्दीजलादौ नीलिमोपलब्धिर्भ्रान्तिरेव, नीलजनकतावच्छेदकपृथिवीत्वजातेस्तत्राऽभावात्। रसो मधुर एव, हरीतक्यादिभक्षणानन्तरं माधुर्योपलब्धेः। द्रवत्वं सांसिद्धिकम्। नित्यत्वादिकं पूर्ववदेव। शरीरं तु जलीयमयोनिजमेव, तच्च वरुणलोके। अत्र जलीयतैजसीयवायवीयशरीराणां पार्थिवभागोपष्टम्भादुपभोगक्षमत्वं, जलादीनां प्राधान्याच्च जलीयत्वादिकम्। इन्द्रियं रसनेन्द्रियं, तच्च जलीयं, गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात्, सक्तुरसाभिव्यञ्जकोदकवत्। विषयः समुद्रहिमादयः। उष्णस्पर्शवत्तेजः। चन्द्रकिरणादौ तदन्तर्वर्त्तिजलस्पर्शेनाभिभवाद् रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवाच्चक्षुरादौ चाऽनुद्भूतत्वात्तदग्रहः। रूपं शुक्लभास्वरं, वैश्वानरे मरकतकिरणादौ च पृथ्वीरूपेणाऽभिभवात्तदग्रहः। द्रवत्वं नैमित्तिकं सुवर्णादौ। नित्यत्वादिकं पूर्ववत्। शरीरमयोनिजं सूर्यलोकादौ। इन्द्रियं चक्षुरिन्द्रियं, तच्च तैजसं, परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्य-

ञ्जकत्वात्, प्रदीपवत् । विषयो वह्निसुवर्णादयः । अत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानजन्यद्रवत्ववत्त्वाच्च सुवर्णस्य तैजसत्वम् । अपाकजाऽनुष्णाऽशीतस्पर्शवान् वायुः । अयं न प्रत्यक्षः; किन्तु विजातीयस्पर्शेन, विलक्षणशब्देन, तृणादीनां धृत्या, शाखादीनां कम्पनेन चाऽनुमीयते । नित्यतादि पूर्ववत् । शरीरमयोनिजं पिशाचादीनाम् । इन्द्रियं स्पर्शनेन्द्रियं देहव्यापि, तच्च वायवीयं, रूपादिषु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वाद्, अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवत् । विषयः प्राणादिर्महावायुपर्यन्तः । प्राणश्चैकोऽपि स्थानभेदात् क्रियाभेदाच्च नानासंज्ञावान् । शब्दाश्रय आकाशम् । इदं चैकमपि कर्णशष्कुलीभेदाद् भिन्नं श्रोत्रेन्द्रियात्मकं भवति । प्रथमं तावत् शब्दस्य चक्षुर्ग्रहणाऽयोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वेन विशेषगुणत्वे सिद्धे, तेन द्रव्यसमवेतत्वे सिद्धे, अग्निसंयोगाऽसमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वेन स्पर्शवद्विशेषगुणत्वबाधे, विशेषगुणत्वेन दिक्कालमनोगुणत्वबाधे, बहिरिन्द्रियग्राह्यत्वेन चात्मविशेषगुणत्वबाधे, परिशेषतः शब्दाधिकरणं नवमं गगनात्मकं द्रव्यं सिद्ध्यति । न च वाय्ववयवेषु सूक्ष्मशब्दक्रमेण कारणगुणपूर्वक एव शब्दः; अयावद्द्रव्यभावित्वेन वायुविशेषगुणत्वाऽभावात् । ज्येष्ठत्वकनिष्ठत्वादिधीहेतुः कालः; कालिकपरत्वाऽसमवायिकारणसंयोगानुयोगी, जन्यं प्रति निमित्तकारणं; सर्वाधारश्च । तथा हि—'इदानीं घट' इति ज्ञाने सूर्यपरिस्पन्दरूपैतत्काले घटस्याऽऽधारता भासते । सा च स्वसंयुक्तसंयोगितपनाश्रितत्वसम्बन्धेनैवेति तद्घटकतया सिध्यन् काल आधार एव । एकोऽप्ययमुपाधिभेदात् क्षणादिव्यवहारविषयः । उपाधिश्च स्वजन्यविभागप्रागभावावच्छिन्नं कर्म, पूर्वसंयोगावच्छिन्नविभागो वा, पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वा, उत्तरसंयोगावच्छिन्नं कर्म वा । महाप्रलये तद्व्यवहारस्तु चरमध्वंसेनैव । दिनादिव्यवहारस्तु तत्तत्क्षणकूटैरेवेति । दैशिकपरत्वापरत्वबुद्धेरसाधारणकारणं दिक् । उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक् । यत्पुरुषस्योदयगिरिसन्निहिता या दिक् सा तस्य प्राची, तद्व्यवहिता प्रतीची; सुमेरुसन्निहितोदीची, तद्व्यवहिता त्ववाची; "सर्वेषामेव वर्षाणां, मेरुरुत्तरतः स्थित" इति नियमात् । ज्ञानाधिकरणमात्मा । स द्विविधो जीवात्मा परमात्मा च । तत्र

जीवात्मेन्द्रियाद्यधिष्ठाता विभुः। 'अहं जाने' इत्यादिप्रतीतेश्च ज्ञानसुखादि-योग्यविशेषगुणसम्बन्धेन प्रत्यक्षः। यतोऽहमिति प्रत्यक्षविषयत्वमात्मनः, अत एव सुषुप्तौ नाध्यक्षः। परदेहे रथक्रियया सारथिरिव चेष्टयानुमेयः, प्रयत्नसाध्यत्वा-च्चेष्टायाः। नित्यज्ञानादिमानीश्वरः। अत्रात्मत्वजातिरस्तीति **केचित्**। नास्ती-**त्यन्ये**। क्षित्यादीनां कर्तृतयाऽस्य सिद्धिः। 'द्यावाभूमी जनयन् देव एक' इति श्रुतेश्च। सुखादिसाक्षात्कारकारणं मनः। सुखदुःखादिसकलसाक्षात्कार-करणतया लाघवादेकस्यैव मनसः सिद्धिः। एवं सुखाद्यसमवायिकारणसंयोगा-श्रयो मनः। तच्चाणु, ज्ञानानामयौगपद्यात्। नापि सङ्कोचविकासशालि, अनन्ता-वयवतन्नाशादिकल्पनागौरवात्। **दीधितिकृतस्तु** पृथ्वी, जलं, तेजो, वायु-रात्मेति पञ्चैव द्रव्याणि; दिक्कालाकाशा नेश्वरादतिरिक्ताः; त्रसरेण्वात्मकं च मन इति। अत्र पृथ्व्यादीनां नवानां द्रव्यत्वं गुणवत्त्वं च साधर्म्यम्। मनसः पृथिव्यादिचतुर्णां च परत्वाऽपरत्वक्रियावेगवत्त्वमूर्त्तत्वानि। परत्वादिमत्त्वं च परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं, एवमग्रेऽपि बोध्यम्, तेन यत्र घटादौ परत्वादिकं नोत्पन्नं तत्र नाऽव्याप्तिः। नभश्चतुष्कस्य विभुत्वं परम-महत्परिमाणवत्त्वं च। क्षितिपञ्चकस्य भूतत्वम्। तच्च बहिरिन्द्रियजन्यलौकिक-प्रत्यक्षविषयस्वरूपयोग्यविशेषगुणवत्त्वं; तेनोपनीतभानमादाय नात्मन्यतिप्रसङ्गो न वा परमाण्वादावव्याप्तिः। यद्वा आत्माऽवृत्तिविशेषगुणवत्त्वं तत्त्वम्। आद्य-चतुष्कस्य स्पर्शवत्त्वं द्रव्यसमवायिकारणत्वं च। आकाशात्मनामव्याप्यवृत्ति-विशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं च। स्वसमानाधिकरणात्यन्ताभावप्रतियोगि-त्वमव्याप्यवृत्तित्वम्। क्षणिकत्वं च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वं; योग्यविभुवि-शेषगुणानां स्वोत्तरवर्तिविशेषगुणनाश्यत्वनियमात्; चतुःक्षणवृत्तिजातिमत्त्वमिति तु तत्त्वम्। तादृशो गुणः शब्दो बुद्ध्यादिश्च। पृथिव्यप्तेजसां रूपवत्त्वं द्रवत्ववत्त्वं प्रत्यक्षविषयत्वं च। चक्षुरादीनां वाय्वानीतपृथिव्यादिभागानां च तेजस्त्व-पृथ्वीत्वादिना रूपमुन्नेयम्। द्रवत्ववत्त्वं द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं, तेन घटादौ वह्न्यादौ च नाऽव्याप्तिः। प्रत्यक्षविषयत्वं च चाक्षुषलौकिकप्रत्यक्ष-

विषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं तेन न परमाण्वादावव्याप्तिरतिव्याप्तिश्च रूपादौ। क्षितिजलयो रसवत्त्वं गुरुत्ववत्त्वं। घ्राणादीनामपि तत्त्वेन तदुन्नेयम्। पृथिवीतेजसोर्नैमित्तिकद्रवत्ववत्त्वं, तच्च तत्समानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वम्। पृथिव्यप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वं साधर्म्यम्। यस्य यत् साधर्म्यं, ज्ञेयत्वादि विना, तदितरेषां वैधर्म्यं बोध्यमिति द्रव्यस्वरूपम्।

**तदेतन्न सम्यक्।** तथा हि–पृथिव्यप्तेजोवायुमनांसि तावत् पुद्गलद्रव्यमेव, मूर्त्तक्रियावत्त्वात्। आत्मपरिणमिता वा पृथ्व्यादयः पुद्गला जीवा एव, मनुजादिवत्। भावमनस्त्वात्मगुण एवेति न तेषां पृथग् द्रव्यत्वम्। पृथ्व्यादिपरमाणव एव हि प्रयोगविस्रसाभ्यां जलादित्वेन परिणमन्ति। जातिभेदेनाऽत्यन्तं तेषां भेदे चान्योन्यमुपादेयभावो न स्यात्, अस्ति चाऽयं; चन्द्रकान्ताज्जलस्य, जलान्मुक्ताफलादेः, काष्ठादनलस्यानिलाज्जलस्य चोत्पत्तेरानुभविकत्वात्। यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत् तदुपादानोपादेयमिति नियमाच्च। दृष्टं चैतत् खण्डपटे महापटध्वंसजन्ये, करकाध्वंसजन्ये जले, पाषाणध्वंसजन्ये भस्मनि च। अत एव च पाषाणभस्मपरमाणूनामैक्येन पाषाणस्यापि गन्धवत्त्वम्। इत्थं च गन्धः पृथ्व्यामेव, स्नेहो जल एव, रूपवत्त्वं क्षित्यादित्रयाणामेवेत्यादि निरस्तम्; पाषाणादौ गन्धस्येव पृथ्व्यादौ सर्वत्र स्नेहादेः सिद्धेः; अनुत्कटत्वाच्चाऽप्रत्यक्षम्। एवं च गन्धं प्रति पृथिवीत्वेन, स्नेहं प्रति जलत्वेनेत्यादिकारणताभेदाऽकल्पनलाघवमपि। पुद्गलत्वेनैव रूपादिकं प्रति कारणतायां लघीयस्त्वात्। एतेन लक्षणान्यपि खण्डितानि ॥६॥

धर्मादीन् लक्षयति–

**गत्युपकारकोऽसङ्ख्य–प्रदेशोऽरूपिनिष्क्रियः।**
**एकद्रव्यं समाख्यातो, धर्मो धर्मोपदेशिभिः ॥७॥**

**गतीति।** स्वत एव गतिपरिणामवतां जीवपुद्गलानां गतेरपेक्षाकारणं धर्मास्तिकायः। उपकारो हि सर्वत्र गतिस्थित्यवगाहपरिणतद्रव्यसामीप्येन व्या-

म्रियमाणतैव । धर्मास्तिकायाऽधर्मास्तिकायलोकाकाशास्तिकायैकजीवास्तिकायानां प्रत्येकमसङ्ख्येयाः प्रदेशाः । अलोकाकाशस्याऽनन्ताः । पुद्गलानां सङ्ख्येया-असङ्ख्येया अनन्ताश्च । नाऽणोः प्रदेशाः । अत्रेदं बोध्यम्; द्वये प्रदेशाः, द्रव्य-रूपाः पर्यायरूपाश्च । तत्र रूपादयः पर्यायरूपाः, तैरणुरपि सप्रदेशो बोध्यः । पुद्गलवर्जानि धर्मास्तिकायादीनि अरूपीणि । जीवपुद्गलवर्जानि एतानि निष्क्रि-याणि । जीवाः–पुद्गलाश्चैतो देशान्तरमास्कन्दन्तः समुपलभ्यन्तेऽतः क्रियावन्तः । धर्मादयस्तु पूर्वावष्टब्धप्रदेशात् प्रदेशान्तरमपि विचलितुमनुत्सहमाना देशान्तर-प्राप्तिलक्षणक्रियाधारतां कथं प्रतिपत्स्यन्ते ? । उत्पादविगमलक्षणा क्रिया तु सर्वत्र सदाऽस्त्येव । एवं जीवपुद्गला अनेकद्रव्याणि, शेषाणि त्वेकद्रव्याण्येव । नैषां समानजातीयानि द्रव्यान्तराणि सन्तीति भावः ॥७॥

**तथैवाऽधर्म आदिष्टः, परं स्थित्युपकारकः ।**
**अवगाहद आकाशो, वस्तूनामवगाहिनाम् ॥८॥**

**तथैवेति ।** पूर्वोक्तस्वरूप इत्यर्थः । अधर्मास्तिकायः स्वत एव स्थितिपरि-णामवतां जीवपुद्गलानां स्थितेरपेक्षाकारणम् । अवगाह्यमानधर्मादिद्रव्याणाम-वगाहनेऽपेक्षाकारणमाकाशम् ; न पुनरनवगाहमानं पुद्गलादि बलादवगाहयति । अत्र धर्माऽधर्मप्रदेशानां लोकाकाशप्रदेशाभ्यन्तरवर्त्तित्वात्तयोरन्तरवकाशदानेनो-पकरोति । पुद्गलजीवानां तु स्वल्पतराऽसङ्ख्येयप्रदेशव्यापित्वात् क्रियावत्त्वाच्च संयोगैर्विभागैश्चाप्युपकरोति । अत्रैकस्याप्यवगाहस्यावगाह्योपाधिभेदान्नानात्वेऽपि न क्षतिरिति ॥ ८ ॥

**अनन्तोऽयं प्रदेशैश्च, लोकालोकविभागभाक् ।**
**तदसङ्ख्येयभागादि–ष्वात्मनामवगाहना ॥९॥**

**आसमस्ताच्च लोकात् सा–ऽजीवानां त्ववगाहना ।**
**मूर्त्ताऽमूर्त्तप्रभेदेन, द्विविधाद्यावगाहना ॥१०॥**

**एकप्रदेशमुख्येष्व–प्युक्ताऽन्या तत्र सर्वतः ।**
**प्रदेशानां हि संहार–विसर्गौ स्तः प्रदीपवत् ॥११॥**

**अनन्तोऽयमिति** । आकाशस्याऽनन्ताः प्रदेशाः । आकाशं शुषिरलक्षण-मेकरूपं तद्धर्मादिद्रव्यैरवगाढं लोकाकाशमित्युच्यते, तच्छून्यं त्वलोकाकाशमिति । यत्राङ्गुलाऽसङ्ख्येयभागप्रमाणैरसङ्ख्यैर्भागैरसङ्ख्येया लोकाकाशप्रदेशा विभ-ज्यन्ते, तत्रैकस्मिन्नसङ्ख्येयप्रदेशे वियत्खण्डे जघन्यत एकजीवस्यावगाहो भवति, कस्यचित् पुनस्तादृशे खण्डद्वये; कस्यचित्तादृशेषु त्रिषु खण्डेष्वित्यादि । **आस-मस्ताच्चेति** । केवलिनः पुनः समुद्घातकाले सकललोकाकाशेऽवगाहो भवति; अलोकस्य त्वेकमपि प्रदेशं स नाक्रामति ।

अथ धर्मास्तिकायादीनामजीवानामवगाहनामाह–**अजीवानां त्विति** । सा द्विविधा, मूर्त्तावगाहनाऽमूर्त्तावगाहना च । तत्राद्या पुद्गलानाम् । सा चैकप्रदेशादिषु भाज्या; तद्यथा–परमाणोरेकस्मिन्नेव प्रदेशेऽवगाहना, द्व्यणुकस्यैकस्मिन् द्वयोर्वा, त्र्यणुकस्यैकस्मिन् द्वयोस्त्रिषु वा; एवं यावत् सङ्ख्येयाऽसङ्ख्येयाऽनन्तप्रदेशस्य च स्कन्धस्यैकादिषु सङ्ख्येयेष्वसङ्ख्येयेषु वा प्रदेशेष्ववगाहना बोध्या । अचित्त-महास्कन्धस्य तु केवलिसमुद्घातवत् समस्तलोकेऽपि सा । यथैकप्रदीपप्रभाव-भासिते भूमिगृहे प्रदीपसहस्रप्रभापुद्गलानामप्यनुप्रवेशो दृष्टस्तद्वदेकस्मिन्नेव नभःप्रदेशे घनपरिणतिविशेषेणानन्तपरमाणुस्कन्धस्याप्यवस्थानं न विरुद्धमिति । द्वितीयामाह–**अन्येति** । धर्मास्तिकायाऽधर्मास्तिकाययोः कृत्स्ने लोकाकाशेऽव-गाह इति । नन्वसङ्ख्येयभागादिषु जीवानामवगाहे को हेतुरित्यत आह–**प्रदेशानामिति** । यथा प्रदीपः स्वल्पेऽवकाशे सङ्कोचमास्थायास्ते महति चोपघ्ने विकाशं भजते, तथाऽऽत्मप्रदेशानां सङ्कोचविकाशधर्मत्वात् प्रकर्षप्राप्तसङ्कोच-स्यात्मनो लोकस्यैकस्मिन्नसङ्ख्येयभागेऽवस्थानं, प्रकृष्टविकाशप्राप्तस्य च केवलिनः सर्वलोकेऽवगाहो, मध्यमावस्था चाऽनेकभेदेति । अनन्तानन्तप्रदेशप्रचित-कार्मणशरीरोपश्लेषाच्च जघन्यतोऽप्यसङ्ख्येयप्रदेशावगाहितैव, नैकादिप्रदेशावगा-हिता; जीवस्य स्वभावो ह्ययमिति ॥ ९–१०–११ ॥

**एवं जीवोऽपि विज्ञेयो, विशेषस्तूपदर्श्यते ।**
**अविभुः सक्रियश्चाथाऽनेकद्रव्यं वपुर्मितः ॥१२॥**

**एवमिति ।** असङ्ख्येयप्रदेशः सङ्कोचविकाशस्वभावो जीवः । अत एव कीटिकाहस्तिजीवयोरैक्यम् । नाऽयं विभुः, किन्तु शरीरमानः; तद्व्यापित्वेनोपलभ्यमानगुणकत्वात् । अत एव सक्रियः, अद्य योजनमात्रमहं गत इत्यादिप्रतीतेश्च । कथञ्चिन्मूर्त्तत्वादेव चात्मनः क्रियां प्रति मूर्त्तत्वेन कारणत्वेऽपि न क्षतिः । न चाऽदृष्टं स्वाश्रयसंयुक्ते आश्रयान्तरे कर्मारभते, एकद्रव्यत्वे सति क्रियागुणहेतुत्वाद् वेगवदित्यात्मविभुत्वसिद्धिरिति वाच्यम् । अयस्कान्तभ्रामकस्पर्शे हेतोरनैकान्तिकत्वात्; स्वाऽश्रयसंयोगं विनाऽदृष्टस्य कार्यहेतुत्वात् । न चाऽऽत्मनो नित्यमहत्त्वेन विभुत्वम् । आत्मपरिमाणपरिणतिविशेषे शरीरनामकर्मणो हेतुत्वात् तस्य नित्यत्वाऽसिद्धेः । इत्थं च तत्त्वज्ञानबलाहितशूकरादिकायव्यूहोऽपि योगिनो निरस्तः । यतो नरकादिदुःखजनकब्रह्महत्यादिप्रयोजकाऽदृष्टसत्त्वे तस्य नारकब्रह्मघातकदेहपरिग्रहोऽपि स्यादिति महद्वैशसम् । तादृशादृष्टविरह एव तत्त्वज्ञानोत्पत्तिरिति चेत्, शूकरादिशरीरोत्पादकोऽदृष्टाऽसत्त्व एव तत्त्वज्ञानोत्पत्तिरित्यपि किं न स्यादिति । सक्रियत्वादेव च बन्धमोक्षावप्यात्मनो घटेते । अभिनवकर्मादानरूपो हि बन्धः । पूर्वदेशविभागपूर्वकोत्तरसिद्धिक्षेत्रप्राप्तिरूपश्च मोक्षः । अत एव **कौटस्थ्यमपि निरस्तम् ।** तच्चैवम्—

अकारणमकार्यः कूटस्थचैतन्यस्वरूपः पुरुषः । अचेतना कर्त्री प्रकृतिः । तत्परिणामश्च बुद्धिः; सैव महत्तत्त्वमन्तःकरणम् । तद्गतचैतन्याभिमानाऽन्यथानुपपत्त्या पुंसः सिद्धिः । तस्या एवेन्द्रियप्रणालिकया ज्ञानरूपपरिणामेन सम्बद्धो घटादिर्विषयः पुरुषस्योपधानीभवति, विषयावच्छेदाभावाच्च मोक्षः । भेदाऽग्रहाच्च चेतने कर्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च । तस्याश्च कृत्यध्यवसायो व्यापारः, अभिमानोऽहङ्कारस्य, मनसो विकल्प इन्द्रियाणामालोचनम् । 'ममेदं कर्त्तव्य'मिति मदंशश्चेतनोपरागो दर्पणस्येव मुखोपरागो बुद्धेः स्वच्छतया तत्प्रतिबिम्बादतात्त्विकः । 'इद'मिति विषयोपराग इन्द्रियप्रणालिकया परिणति-

भेदस्तात्त्विको दर्पणस्येव निःश्वासाभिहतस्य मलिनिमा । एतदुभयायत्तः 'कर्त्तव्य' मिति व्यापारावेशः । इत्यंशत्रयवती बुद्धिस्तत्परिणामेन ज्ञानेन यः पुरुषोपरागस्याऽतात्त्विकस्य सम्बन्धो दर्पणस्य मलिनिम्नेव मुखस्य सोपलब्धिः । धर्मादयोऽप्यष्टौ धर्मा बुद्धेरेव, कृतिसामानाधिकरण्येन प्रतीतेः । न च बुद्धिश्चेतना, परिणामित्वात् । बुद्धेः परिणामोऽहङ्कारस्तस्य पञ्चतन्मात्राणि एकादशेन्द्रियाणि च, तन्मात्राणां च पञ्चमहाभूतानीति **मतं परास्तम्** ।

कृतिचैतन्ययोर्हि सामानाधिकरण्येनानुभवात् कर्तैव चेतनस्तद्भिन्ने मानाभावात् । चैतन्यांशे भ्रमे कृत्यंशेऽपि स स्यात् । अचेतनकार्यत्वाद् बुद्धेरचैतन्यं, कार्यकारणयोस्तादात्म्यादिति चेत्, न, असिद्धेः, कर्तुर्जन्यत्वे मानाभावात् । प्रत्युत सरागजन्मदर्शनादनादितैव स्यात् । "प्रकृतेः क्रियमाणानी"त्यादि तु स्वतन्त्रकर्तृत्वाभावपरम् । किञ्च बुद्धेर्नित्यत्वे मोक्षाभावोऽनित्यत्वे तत्पूर्वमसंसारः स्यात् । कर्तृत्वाभावे च पुरुषस्य 'पुरुषोऽस्ति भोक्तृभावा' दित्युक्तं भोक्तृत्वमपि न स्यात्; कर्तुरेव तत्त्वात् । बुद्धिदर्पणसङ्क्रान्तमर्थप्रतिबिम्बकं द्वितीयदर्पणकल्पे पुंस्यध्यारोहति, तदेव भोक्तृत्वमस्येत्यपि न । आत्मनोऽमूर्त्तद्रव्यत्वेन प्रतिबिम्बानुदयादिति दिक् । **अनेकद्रव्यमिति** । सन्त्यस्य समानजातीयानि द्रव्यान्तराणि, न तु एक एव हि भूतात्मेति भावः ॥१२॥

लक्षणमाह—

**चिह्नं चास्योपयोगः सः, साकारेतरभेदतः ।**
**द्विविधः स यथासङ्ख्यं, पुनश्चाऽष्टचतुर्विधः ॥१३॥**

**चिह्नमिति । उपयोग इति ।** उपयोगो ज्ञानदर्शनसमाधिः । अयमेव च चैतन्यानुविधायी परिणामः । अस्त्येव च सूक्ष्मनिगोदापर्याप्तस्यापि प्रथमसमये उपयोगमात्रा, परं सा सर्वजघन्या; इयमेव च क्रमाद्वर्धमाना केवलज्ञानसंज्ञिता भवति । स द्विधा, साकारोऽनाकारश्च, ज्ञानोपयोगो दर्शनोपयोगश्चेत्यर्थः । आद्यः सविकल्पो, द्वितीयो निर्विकल्पः । क्रमश्चात्र प्रागनाकारः पश्चात् साकार इति । तत्र ज्ञानोपयोगोऽष्टधा, दर्शनोपयोगश्चतुर्धा ॥१३॥

तानेव भेदानाह—

**मतिश्रुतावधिमनः—पर्यवकेवलानि हि ।**
**मत्यज्ञानं श्रुताज्ञानं, विभङ्गज्ञानमेव च ॥१४॥**

**इत्यष्टधा चतुर्धा च, श्रूयतामत्र कथ्यते ।**
**चक्षुरचक्षुरवधि—केवलदर्शनं तथा ॥१५॥**

**मतीति ।** मतिज्ञानं श्रुतज्ञानमवधिज्ञानं मनःपर्यायज्ञानं मत्यज्ञानं श्रुताज्ञानं विभङ्गज्ञानं चेत्यष्टधा । सम्यक्त्वानुगतत्वेन ज्ञानस्य ज्ञानत्वमन्यथा त्वज्ञानत्वमिति । चक्षुर्दर्शनमचक्षुर्दर्शनमवधिदर्शनं केवलदर्शनं चेति चतुर्धा । तत्र चक्षुषा दर्शनं चक्षुर्दर्शनं, चक्षुर्वर्जशेषेन्द्रियमनोभिर्दर्शनमचक्षुर्दर्शनम् । रूपिद्रव्यसामान्यग्रहणमवधिदर्शनम् । सकलपदार्थसामान्यग्रहणं केवलदर्शनमिति ॥१४-१५॥

मतिज्ञानं विभजते—

**मतिश्चतुर्विधोक्ताव—ग्रहेहापायधारणाः ।**
**तत्र चावग्रहो द्वैधं, व्यञ्जनार्थप्रभेदतः ॥१६॥**

**ईहाप्रभृतयस्तु स्यु—र्ह्यर्थस्यैवाद्यवग्रहः ।**
**स्पर्शजिह्वाघ्राणकर्ण—प्रभेदेन चतुर्विधः ॥१७॥**

**चक्षुर्मनोविधाधिक्यात्, षोढाऽर्थावग्रहादयः ।**
**द्वादशधा पुनः सर्वे, प्रत्येकं परिकीर्तिताः ॥१८॥**

**बहु—बहु विध—क्षिप्रा—निश्रित—निश्चित—ध्रुवाः ।**
**सेतरा इति षट्त्रिंशत्, त्रिशतप्रभिदा मतिः ॥१९॥**

**मतिश्चतुर्विधेति ।** मतिज्ञानमवग्रहेहापायधारणाभेदाच्चतुर्विधम् । अवकृष्टो ग्रहोऽवग्रहः । स द्विविधो व्यञ्जनस्याऽर्थस्य च । ईहादयस्त्वर्थस्यैव । तत्र शब्दादिपरिणतद्रव्यनिकुरम्बेण श्रोत्रेन्द्रियादेः सम्बन्धो व्यञ्जनावग्रह आन्तर्मौहूर्त्तिकः । अत्राऽस्त्येवाऽव्यक्ता ज्ञानमात्रा सुप्तमत्तादिपुरुषवत् । अयं च नयनमनोवर्जेन्द्रिय-

भेदाच्चतुर्धा। नयनमनसोरप्राप्यकारित्वं स्वरूपम्। नामजातिक्रियागुणद्रव्यकल्पनारहितं सामान्यग्रहणमर्थावग्रहः; एकसामयिकः। यतः 'किञ्चिद् दृष्टं मया न तु परिभावित'मिति व्यवहारः। व्यतिरेकधर्मनिराकरणपरोऽन्वयधर्मघटनप्रवृत्तो बोध ईहा आन्तर्मौहूर्त्तिकी। यथा श्रोत्रग्राह्यत्वादिना प्रायोऽनेन शब्देन भवितव्यम्, मधुरत्वादिधर्मयुक्तत्वाच्छाङ्खादिना वेति। ईहितस्य विशेषनिर्णयोऽवायः, आन्तर्मौहूर्त्तिकः; यथा शब्द एवायं, शाङ्ख एवायमिति वा। 'अत्र घट' इत्याद्यपायोत्तरमपि यदा किमयं घटः सौवर्णो वा मार्त्तो वेत्यादिजिज्ञासा स्यात्, तदा पाश्चात्यापायस्योत्तरविशेषावगमापेक्षया सामान्यालम्बनत्वाद् व्यावहारिकावग्रहत्वम्, ततः सौवर्ण एवाऽयमित्यादिरपायः, एवमुत्तरत्रापि। जिज्ञासानिवृत्तौ त्वन्त्यविशेषज्ञानमवाय एव। अयमेव दृढतमावस्थापन्नो धारणा। सा त्रिविधा, अविच्युतिः स्मृतिर्वासना च। तत्रैकार्थोपयोगसातत्याऽनिवृत्तिरविच्युतिरान्तर्मौहूर्त्तिकी। तस्यैवाऽर्थोपयोगस्य कालान्तरे 'तदेवे' त्युल्लेखेन समुन्मीलनं स्मृतिरान्तर्मौहूर्त्तिकी। अपायाहितः स्मृतिहेतुः संस्कारो वासना सङ्ख्येयाऽसङ्ख्येयकालिकी। स्पष्टस्पष्टतरस्पष्टतमभिन्नधर्मकवासनाजनकत्वेनाऽन्यान्यवस्तुग्राहित्वादविच्युतेः; प्रागननुभूतवस्त्वेकत्वग्राहित्वाच्च स्मृतेः; अगृहीतग्राहित्वात् स्मृतिज्ञानावरणकर्मक्षयोपशमरूपायास्तद्विज्ञानजननशक्तिरूपायाश्च वासनायाः स्वयमज्ञानरूपत्वेऽपि कारणे कार्योपचारेण ज्ञानभेदाभिधानम्। इत्थं चाऽप्रामाण्यशङ्काऽप्यपास्ता। अर्थावग्रहादयश्च मनइन्द्रियैः षोढा। तदेवमष्टाविंशतिर्मतिभेदाः।

ते च बहु–बहुविध–क्षिप्राऽनिश्रित–निश्रित–ध्रुवैः सप्रतिपक्षैर्द्वादशभिर्भेदैर्भिद्यमानाः षट्त्रिंशदधिकानि त्रीणि शतानि भवन्ति। बह्ववग्रहोऽबह्ववग्रह इत्यादि। एवमीहादयोऽपि ज्ञेयाः। बह्वादयश्च भेदा विषयापेक्षाः। तथा हि–कश्चिन्नानाशब्दसमूहमाकर्णितं बहु जानाति; एतावन्तोऽत्र शङ्खशब्दा एतावन्तश्च पटहादिशब्दा इति पृथग् भिन्नजातीयं क्षयोपशमविशेषादवगृह्णाति; तत्तच्छब्दाकारतानिरूपितेदमाकारताकः शब्दीयो बह्ववग्रह इति यावत्। अन्यस्त्वल्पक्षयोपशमत्वात् तत्समानदेशोऽप्यबहुम्। अपरस्तु क्षयोपशमवैचित्र्याद् बहुविधं, एकै-

कस्यापि शङ्खादिशब्दस्य स्निग्धत्वादिबहुधर्मान्वितत्वेनाप्याकलनात् । परस्त्व-बहुविधं, स्निग्धत्वादिस्वल्पधर्मान्वितत्वेनाकलनात् । अन्यस्तु क्षिप्रं, शीघ्रमेव परिच्छेदात् । इतरस्त्वक्षिप्रं, चिरविमर्शेनाकलनात् । परस्त्वनिश्रितं, लिङ्गं विना एव परिच्छेदात् । अपरस्तु निश्रितं लिङ्गनिश्रयाऽऽकलनात् । कश्चित्तु निश्चितं विरुद्धधर्माऽनालिङ्गितत्वेनाऽवगतेः । इतरस्त्वनिश्चितं, विरुद्धधर्माङ्कितत्तयाऽवगमात् । अन्यो ध्रुवं, सतीन्द्रियोपयोगविषयादौ स्पष्टं विषयमवगृह्णात्येवेति । अन्यस्त्वध्रुवं, सत्यपि तस्मिन् कदाचित् तं तथा गृह्णाति कदाचिन्नेति भावः ।

नन्वीहादय एवंविधाः सन्तु, परमवग्रहः कथमेवंविधस्तस्यैकसामयिकत्वा-दिति चेत् । सत्यम् । नैश्चयिकोऽवग्रह एकसामयिक एव । व्यावहारिकं चाऽव-ग्रहमाश्रित्येदमुच्यते । नैश्चयिकः सामान्यमात्रग्राही, परश्च विशेषविषय इति ॥ १६-१७-१८-१९ ॥

श्रुतं विभजते—

**मतिपूर्वं श्रुतं द्वैध-मङ्गबाह्यप्रविष्टकम् ।**<br>
**अनेकभेदं तत्राद्यं, ज्ञेयं सामायिकादिकम् ॥२०॥**<br>
**अङ्गप्रविष्टमाचारा-ङ्गादि द्वादशधा मतम् ।**

**मतिपूर्वमिति** । मतिज्ञानं हि लब्धिरूपं श्रुतस्योत्पत्तावपेक्षाकारणमिति । तद् द्विविधमङ्गबाह्यमङ्गप्रविष्टं च । इदं अङ्गोपाङ्गादिपरिज्ञानमेव श्रुतज्ञानमन्यच्च मतिज्ञानम्; शब्दसंसृष्टार्थमात्रग्राहित्वेन श्रुतत्वे त्ववग्रहमात्रमेव मतिज्ञानं प्रसज्ये-तेत्यभिप्रायेण । तत्राद्यं गणधरानन्तर्यादिभिराचार्यैः कालादिदोषादल्पशक्तीनां शिष्याणामनुग्रहायोक्तं सामायिकाध्ययनादि दशवैकालिकादि च सर्वम् । द्वितीयं यत्सर्वज्ञैरर्हद्भिरुक्तं तच्छिष्यैरतिशयवद्भिर्गणधरैर्दृब्धं तदाचाराङ्गादिदृष्टिवा-वादपर्यन्तम् ॥ २०- ॥

अवधिं विभजते—

**द्विधाऽवधिर्भवहेतुः, क्षयोपशमहेतुकः ॥२१॥**

द्वितीयस्तत्र विज्ञेयः, षड्विकल्पसमन्वितः ।
आनुगामि–वर्द्धमाना–ऽवस्थितेतरभेदतः ॥२२॥

**द्विधेति ।** अवधिज्ञानं द्विविधं, भवप्रत्ययजं क्षयोपशमनिमित्तं च । आद्यं नारकदेवानाम् । अत्रापि मुख्यं कारणं क्षयोपशम एव, परं तस्य क्षयोपशमस्य कारणं भव एवेति कारणकारणत्वादित्थम् । द्वितीयं षड्विधम् । तत्रोत्पत्तिक्षेत्रादन्यत्राप्यनुवर्त्तमानमानुगामिकम् ! उत्पत्तिक्षेत्र एव विषयावभासकमनानुगामिकम् । उत्पत्तिक्षेत्रात् क्रमेण विषयव्याप्तिमवगाहमानं वर्द्धमानम् । उत्पत्तिक्षेत्रापेक्षया क्रमेणाल्पीभवद्विषयं हीयमानम् । आकेवलप्राप्तेरामरणाद्वाऽवतिष्ठमानं देवादिजात्यन्तरस्थायि वाऽवस्थितम् । यद्धीयते वर्द्धते च, वर्द्धते हीयते च, प्रतिपतति चोत्पद्यते चेत्यनवस्थितम् । नावतिष्ठते हीदं क्वचिदेकस्मिन् वस्तुनि, शुभाशुभानेकसंयमस्थानलाभात् ॥ २१–२२ ॥

मनःपर्यायकं नाम ज्ञानं द्विविधमिष्यते ।
ऋजुमतिर्विपुलधीः, केवलं केवलं मतम् ॥२३॥

**मन इति ।** मनःपर्यायज्ञानं द्विविधं, ऋजुमतिमनःपर्यायज्ञानं विपुलमतिमनःपर्यायज्ञानं च । विशुद्धयप्रतिपाताभ्यां च प्रथमात् परस्य विशेषः । केवलंज्ञानस्वरूपम् । लक्षणान्येषां वक्ष्यत इति ॥ २३ ॥

प्रमाणं निरूपयति–

प्रमाणं च तदेव स्यात्, स्वपरव्यवसायकम् ।
व्यवसायस्वभावं तत् पण्डितैः परिकीर्त्तितम् ॥२४॥
यतस्तस्यास्ति प्रामाण्यं समारोपविरोधिता ।

**प्रमाणमिति । तदिति ।** पञ्चविधं ज्ञानम् । लक्षणमाह–**स्वपरेति ।** स्वपरव्यवसायिज्ञानं प्रमाणमित्यर्थः । विशेषणं समर्थयति–**व्यवसायेति ।** तथाहि–'प्रमाणत्वेनाभिमतं ज्ञानं, व्यवसायस्वभावं; समारोपपरिपन्थित्वाद्, यन्नैवं

तन्नैवं, यथा घट' इति। अत्र दर्शनेऽतिव्याप्तिवारणाय ज्ञानपदम्। संशयादिषु तद्वारणाय व्यवसायिपदम्। परोक्षबुद्ध्यादिवादिनां बाह्यार्थपलापिनां च मत-निरासाय स्वपरेति स्वरूपविशेषणम्। बाह्यस्येव स्वस्यापि स्वेन प्रतिभातत्वमनु-भवसिद्धं, मिहिरालोकवत्, घटमहमात्मना जानामीति प्रत्ययात्। न च ज्ञानं ज्ञाततागम्यं, तदभावेऽपि शशविषाणादिविकल्पोपपत्तेः। घटं जानामीति फला-ऽनाधारत्वेऽपि कारकव्यापारविषयत्वादेव कर्मत्वोपपत्तेः। एवं चाऽभिमताऽन-भिमतवस्तुस्वीकारतिरस्कारक्षममात्मव्यापारमुपयोगेन्द्रियमेव प्रमाणम्, न तु लब्धीन्द्रियमेवार्थग्रहणशक्तिलक्षणम्, उपयोगात्मना करणेन लब्धेः फले व्यव-धानात्। ज्ञानेन घटं जानामीति करणोल्लेखानुपपत्तेश्च। एतेन सन्निकर्षादेः प्रामाण्यमपास्तं, तस्याऽचेतनत्वात् स्तम्भादेरिव स्वार्थव्यवसितावसाधकत-मत्वाच्च ॥२४॥

समारोपं निरूपयति—

**समारोपोऽतस्मिंस्तद्-ध्यवसायोऽधिगम्यताम् ॥२५॥**

**समारोप इति**। अतत्प्रकारे तत्प्रकारताज्ञानं समारोपः। प्रवृत्तिनिमित्तं त्वस्य यथार्थाऽपरिच्छेदकत्वमेव; तेनाऽनध्यवसायेऽपि समारोपत्वम् ॥२५॥

तद्भेदानाह—

**विपर्ययः संशयोऽन-ध्यवसाय इति त्रिधा।**
**अधिज्ञेयः स तत्राद्यो विपर्ययः प्रदर्श्यते ॥२६॥**

**विपरीतैककोटेः स्या-न्निष्टङ्कनं विपर्ययः।**
**भवेद्यथा शुक्तिकायां, रजताकारतामतिः ॥२७॥**

**विपर्यय इति**। विपर्ययसंशयानध्यवसायभेदात् त्रिविधः समारोपः। तत्र विपर्ययमाह—**विपरीतेति**। तदभाववति तत्प्रकारकनिर्णयो विपर्ययः। तदभावाऽप्रकारकतत्प्रकारकज्ञानं च निर्णयः। दृष्टान्तमाह- **यथेति**। शुक्ताविदं

रजतमिति ज्ञानम् । अयं प्रत्यक्षस्थले । परोक्षस्थलेऽपि हेत्वाभासादिजन्यज्ञान-रूपो बोध्यः ॥२६–२७॥

संशयमाह–

**तत्संशयोऽनवस्थिता–ऽनेककोटयवलम्बि यत् ।**
**ज्ञानं साधकबाधक–प्रमाणानुपलम्भतः ॥२८॥**
**यथा स्थाणुरयं किं वा, भवेद्वा पुरुषश्च किम् ॥**

**तदिति ।** साधकबाधकप्रमाणाभावादेकत्र धर्मिणि विरुद्धनानार्थावगाहि-ज्ञानं संशयः । यथा अयं स्थाणुर्वा पुरुषो वेति । अयं च प्रत्यक्षविषये । परोक्ष-विषये तु विपिनादौ शृङ्गमात्रदर्शनात् किमयं गौर्वा गवयो वेत्यादिरूपः ॥२८–॥

अनध्यवसायमाह–

**अर्थाऽनध्यवसायस्य, स्वरूपं किञ्चिदुच्यते ॥२९॥**
**स विद्वद्भिः समाख्यातः, किमित्यालोचमात्रकम् ।**
**ज्ञानं यत्तद्यथा गच्छ–त्तृणस्पर्शस्य शेमुषी ॥३०॥**

**अथेति ।** अस्पृष्टविशिष्टविशेषं किमित्यालोचनमात्रमनध्यवसायः । यथा गच्छतस्तृणस्पर्शज्ञानम् । परोक्षविषयेऽप्ययं वनादावज्ञातगोः पुंसः सास्नामात्र-दर्शनात् को नु खल्वत्र प्रदेशे प्राणी स्यादित्याद्यात्मको बोध्यः ॥२९–३०॥

अथ प्रमाणभेदानाह–

**तच्च द्विधाऽथाऽप्रत्यक्षं, परोक्षं तत्र चादिमम् ।**
**स्पष्टं तत्स्पष्टता तत्र, यद्विशेषप्रकाशनम् ॥३१॥**

**तच्चेति ।** अत्र प्रत्यक्षमेव प्रमाणमिति **चार्वाकः** । सम्भावनामात्रादेव लोकव्यवहारसिद्धेः । अनुमानमपीति **कणाद–सुगतौ** । शब्दोपमानयोरनुमान-गतार्थता । तथा हि 'गामानय, यजेते' त्यादीनि पदानि, तात्पर्यविषयस्मारितार्थ-संसर्गज्ञानपूर्वकाणि, आकाङ्क्षादिमत्पदकदम्बकत्वात् । यद्वा 'एते पदार्था मिथः

संसर्गवन्तो योग्यतादिमत्पदोपस्थापितत्वात्'। एवं 'गवयप्रत्यक्षानन्तरं गवयपदं गवयत्वप्रवृत्तिनिमित्तकम्, असति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वात्' यद्वा 'गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वात्, गोपदवदिति'। उपमानमपीति **नैयायिकैकदेशी।**

**नैयायिकास्तु** व्याप्तिज्ञानं विनाप्यनुभवसिद्ध एव शब्दादितो बोधः; न हि सर्वत्र शब्दश्रवणे व्याप्तिज्ञानमस्तीत्यत्र प्रमाणम्। अन्यथा सर्वत्राऽनुमितिस्थले पदज्ञानकल्पनया शाब्दबोध एव किं न स्यात्?। तथा प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति। प्रमा हि चतुर्विधा, प्रत्यक्षानुमित्युपमितिशाब्दबोधभेदादिति। तत्करणान्यपि चत्वारि। तत्रेन्द्रियजन्यं ज्ञानं प्रत्यक्षं, घ्राणजादिभेदात् तत् षोढा। तत्र घ्राणेन्द्रियेण गन्धस्य तद्गजातीनां तदभावस्य च घ्राणजम्। रसनेन्द्रियेण रसस्य तद्गजातीनां तदभावस्य च रासनम्। श्रोत्रेण शब्दस्य तद्गजातीनां तदभावस्य च श्रावणम्। चक्षुरिन्द्रियेणोद्भूतरूप–तद्वद्द्रव्य–योग्यवृत्तिसङ्ख्या–परिमिति – पृथक्त्व–संयोग–विभाग–परत्वाऽ–परत्व–स्नेह–वेग–द्रवत्व–क्रिया–जाति–समवायानां तदभावस्य च चाक्षुषम्। अत्रालोकसंयोग-उद्भूतरूपं च कारणम्। तत्र द्रव्यस्य चाक्षुषप्रत्यक्षे समवायेन, द्रव्यसमवेतरूपादेः स्वाश्रयसमवायेन, द्रव्यसमवेतसमवेतरूपत्वादेः स्वाश्रयसमवेतसमवायेन कारणम्। स्पर्शनेन्द्रियेणोद्भूतरूप–तद्गतजातिभिन्नानां भावानां चक्षुर्योग्यानामुद्भूतस्पर्शस्य तद्वद्द्रव्यस्य तद्गतजातीनां तदभावस्य च स्पार्शनम्। प्रभा–तद्गुणादेस्तु–न स्पार्शनं, तत्रोद्भूतस्पर्शस्यापि हेतुत्वात्। **वल्लभीयमते** गुरुत्वस्यापि, **नव्यमते** वायोरपि। यतश्चाक्षुषे रूपं, स्पार्शने स्पर्श एव कारणम्। बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे त्वात्माऽवृत्तिशब्दभिन्नविशेषगुणवत्त्वं प्रयोजकमिति। यत्तु **प्राञ्चः** बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणं, तेन वायोः प्रत्यक्षं नेति **वदन्ति,** तन्न; वायुं स्पृशामीति प्रतीतेर्वायोः प्रत्यक्षात्। प्रभावद्वायोरप्येकत्वादिकं गृह्यत एव। क्वचित् परिमाणाद्यग्रहस्तु दोषादेव। किं चैवं ग्रीष्मोष्मादेः स्पार्शनं न स्यात्, तत्रोद्भूतरूपाऽभावादित्यलम्। मनइन्द्रियेणात्मबुद्धिसुखदुःखेच्छाद्वेष-

प्रयत्नानां तद्गतजातीनां तदभावस्य च मानसम्। आत्मैकत्वपरिमाणयोरपि मानसमिति **तात्पर्यटीकाकृत्।**

अत्र घटचक्षुःसंयोगाद्यनन्तरं घटत्वादिविशिष्टसविकल्पकज्ञानात् पूर्वं घटघटत्वादीनां वैशिष्ट्याऽनवगाह्येव ज्ञानं जायते, विशिष्टधियां विशेषणधियः कारणत्वात्। तदेव निर्विकल्पकं, तच्चातीन्द्रियमिति न प्रत्यक्षं; घटमहं जानामीति प्रत्ययात्। तत्र ह्यात्मनि ज्ञानं तत्र घटस्तत्र घटत्वं प्रकारीभूय भासते। विशिष्ट-वैशिष्ट्यज्ञाने च विशेषणतावच्छेदकप्रकारकं ज्ञानं कारणम्। निर्विकल्पे तु घटत्वा-दिकं न प्रकारः; घटत्वाद्यप्रकारकं घटादिविशिष्टज्ञानं तु जात्यखण्डोपाध्यतिरिक्त-पदार्थज्ञानस्य किञ्चिद्धर्मप्रकारकत्वनियमान्न स्यादेवेति। अत्र प्रत्यक्षमात्रे महत्त्वं कारणं, कारणतावच्छेदकसम्बन्धश्चालोकसंयोगवत्। इन्द्रियं करणं; विषयेन्द्रिय-सन्निकर्षो व्यापारः। स च संयोगादिभेदेन षड्विधः। तत्र द्रव्यस्य प्रत्यक्षे संयोगः सन्निकर्षः। द्रव्यसमवेतगुणकर्मसामान्यानां प्रत्यक्षे संयुक्तसमवायः। द्रव्य समवेतसमवेत–गुणत्व–कर्मत्व–सत्तादीनां प्रत्यक्षे संयुक्तसमवेतसमवायः। शब्दस्य प्रत्यक्षे श्रोत्रावच्छिन्नसमवायः। शब्दसमवेतशब्दत्वकत्वादीनां प्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः। अभावसमवाययोः प्रत्यक्षे विशेषणता। **वैशेषिक-मते** समवायो न प्रत्यक्षः, सम्बन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वादिति। अत्र विशेषणताऽपि नानाविधा; तथाहि—भूतलादौ घटाद्यभावस्य प्रत्यक्षे संयुक्तविशेषणता सन्निकर्षः। सङ्ख्यादौ रूपाद्यभावस्य संयुक्तसमवेतविशेषणता। सङ्ख्यात्वादौ रूपाद्यभावस्य संयुक्तसमवेतसमवेतविशेषणता। शब्दाभावस्य श्रोत्रावच्छिन्नविशेषणता, कादौ खत्वाद्यभावस्य श्रोत्रावच्छिन्नसमवेतविशेषणता। एवं भूतलवृत्तिघटाभावादौ पटाभावादेः संयुक्तविशेषणविशेषणता। कत्वाद्यवच्छि-न्नाभावे गत्वाभावादेः श्रोत्रावच्छिन्नविशेषणविशेषणता। एवमन्यत्रापि।

अत्रेदं बोध्यम्—यत्र घटस्य मध्य आलोकसंयोगश्चक्षुःसंयोगस्तु बहिस्तत्र घटतद्गुणादिप्रत्यक्षाभावाच्चाक्षुषप्रत्यक्षकारणतावच्छेदककोटौ चक्षुःसंयोगांशे आलोकसंयोगावच्छिन्नत्वं निवेश्यम्। एवमुद्भूतरूपावच्छिन्नत्वं महत्त्वावच्छिन्न-

त्वं च चक्षुःसंयोगे प्रवेश्यं, तेन पृथ्वीपरमाणौ नीले पृथिवीत्वादेर्नीलत्वादेश्च न चाक्षुषप्रसङ्गो न वा वायौ तत्स्पर्शादौ च सत्तायाश्चाक्षुषत्वम् । एवं त्वक्संयोगांशेऽपि त्वाचप्रत्यक्षकारणतावच्छेदककोटौ महत्त्वावच्छिन्नत्वमुद्भूतस्पर्शावच्छिन्नत्वं च देयमिति । अत्राऽभावप्रत्यक्षे प्रतियोग्युपलम्भाभावः कारणम् । तत्र योग्यताऽप्यपेक्षिता । सा च प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपा । यत्र ह्यालोकसंयोगादिकं वर्त्तते तत्र 'यद्यत्र घटः स्यात्तर्हि उपलभ्येत' त्यापादयितुं शक्यते इति तत्र घटभावादेश्चाक्षुषप्रत्यक्षं भवति, न त्वन्धकारे । स्पार्शनं तु तत्रापि, तस्यालोकसंयोगं विनाप्यापादयितुं शक्यत्वात् । गुरुत्वादिकं यदयोग्यं तदभावस्तु न योग्यस्तस्यापादनाभावात् । एवं संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता, अन्योन्याभावप्रत्यक्षेऽधिकरणयोग्यताऽपेक्षिता; अतः स्तम्भादौ पिशाचादिभेदोऽपि चक्षुषा गृह्यत एव । पिशाचत्वं यदि स्तम्भवृत्ति स्यात्तर्हि स्तम्भवृत्तितयोपलभ्येतेत्येवं चात्रापादनम् । इदं सर्वं लौकिकप्रत्यक्षम् । अलौकिकं त्वलौकिकसन्निकर्षजन्यम् । अलौकिकसन्निकर्षश्च त्रिविधः सामान्यलक्षणा—ज्ञानलक्षणा—योगजधर्मभेदात् । तत्र सामान्यमिन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं बोध्यम् । यथेन्द्रियसंयुक्तो धूमस्तद्विशेष्यकं धूम इति ज्ञानं तत्र धूमत्वं प्रकारस्तेन धूमत्वेन सन्निकर्षेण निखिलतदाश्रयविषयमलौकिकं प्रत्यक्षं भवति । इत्थं च धूमभ्रमानन्तरमपि सकलधूमविषयकं ज्ञानं स्यात् । मानसस्थले तु ज्ञानप्रकारीभूतमित्येव वाच्यम् । इदं च सामान्यं क्वचिन्नित्यं धूमत्वादि क्वचिच्चानित्यं घटादि । येन सम्बन्धेन च तज्ज्ञायते तेन सम्बन्धेनाधिकरणानां प्रत्यासत्तिः । एतदनङ्गीकारे धूमो वह्निव्याप्यो नवेति संशयो न स्यात्; प्रत्यक्षधूमे वह्निसम्बन्धस्य गृहीतत्वादन्यधूमस्य चाऽनुपस्थितत्वात् । इत्थं च धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां चोपस्थितौ कालान्तरीयदेशान्तरीयधूमे वह्निव्याप्यत्वसन्देहः सम्भवति । न चैवं प्रमेयत्वेन सकलप्रमेयज्ञाने सार्वज्ञ्यं स्यात्; विशिष्य सकलपदार्थानामज्ञातत्वात् । **नव्यास्तु** सामान्यज्ञानमेव प्रत्यासत्तिर्न तु ज्ञायमानं सामान्यम्; अन्यथा तद्घटनाशानन्तरं तद्घटवतां स्मरणे सर्वेषां तद्घटवतामलौकिकप्रत्यक्षं न स्यात्, तदा तद्घटरूपसामान्याभावात्; स्याच्च यत्रेन्द्रियसम्बन्धविशेष्यकं

घट इति ज्ञानं तत्रेन्द्रियसम्बन्धं विनापि द्वितीयदिनेऽलौकिकप्रत्यक्षं, तादृशज्ञाने प्रकारीभूतसामान्यस्य घटत्वस्य सत्त्वादिति ब्रुवते।

ज्ञानलक्षणाप्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव। इत्थं च 'सुरभि चन्दन' मिति चाक्षुषे सौरभत्वस्य भानं, धूमत्वेन धूलीपटले ज्ञातेऽनुव्यवसाये धूलीपटलस्य भानं च ज्ञानलक्षणया। एवं रज्ज्वादौ सर्पादिभ्रमे सर्पत्वादिभानमपि ज्ञानलक्षणया। योगजधर्मो युक्त—युञ्जानयोगिद्वैविध्याद् द्विविधः। तत्र योगाभ्यासवशीकृतमनस्समाधिसमासादितविविधसिद्धिर्युक्तः, तस्य विनैव ध्यानं सदा सर्वप्रत्यक्षम्। युञ्जानो विषयव्यावृत्तमानसः, तस्य तु ध्यानसहकारेणैवेति।

**अथाऽनुमितिः।** सा च परामर्शजन्यज्ञानरूपा, यद्वा व्याप्तिकरणज्ञानात्मिका। अत्र व्याप्तिज्ञानं करणं, न तु व्याप्यत्वेन ज्ञायमानं लिङ्गं; अनागतेन विनष्टेन च लिङ्गेनानुमित्यनुत्पादापत्तेः। **नव्यास्त्वनुमितिं** प्रति मनस्त्वेनैव करणत्व**माहुः**। व्याप्तिश्च साध्यवदन्याऽवृत्तित्वं, हेतुव्यापकसाध्यसामानाधिकरण्यं वा। अत्र व्याप्तिग्रहे व्यभिचारज्ञानाभावः सहचारज्ञानं च कारणं; भूयोदर्शनमपि क्वचिदुपयुज्यते। अत्र शङ्कानिवृत्तये एकधर्माभ्युपगमे द्वितीयस्य नियतप्राप्तिरूपस्तर्कोऽप्यपेक्षितः। तथाहि—यद्ययं वह्निमान्न स्यात्तदा धूमवान्न स्यात्; कारणं विना कार्यानुपपत्तेः। यद्यत्राप्याशङ्का तदा व्याघातात् साऽपसार्या; शङ्काया व्याघातावधित्वात्। कारणं विनापि हि यदि कार्यं स्यात्तदा धूमाद्यर्थं वह्न्यादेर्नियमतउपादानं न स्यादिति। व्यापारश्च परामर्शः; स च व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानम्। तच्च पक्षे 'पक्षे व्याप्य' इति ज्ञानं 'पक्षो व्याप्यवानि'ति ज्ञानं वा। अनुमितिरपि 'पक्षे साध्यं' इति 'पक्षः साध्यवानि'ति वा। द्विविधादपि तस्मात् 'पक्षः साध्यवानि' त्येवानुमेत्यन्ये। **केचित्तु** पक्षविशेष्यकपरामर्शस्यैवानुमितिहेतुतेति। पक्षताऽप्यत्र हेतुः। सा च सिषाधयिषाविरहविशिष्टसिद्ध्यभावः, न तु सिद्ध्यभावमात्रं, सिद्धौ सत्यामपि सिषाधयिषासत्त्वेऽनुमितेर्भावात्। नापि साध्यसन्देहः; विनापि तं घनगर्जितेन मेघानुमानात्। अनेन सिषाधयिषामात्रस्यापि पक्षतात्वमपास्तम्, विनापि तां तदनुमानात्।

इत्थं च यत्र सिद्धिर्नास्ति तत्र सिषाधयिषायां सत्यामसत्यामपि पक्षता; यत्र सिषाधयिषाऽस्ति तत्र सिद्धौ सत्यामसत्यामपि पक्षता; यत्र सिद्धिरस्ति सिषाधयिषा च नास्ति, तत्र न पक्षता। अत्र पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिरेव प्रतिबन्धिका; तदवच्छेदकसामानाधिकरण्येनानुमितिं प्रति तु सिद्धिमात्रं विरोधि। एवमनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री अनुमितौ पृथक्प्रतिबन्धिका। एवं प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री भिन्नविषयकप्रत्यक्षे प्रतिबन्धिकेति।

अत्रानुमानं त्रिविधं, अन्वयव्यतिरेकि—केवलान्वयि—केवलव्यतिरेकिभेदात्। आद्यं 'वह्निमान् धूमादि'ति, सपक्षविपक्षयोः सत्त्वात्। द्वितीयं 'घटोऽभिधेयः प्रमेयत्वादि'ति, विपक्षाऽभावात्। तृतीयं 'पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वादि'ति, सपक्षाऽभावात्। अत्र व्यतिरेकिणि व्यतिरेकव्याप्तिज्ञानं कारणं; साध्याभावव्यापकीभूताऽभावप्रतियोगित्वं व्यतिरेकव्याप्तिः। अत्र यत्सम्बन्धेन यदवच्छिन्नं प्रति येन सम्बन्धेन येन रूपेण व्यापकता गृह्यते तत्सम्बन्धावच्छिन्नप्रतियोगिताक—तद्धर्मावच्छिन्नाऽभावज्ञानात् तत्सम्बन्धावच्छिन्नप्रतियोगिताक—तद्धर्मावच्छिन्नाभावस्य सिद्धिः। इत्थं च यत्र तादात्म्येनेतरव्यापकत्वं स्वरूपेण गन्धाभावस्य गृह्यते, तत्र स्वरूपेण गन्धाभावस्याऽभावात्तादात्म्येनेतरस्याऽभावः पृथिव्यां सिद्ध्यति, स एवाऽन्योन्याभावः। एवं यत्र संयोगेन धूमं प्रति संयोगेन वह्नेर्व्यापकता गृह्यते तत्र सम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावेन जलह्रदे संयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावः सिद्ध्यति। व्यतिरेकव्याप्तिग्रहे च व्यतिरेकसहचारज्ञानं कारणम्। **केचित्तु** व्यतिरेकसहचारेणाप्यन्वयव्याप्तिरेव गृह्यते इति। एवं पूर्ववत् शेषवत्, सामान्यतो दृष्टमित्यादयोऽपि भेदा बोध्याः।

संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः। यथा 'गवयो गवयपदवाच्य' इति ज्ञानम्। अत्र गोसादृश्यज्ञानं करणं, 'गोसदृशो गवयपदवाच्य' इत्यतिदेशवाक्यार्थस्मरणं व्यापारः, 'अयं गवयपदवाच्य' इत्युपमितिरिति। अयं पिण्डो गोसदृश' इति

प्रतीत्यनन्तरं 'अनेन सदृशी मदीया गौ' रिति निश्चय उपमितिरिति **पूर्वोत्तर-मीमांसिनः ।**

अथ शाब्दबोधः । तत्र पदज्ञानं करणं; वृत्त्या पदजन्यपदार्थस्मरणं व्यापारः; वृत्तिश्च शक्तिलक्षणाऽन्यतरसम्बन्धः । तत्र पदेन सह पदार्थस्य साक्षात् सम्बन्धः शक्तिः । सा चाऽस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छात्मिका; आधुनिकनाम्न्यपि साऽस्त्येव । नव्यास्त्वाधुनिकसङ्केतितेऽपि शक्तिमामनन्ति, तेषामिच्छामात्रस्यैव शक्तित्वात् । शक्तिग्रहश्च व्याकरणादेर्भवति । तत्र धातुप्रकृतिप्रत्ययानां शक्तिग्रहो व्याकरणाद् भवति । क्वचित् सति बाधके त्यज्यते; यथा वैयाकरणैराख्यातस्य कर्त्तरि शक्तिरुच्यते, तत्र गौरवात् त्यज्यते; किन्तु कृतौ शक्तिर्लाघवात् । पचतीत्यस्य पाकं करोतीत्यनेन विवरणाच्च कृञो यत्नार्थत्वात् । रथो गच्छति जानातीत्यादावाश्रयत्वादौ नश्यतीत्यादौ प्रतियोगित्वे निरूढलक्षणा । लट्त्वेन हि शक्तिर्लकारत्वेन च लक्षणेति युगपद्वृत्तिद्वयाऽनभ्युपगमेऽपि न वर्त्तमानत्वादीनामनन्वयः । अथ कर्तुरनभिधाने चैत्रः पचतीत्यत्र तृतीया स्यादिति चेत्, न; अनभिहितसङ्ख्याके कर्त्तरीति तात्पर्यात् । आख्यातस्थले क्रियामुख्यविशेष्यकः शाब्दबोध इति **शाब्दिकाः**; यथा चैत्रो ग्रामं गच्छतीत्यत्र ग्रामाऽभिन्नाश्रयनिष्ठसंयोगानुकूलश्चैत्राऽभिन्नकर्तृको वर्तमानकालवृत्तिर्व्यापार इति बोधः । **नैयायिकास्तु** प्रथमान्तार्थमुख्यविशेष्यकः सः । उक्तस्थले ग्रामनिष्ठसंयोगानुकूलव्यापारानुकूलवर्तमानकृतिमांश्चैत्र इत्येव बोधः । न चैवं पश्य मृगो धावतीत्यत्र धावनस्य दर्शनकर्मत्वं न स्यादिति वाच्यम् । तत्र धावनकर्तृमृगकर्मकदर्शनाश्रयत्वमित्यन्वयबोधाद् वाक्यार्थस्यैव कर्मत्वात्; नामार्थत्वाभावान्न द्वितीया ।

उपमानाच्छक्तिग्रह उक्त एव । कोशादपि, यथा नीलादिपदानां नीलरूपादौ नीलविशिष्टे च शक्तिः, तत्र लाघवान्नीलादावेव शक्तिर्विशिष्टे तु लक्षणा । आप्तवाक्यादपि, यथा कोकिलः पिकशब्दवाच्य इति शब्दात् पिकस्य कोकिले

शक्तिग्रहः। व्यवहारादपि, यथा प्रयोजकवृद्धोक्तं घटमानयेति श्रुत्वा प्रयोज्य- वृद्धेन घटानयने पार्श्वस्थो बालो 'घटानयनरूपं कार्यं घटमानयेतिशब्दप्रयोज्य' मिति निश्चिनोति; पुनश्च घटं नय गामानयेतिवाक्यादावापोद्वापाभ्यां घटादि- पदानां कार्यान्वितघटादौ शक्तिं निश्चिनुते। न चैवं भूतले नीलो घट इत्यादि- शब्दाच्छाब्दबोधो न स्यात्, कार्यताबोधकलिङ्गाद्यभावादिति वाच्यम्। आपाततः कार्यान्विते शक्त्यवधारणेऽपि लाघवेन पश्चात्तस्य परित्यागौचित्यात्। अत एव 'चैत्र! पुत्रस्ते जातः, कन्या ते गर्भिणी' त्यादौ मुखप्रसादमुखमालिन्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन शाब्दबोधं निर्णीय तद्धेतुतया तं शब्दमवधार- यति; तथा च व्यभिचारान्न कार्यान्विते शक्तिः, तत्र तं पश्येत्यध्याहारे माना- भावात्, पुत्रस्ते जातो मृतश्चेत्यादौ तदभावाच; इत्थं च घटपदस्य लाघवाद् घटमात्रे शक्तिर्नत्वन्वितघटेऽपि। एवं वाक्यशेषादपि, यथा 'यवमयश्चरुर्भवती' त्यत्र यवपदस्यार्याणां दीर्घशूकविशेषे प्रयोगः, कङ्गौ प्रयोगस्तु शक्तिभ्रमात्; नाना- शक्तिकल्पनं तु न, गौरवात्। हर्यादिपदे तु विनिगमकाभावात् तत्कल्पनम्। एवं विवरणादपि, तच्च तत्समानार्थकपदान्तरेण तदर्थकथनम्। यथा घटोऽस्तीत्यस्य कलशोऽस्तीत्यनेन विवरणाद् घटपदस्य कलशे शक्तिग्रहः। एवं प्रसिद्धपदस्य सान्नि- ध्यादपि, यथेह सहकारे मधुरं पिको रौतीत्यत्र पिकशब्दस्य कोकिले शक्तिग्रहः।

शक्तं पदम्। तच्चतुर्धा। तथाहि—यत्रावयवार्थ एव बुध्यते तद्यौगिकं, पाचकादिपदम्। यत्र समुदायशक्तिमात्रेण बुध्यते तद् रूढं, गो—मण्डलादिपदम्। यत्रावयवशक्तिविषये समुदायशक्तिरप्यस्ति तद् योगरूढं, पङ्कजादिपदम्। तत्रा- वयवशक्त्या पङ्कजनिकर्तृत्वं समुदायशक्त्या च पद्मत्वं बुध्यते। रूढिज्ञानस्य केवलयौगिकार्थज्ञाने प्रतिबन्धकत्वेन न केवलावयवशक्त्या कुमुदे प्रयोगः। **मणि- कारस्तु** समुदायशक्त्युपस्थितपद्मेऽवयवार्थपङ्कजनिकर्तुरन्वयो भवति, सान्नि- ध्यात्। यत्र रूढ्यर्थबाधप्रतिसन्धानं तत्र लक्षणया कुमुदादेर्बोधः; यत्र कुमुदत्वेन बोधे न तात्पर्यज्ञानं पद्मत्वस्य च बाधस्तत्र चाऽवयवशक्तिमात्रेण निर्वाह- इत्याहुः। यत्र स्थलपद्मादाववयवार्थबाधस्तत्र समुदायशक्त्या पद्मत्वेन बोधः;

यदि तद् विजातीयमेव तदा लक्षणयैव । यत्र यौगिकार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधस्तद्यौगिकरूढम् , उद्भिदादिपदम् । अत्र हि तरुगुल्मादिर्यागविशेषोऽपि बुध्यत इति ।

अथ लक्षणा । सा च शक्यसम्बन्धरूपा । तथा च ( 'गङ्गायां घोष' इत्यत्र) प्रवाहरूपशक्यार्थसम्बन्धस्य तीरे गृहीतत्वात् तीरस्य स्मृतिः, ततः शाब्दबोधः । इयं च तात्पर्यानुपपत्तिप्रतिसन्धानाद् भवति । नान्वयानुपपत्तिर्लक्षणाबीजम् । तदा हि यष्टीः प्रवेशय इत्यादौ लक्षणा न स्याद् , यष्टिषु प्रवेशान्वयानुपपत्तेरभावात्; तेन तत्प्रवेशे भोजनतात्पर्यानुपपत्त्या यष्टिधरेषु लक्षणा । एवं काकेभ्यो दधि रक्ष्यतां, छत्रिणो यान्तीत्यादावपि बोध्यम् । किञ्चैवं गङ्गापदस्य क्वचित्तीरे क्वचिद् घोषपदस्य मत्स्यादौ लक्षणेति नियमो न स्यात् । अत्र शक्तिलक्षणाऽन्यतरसम्बन्धेनेतरपदार्थान्वितस्वशक्यार्थशाब्दबोधं प्रति पदानां सामर्थ्यात् लाक्षणिकानां शाब्दबोधे पदान्तरं कारणमिति केचित् । अत्र लक्षणा द्विधा, केवललक्षणा लक्षितलक्षणा च । गङ्गायां घोष इत्यत्राद्या, द्विरेफपदस्य भ्रमरेऽपरा । एवं विषं भुङ्क्ष्वेत्यत्र जहत्स्वार्था, यष्टीः प्रवेशयेत्यादावजहत्स्वार्था । तत्त्वमसीत्यादौ वेदान्तिनां जहदजहत्स्वार्थाऽपि । केचित्तु 'काकेभ्यो' इत्यत्रैवेयम् । एवं गौणीशुद्धेत्यादयोऽपि भेदा अवगन्तव्याः । वाक्ये तु शक्तेरभावाल्लक्षणाऽपि नास्ति । गभीरायां नद्यां घोष इत्यत्र नदीपदस्य नदीतीरे लक्षणा, गभीरपदार्थस्य व्युत्पत्तिवैचित्र्यान्नद्या सहाऽभेदान्वयः । एकदेशान्वयाऽस्वीकारे तु नदीपदस्य गभीरनदीतीरे लक्षणा, गभीरपदं तात्पर्यग्राहकम् । एवं समासेऽपि । तत्र बहुव्रीहौ चित्रगुरित्यादौ गोपदस्य गोमति लक्षणा गवि चित्राऽभेदान्वय; यद्वा गोपदस्य चित्रगोमति लक्षणा, चित्रपदं तात्पर्यग्राहकम् । एवमारूढवानरो वृक्ष इत्यत्र वानरपदस्य वानरारोहकर्मणि लक्षणा, आरूढपदं तात्पर्यग्राहकम् । तत्पुरुषे पूर्वपदे लक्षणा, राजपुरुष इत्यादौ निपातातिरिक्तनामार्थयोर्भेदेनान्वयस्याऽव्युत्पन्नत्वाद् राजपदार्थेन पुरुषपदार्थस्य साक्षान्नान्वयस्तस्माद् राजपदे राजसम्बन्धिनि लक्षणा, पुरुषेण सहाऽभेदान्वयः । न चात्र लुप्तविभक्तेः स्मरणं, अस्मृतविभक्तेरपि ततो

बोधात्। द्वन्द्वे धवखदिरौ छिन्धीत्यादौ धवः खदिरश्च विभक्त्यर्थद्वित्वप्रकारेण बुध्यते। न चैकक्रियान्वयित्वरूपसाहित्ये लक्षणा, क्रियाभेदेऽपि तद्दर्शनात् साहित्यस्याऽननुभवाच्च। अत एव लाघवाद् राजपुरोहितौ सायुज्यकामौ यजेयातामित्यत्र द्वन्द्व आश्रीयते। किन्तु वास्तवभेदे द्वन्द्वः, नीलघटयोरभेद इत्यादौ नीलपदस्य नीलत्वे घटपदस्य घटत्वे लक्षणा, अभेद इत्यस्य चाऽश्रयाऽभेद इत्यर्थान्न दोषः। समाहारद्वन्द्वे तु अहिनकुलमित्यादौ परपदेऽहिनकुलसमाहारे लक्षणा, पूर्वपदं तात्पर्यग्राहकम्। भेरीमृदङ्गं वादयेत्यत्र तु स्वाश्रयवृत्तित्वसम्बन्धेन समाहारस्यान्वयः, एवं पञ्चमूलीत्यादावपि। परे त्वहिर्नकुलश्च बुध्यते, प्रत्येकमेकत्वान्वयः, समहारसंज्ञा च यत्रैकत्वं नपुंसकत्वं च प्राणितूर्येत्यादि सूत्रेणोक्तं तत्रैव, अन्यत्रैकवचनमसाध्विति वदन्ति। पितरौ श्वसुरावित्यादौ पितृपदे जनकदम्पत्योः, श्वसुरपदे स्त्रीजनकदम्पत्योर्लक्षणा। घटा इत्यादौ घटोपस्थितिसम्भवान्न लक्षणा। कर्मधारये नीलोत्पलमित्यादावभेदसम्बन्धेन नीलपदार्थे उत्पलपदार्थे प्रकारस्तत्र न लक्षणा। अत एव निषादस्थपतिं याजयेदित्यत्र कर्मधारय एव; श्रुतिबोधितयाजनानुपपत्त्यैव च तस्य शूद्रस्यापि यागोपयुक्ताध्ययनस्य कल्प्यत्वात्। उपकुम्भमर्द्धपिप्पलीत्यादौ परपदे तत्सम्बन्धिनि लक्षणा, तथा च कुम्भसम्बन्ध्यभिन्नसमीपं पिप्पलीसम्बन्ध्यभिन्नमर्द्धमित्यन्वयबोध इति।

अथात्रासत्तियोग्यताऽऽकाङ्क्षातात्पर्यज्ञानानि कारणानि। तत्रासत्तिर्यत्पदार्थेन सह यत्पदार्थस्यान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिः। तेन गिरिर्भुक्तं वह्निमान् देवदत्तेनेत्यत्र न बोधः। नीलो घटो द्रव्यं पट इत्यत्र त्वासत्तिभ्रमेऽपि शाब्दप्रमा। एकपदार्थेऽपरपदार्थसम्बन्धो योग्यता। तज्ज्ञानाभावाच्च वह्निना सिञ्चतीत्यत्र न शाब्दबोधः। अपूर्ववाक्यार्थस्थलेऽपि सम्भवत्येव तत्तत्पदार्थस्मरणे सति संशयरूपं निश्चयरूपं वा योग्यताज्ञानम्। नव्यास्तु उक्तस्थाने सेके वह्निकरणकत्वाभावरूपाऽयोग्यतानिश्चयेन प्रतिबन्धान्न शाब्दबोधः; तदभावनिश्चयस्य लौकिकसन्निकर्षाऽजन्यदोषविशेषाऽजन्यतज्ज्ञानमात्रे प्रतिबन्धकत्वात्। योग्यताज्ञानविलम्बाच्च शाब्दबोधविलम्बोऽसिद्ध इत्याहुः। शाब्दिकास्त्वयोग्यता-

निश्चयोऽपि न प्रतिबन्धकः, तत्सत्त्वेऽपि त्वं बृहस्पतिरिति स्तावकवाक्यात् सन्तोषोपलब्धेः। वह्निना सिञ्चतीत्यपि वाक्यस्फोट एव, तात्पर्यविषयाऽबाधरूपयोग्यतासत्त्वात्, अत्युष्णजलेन सिञ्चतीति तत्र तात्पर्यादिति **वदन्ति**। येन पदेन विना यत्पदस्याऽन्वयाऽननुभावकत्वं तेन सह तस्याकाङ्क्षा। यथा क्रियापदेन कारकपदस्य। वस्तुतो घटकर्मताबोधं प्रति घटपदोत्तरद्वितीयारूपाकाङ्क्षाज्ञानं कारणं, तेन घटः कर्मत्वमानयनं कृतिरित्यत्र न शाब्दबोधः। **अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ तात्पर्यग्रहाधीनोऽन्वयबोधः। जिज्ञासां** प्रति योग्यता आकाङ्क्षेति तु तत्त्वम्। सा च स्मारिततदाक्षिप्तयोरविनाभावे सति श्रोतरि तदुत्पाद्य संसर्गाविगमप्रागभावः। वक्तुरभिप्रायस्तात्पर्यम्। तज्ज्ञानादेव सैन्धवमानयेत्यत्र क्वचिदश्वस्य क्वचिल्लवणस्य च बोधः। न चात्र प्रकरणादीनां कारणत्वं, अननुगमात्; तात्पर्यज्ञानजनकत्वेनानुगमे च गौरवात्। इत्थं च वेदेऽपि तात्पर्यज्ञानार्थमीश्वरः कल्प्यते। न च तत्राध्यापकतात्पर्यज्ञानं हेतुः, सर्गादौ तदभावात्। संवादिशुकवाक्यादावपीश्वरीयमेव तत्। **अन्ये तु** नानार्थादौ क्वचिदेवेदं कारणम्। वेदे तु मीमांसापरिशोधितन्यायादेवार्थोऽवधार्यते इति **वदन्तीति**।

**कपिलास्तु** प्रत्यक्षानुमागमास्त्रय एव प्रमाणानीत्याहुः। अर्थापत्तिरपीति **प्राभाकराः**। उपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः। सा द्विविधा, दृष्टार्थापत्तिः श्रुतार्थापत्तिश्च। यथा दिवा अभुञ्जानस्य प्रत्यक्षदृष्टेन पीनत्वेनानुपपद्यमानेन रात्रिभोजनकल्पना, यथा च शतवर्षजीविनो देवदत्तस्य श्रुतेन गृहासत्त्वेनानुपपद्यमानेन बहिस्सत्त्वकल्पना॥ अनुपलब्धिरपीति **भाट्टवेदान्तिनौ**। तत्र ज्ञानकरणाजन्याभावानुभवासाधारणं कारणमनुपलब्धिः। अत्र **वेदान्तिमते** प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेदो ज्ञानगतप्रत्यक्षत्वं, प्रमातृसत्तातिरिक्तसत्ताकत्वाभावश्च विषयगतप्रत्यक्षत्वम्। अत्र घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यं, अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यं, अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्। तत्र तैजसमन्तःकरणं चक्षुरादिद्वारा घटादिदेशं गत्वा तदाकारेण

परिणमति, स एव परिणामो वृत्तिरित्युच्यते। तथा च घटादेस्तद्वृत्तेश्च बहिरेकत्र देशे समवधानात्तदुभयावच्छिन्नं चैतन्यमेकमेव, उपाध्योरेकदेशस्थत्वस्योपधेया-भेदप्रयोजकत्वात्। इत्थं च घटावच्छिन्नचैतन्यतद्वृत्त्यवच्छिन्नचैतन्ययोरभेदाद् घटज्ञानस्य प्रत्यक्षत्वम्। एवं घटादेः स्वावच्छिन्नचैतन्येऽध्यस्ततया विषयचैतन्य-सत्तैव घटसत्ता, अधिष्ठानसत्तातिरिक्ताया आरोपितसत्ताया अनङ्गीकारात्। विषयचैतन्यं चोक्तरीत्या प्रमातृचैतन्यमेवेति घटाद्यधिष्ठानतया प्रमातृसत्तैव घटादिसत्ता, नान्येति सिद्धं घटादेरप्यपरोक्षत्वमिति॥ सम्भवैतिह्ये अपीति **पौराणिकाः**। तत्र प्रचुरसाहचर्यसंवेदनादबाधिता बुद्धिः सम्भवः। यथा सम्भवति मेघे जलमिति। सन्दिग्धाप्तोक्तप्रवाहपारम्पर्यमैतिह्यम्। यथा वेदः प्रमाणमिति। **चेष्टापीत्यन्ये**॥

**तदेतत् सर्वमयुक्त**मिति सूचयितुमाह—**तच्च द्विधेति**। प्रमाणं द्विविधं, प्रत्यक्षं परोक्षं च। तत्राक्षमिन्द्रियं जीवं वा प्रति गतं—कार्यत्वेनाश्रितं प्रत्यक्षम्। अक्षेभ्योऽक्षाद्वा परतो वर्तत इति परोक्षम्। लक्षणमाह—**स्पष्टमिति**। अत्र प्रत्यक्षत्वं नेन्द्रियजन्यज्ञानत्वं, ज्ञानमात्रस्य मनोरूपेन्द्रियजन्यत्वात्; इन्द्रियत्वस्य प्रत्यक्ष-घटितत्वेन तेन रूपेणाऽहेतुत्वात्। नापि ज्ञानाऽकरणकज्ञानत्वं, निदिध्यासनद्वारा मननजन्ये तत्त्वज्ञानेऽव्याप्तेः। किन्तु स्पष्टता तल्लक्षणम्। सा चानुमानाद्याधिक्येन विशेषप्रकाशनम्, साक्षात्कारितेति यावत्। अत्र ज्ञानावरणक्षयोपशमजन्य-तावच्छेदकत्वेन तत्क्षयजन्यतावच्छेदकत्वेन स्पष्टताद्वयसिद्धिः। लक्षणं तु स्पष्टता-त्वेनानुगतीकृतैव। न चावग्रहेऽव्याप्तिस्तत्रापि प्रतिनियतमनुष्यत्वाद्याकाराभिव्य-ञ्जकस्पष्टताया निरपायत्वात्। वस्तुतस्तु प्रत्यक्षत्वमवध्यादावेव, सांव्यवहारिके त्वौपचारिकं तत्; इन्द्रियादिव्यवहितात्मव्यापारजन्यत्वेन वस्तुतः परोक्षत्वात्। इत्थं चात्ममात्रजन्यत्वमेव तदिति॥३१॥

प्रत्यक्षं विभजते—

**सांव्यवहारिक-पारमार्थिकत्वेन तद् द्विधा।**
**सांव्यवहारिकं तत्रे-न्द्रियाऽनिन्द्रियहेतुकम्॥३२॥**

**सांव्यवहारिकेति** । तद् द्विभेदं, सांव्यवहारिकं पारमार्थिकं च । ननु किमिदं सांव्यवहारिकत्वम्? व्यवहारनयाभिमतत्वं चेत्, **अवध्यादावतिप्रसङ्गः**, स्पष्टत्वेन तद्व्यवहारात् । नाप्यपारमार्थिकत्वं, कार्त्स्न्येन **स्पष्टत्वाभावरूपस्य** तस्य विकलप्रत्यक्षेऽपि सत्त्वादिति चेन्न, **इन्द्रियजन्यस्य सांव्यवहारिकत्वेनाऽव**धिमनःपर्याययोस्तु विकलप्रत्यक्षत्वेन परिभाषणात् । एतच्च द्विविधं, **इन्द्रियजमनि**न्द्रियजं च । आद्यं चक्षुरादिजम् । अत्र मनसो व्यापारेऽपीन्द्रियस्यैवासाधारणकारणत्वम् । परं मनोजन्मेति ॥३२॥

अथेन्द्रियानिन्द्रिये निरूपयति—

**इन्द्रियमिन्द्रलिङ्गं स्या-दिन्द्रदृष्टं तथैव च ।**
**इन्द्रसृष्टमिन्द्रजुष्ट-मिन्द्रश्चात्मा प्रकीर्तितः ॥३३॥**

**इन्द्रियमिति** । इन्दनात्—सर्वद्रव्येष्वैश्वर्ययोगाद् विषयेषु वा परमैश्वर्ययोगाद् इन्द्रो जीवः । तस्य लिङ्गं चिह्नमिन्द्रियम् । तत्पर्यायानाह—**इन्द्रदृष्टमित्यादि** । तत्र दृष्टं जीवेनोपलब्धिं ग्राहितं, सृष्टमुपलम्भहेतुतया परिणामितं, जुष्टं शब्दादीनां व्यञ्जकहेतुत्वादासेवितं, एवमिन्द्रदिष्टमित्यपि जीवेन प्रवर्त्तितमित्यर्थः ॥३३॥

तद्भेदानाह—

**तच्चोक्तं पञ्चधा स्पर्श-जिह्वाघ्राणाक्षिकर्णतः ।**
**द्विधा तद् द्रव्यभावाभ्यां, ते द्वे एवं द्विधा मते ॥३४॥**
**निर्वृत्तिरुपकरणं, द्रव्यतस्तत्र भाव्यताम् ।**
**लब्धिश्चाथोपयोगश्च, भावतः परिभावितम् ॥३५॥**

**तदिति** । इन्द्रियं स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रं च, न तु वाक्पाणिपादपायूपस्थान्यपि, एवं सति भ्रूक्षेपस्तनादेरपि तत्त्वापत्तेः । **द्विधा तदिति** । तत् पञ्चविधमपीन्द्रियं द्विविधं, पुद्गलद्रव्यरूपं द्रव्येन्द्रियं आत्मपरिणतिरूपं च भावे-

न्द्रियमिति । **निर्वृत्तिरिति** । तत्राद्यं द्विविधं, निर्वृत्तीन्द्रियमुपकरणेन्द्रियं च । तत्र निर्वृत्तिर्द्विधा, अनियताकारा शशष्कुल्यादिरूपा बाह्यनिर्वृत्तिः । खड्गस्थानीयायाश्चास्यास्तद्धारासमाना स्वच्छतरपुद्गलात्मिका प्रतिनियताकाराऽऽभ्यन्तरनिर्वृत्तिः । शुद्धात्मप्रदेशरूपेयमित्यप्येके । अस्याः शक्तिविशेषश्चोपकरणेन्द्रियम् । एतदपि निर्वृत्त्यपेक्षया द्विविधेत्यप्येके । **लब्धिरिति** । भावेन्द्रियं द्विधा, लब्धिरुपयोगश्च । तत्र लब्धिः प्रतिस्वमिन्द्रियावरणक्षयोपशमः उपयोगश्च स्पर्शादिग्रहणरूप आत्मव्यापारः । अत्र सत्यामेव लब्धौ निर्वृत्त्युपकरणोपयोगा भवन्तीति ॥३४॥३५॥

अथैतद्विषयमाह—

**स्पर्शरसगन्धवर्ण–शब्दा अनुक्रमादिमे ।**
**एतेषां विषया ज्ञेया वक्ष्यन्तेऽग्रश्चं तद्विधाः ॥३६॥**

**स्पर्शेति** । स्पर्शादयो यथासंख्यं स्पर्शनेन्द्रियादीनां विषयाः । स्पर्शादिभेदाश्चाग्रे वक्ष्यन्ते । नन्वेवं न कस्यापि गोचरो द्रव्यम् ? । मैवम् । स्पर्शादीनां द्रव्यपर्यायत्वेन पर्यायग्रहणे द्रव्यग्रहणावश्यकत्वात् । एतेन चक्षुस्त्वग्मनांसि द्रव्यग्राहकाणि नेतराणीन्द्रियाणीत्यपास्तम् । शर्करास्वादे 'इयं शर्करे'ति रासनादिद्रव्यसाक्षात्कारस्याप्यनुभवसिद्धत्वात्, तस्य भ्रान्तत्वकल्पनेऽन्यत्राप्यनाश्वासात् । रसादिना द्रव्यानुमानं तु रूपादिना द्रव्यानुमानतुल्ययोगक्षेमम् । समं द्रव्यग्राहकप्रत्यासत्त्यकल्पनलाघवमपि । प्रत्यासत्तयश्चास्माकं बद्धस्पृष्टताऽऽभिमुख्यस्पृष्टता च एव; ताश्च द्रव्यद्वारैव पर्यायेष्वित्युभयग्रहणं युक्तमेवेति । तत्र स्पर्शरसगन्धेषु बद्धपृष्टता प्रत्यासत्तिः, रूपे आभिमुख्यं, शब्दे स्पृष्टता । तत्र बद्धस्पृष्टं नवशरावे तोयवद् आत्मप्रदेशैरात्मीकृतं, अभिमुखं योग्यदेशावस्थितं, स्पृष्टं तनौ रेणुवदालिङ्गितम् । अत्र पञ्चेन्द्रियाणि प्राप्यकारीणि । तत्र चक्षुषो विषयदेशगमनमित्याक्षपादाः । श्रोत्रस्यापि विषयदेशगमनमिति **वेदान्तिनः** । श्रोत्रमप्राप्यकारीति तु **सौगताः** । स्पर्शनरसनघ्राणश्रोत्राण्येव प्राप्यकारीणीति तु तत्त्वम् ॥३६॥

अथानिन्द्रियं निरूपयति—

**अनिन्द्रियं मनो द्वैधं, द्रव्यभावप्रकारतः ।**
**एतद् द्वयं भवेद् द्वेधा, मतिश्रुतविकल्पतः ॥३७॥**

**अनिन्द्रियमिति ।** अनिन्द्रियं मनः । तद् द्विविधं, द्रव्यमनो भावमनश्च । तत्र सर्वात्मप्रदेशवर्त्तिमनःपर्याप्तिकरणेन चित्तार्थं गृहीता मनोवर्गणास्कन्धा द्रव्यमनः । भावमनस्तु चित्तचेतनायोगाध्यवसानादिरूपो जीवोपयोगः । एतेन मनोऽणु इति निरस्तम् । सर्वाङ्गीणसुखाद्युपपत्तये मनोवर्गणापुद्गलानां शरीरव्यापकत्वकल्पनात् । पौद्गलिकत्वादेव चास्य जातिस्मरणादिसमयेऽतिचिन्तातश्चितसङ्कटजमूर्च्छापि सङ्गच्छते । अथ त्वङ्मनोयोगो ज्ञानसामान्ये कारणं, तथा च मनोऽणुत्व एव सुषुप्तौ पुरीतति वर्त्तमानेन तेन ज्ञानाऽजननं सङ्गच्छते । अन्यथा सुषुप्तिप्राक्कालोत्पन्नज्ञानव्यक्तिस्तत्सम्बन्धेनात्मनश्च प्रत्यक्षत्वापत्तेः । तदतीन्द्रियत्वे च मानाभावादिति चेत् । न । रासनकाले त्वाचरासनोभयोत्पत्तिवारणस्येत्थमप्यसम्भवात् । रासनादिसामग्र्याः स्पार्शनप्रतिबन्धकत्वकल्पने गौरवाच्च । ज्ञानसामान्यकारणमपि तत्क्षयोपशमादिरेव । इत्थं च चर्ममनःसंयोगस्यापि तद्धेतुत्वमपास्तं, विजातीयात्ममनःसंयोगस्यैव हेतुत्वेनैव निरुक्तप्रत्यक्षवारणाच्च । युगपदनेकप्रत्ययाऽनुत्पत्तौ तु स्वभाव एव कारणमित्यतोऽपि न तस्याणुत्वसिद्धिरिति । एवं निरूपितं सांव्यवहारिकमथ तन्मतिश्रुतात्मकमेवेति दर्शयति—**एतद्द्वयमिति ।** इन्द्रियजमनिन्द्रियजमिति द्वयमपि मतिश्रुतभेदाद् द्विधा । इन्द्रियानिन्द्रियजत्वेन मतिश्रुतयोरेवान्तर्भवतीति भावः । एवमनुमानादीनामप्यत्रैवान्तर्भावो बोध्य इति ॥३७॥

अथ मतिश्रुतयोर्लक्षणमाह—

**स्याच्छ्रुताननुसार्याद्य-मितरं चेतरं मतम् ।**
**अवग्रहादिका प्रोक्ता, चतुर्धैव मतिर्यतः ॥३८॥**

**स्यादिति ।** मतिज्ञानत्वं श्रुताऽननुसारित्वे सतीन्द्रियजन्यमनोजन्यज्ञानान्यतरत्वम् । अवग्रहादिक्रमवदुपयोगजन्यज्ञानत्वं वा । श्रुतानुसारित्वं श्रुतज्ञानत्वं,

तच्च धारणात्मकपदपदार्थप्रतिसन्धानजन्यत्वम् । अत्रेहादिमतिज्ञानभेदस्य श्रुतज्ञानस्य च साक्षरत्वाऽविशेषेऽप्ययं घट इत्यपायोत्तरमयं घटनामको नवेति संशयाऽदर्शनात् तत्तन्नाम्नोऽप्यपायेन ग्रहणात् । तद्धारणोपयोगे इदं पदमस्य वाचकं, अयमर्थ एतत्पदस्य वाच्य इति । पदार्थसम्बन्धग्रहणस्यापि ध्रौव्येण तज्जनितश्रुतज्ञानस्यैव श्रुतानुसारित्वं, न तु सविकल्पकज्ञानसामग्रीमात्रप्रयोज्यपदविषयताशालिन ईहादेः । अत एव धारणात्वेन श्रुतहेतुत्वात् मतिपूर्वं श्रुतमित्यनेन श्रुतत्वावच्छेदेन मतिपूर्वत्वविधिः । धारणादिरहितानामेकेन्द्रियादीनां त्वाहारादिसंज्ञान्यथानुपपत्त्यान्तर्जल्पाकारविवक्षितार्थवाचकशब्दसंस्पृष्टार्थज्ञानरूपं श्रुतज्ञानं क्षयोपशममात्रजनितं जात्यन्तरमेव । **अवग्रहेति** । अत्रावग्रहेहाद्यात्मिका मतिरुक्तैव ॥३८॥

नन्वीहायाः संशयरूपत्वात् त्रिविधैव मतिः प्रमाणमिति चेदत आह—

**ईहा स्यात् संशयाद् भिन्ना, संशयोत्तरभाविनी ।**
**क्रमश्चैव तथा हेतु–क्षयोपशमभावतः ॥३९॥**

**ईहेति** । ईहा न संशयस्तदुत्तरभावित्वात्, तस्यैकत्र धर्मिणि विरुद्धनानार्थज्ञानरूपत्वात् । अस्याश्च निश्चयाभिमुखत्वेन विलक्षणत्वात् । अत्रावग्रहादयो मिथः कथञ्चिद् भेदेऽपि अपूर्वापूर्ववस्तुपर्यायप्रकाशकत्वात् क्रमभावित्वाच्च व्यतिरिच्यन्ते । क्रमोऽपि तथैव हेतुभावात् तथा क्षयोपशमाच्च । तथा हि—अवग्रहस्तदवान्तरधर्माकारेहायां तत्सामान्यज्ञानत्वेन; ईहा तद्धर्मप्रकारतानिरूपिततद्धर्मिनिष्ठसाध्यत्वाख्यविषयतावदीहात्वेन तादृशसिद्धत्वाख्यविषयतावदपायत्वावच्छिन्ने; धारणायां च समानप्रकारकानुभवत्वेन विशिष्टभेदे समानविषयकानुभवत्वेन वाऽपायो हेतुः । अत्रेदं बोध्यम्—मतिर्द्विविधा । तत्र स्वसमानाकारश्रुतज्ञानाहितवासनाप्रबोधसमानकालीनत्वे सति श्रुतोपयोगाभावकालीना श्रुतनिश्रिता आद्याऽवग्रहादिचतुर्भेदा । उक्तवासनाप्रबोधाऽसमानकालीना चाऽश्रुतनिश्रिता द्वितीया । इयमप्यौत्पत्तिकी वैनयिकी कार्मिकी पारिणामिकीति चतुर्विधेति ॥४०॥

अथ प्रकारान्तरेण श्रुतं विभजते–

**श्रुतज्ञानं समाख्यातं, चतुर्दशविधं जिनैः ।**
**अक्षरं संज्ञि सम्यक् च, सादि सान्तं तथा गमि ॥४१॥**

**एवमङ्गप्रविष्टं च, प्रतिपक्षान्वितं मतम् ।**
**सांव्यवहारिकं प्रोक्तं, मयैवं च यथामति ॥४२॥**

**श्रुतेति ।** श्रुतज्ञानमक्षराऽनक्षरादिभेदेन चतुर्दशधा । तत्राक्षरं त्रिधा,–संज्ञा–व्यञ्जन–लब्धिभेदात् । बहुविधलिपिभेदमाद्यं, भाष्यमाणमकारादि द्वितीयं; एते चोपचाराच्छ्रुते । लब्ध्यक्षरं त्विन्द्रियमनोनिमित्तः श्रुतोपयोगस्तदावरणक्षयोपशमो वा । इदमेकेन्द्रियाणामपि, अव्यक्ताक्षरलाभात् । अनक्षरश्रुतमुच्छ्वसितादि, तस्यापि भावश्रुतहेतुत्वात् । समनस्कस्य संज्ञिश्रुतम् तद्विपरीतमसंज्ञिश्रुतम् । सम्यक्श्रुतमङ्गाऽनङ्गप्रविष्टं, लौकिकं तु मिथ्याश्रुतम् । स्वामित्वचिन्तायां तु भजना । सम्यग्दृष्टिगृहीतं मिथ्याश्रुतमपि सम्यग्, अवितथभावित्वादिना यथास्थानं तदर्थविनियोगात् । विपर्ययान्मिथ्यादृष्टिगृहीतं सम्यगपि मिथ्या । एकपुरुषाद्याश्रित्य सादि, नानापुरुषाद्याश्रित्यानादि । एवं सान्तानन्तभेदावपि भाव्यौ । गमिकं सदृशपाठं प्रायो दृष्टिवादगतम् । अगमिकमसदृशपाठं प्रायः कालिकश्रुतगतम् । अङ्गप्रविष्टं गणधरकृतं, अनङ्गप्रविष्टं तु स्थविरकृतम् । अत्र मतिश्रुतयोर्विषयनियमः सर्वद्रव्येष्वसर्वपर्यायेषु । मतिज्ञानं साम्प्रतविषयं, श्रुतं त्रिकालविषयम् । यद्यपि मतिस्मृतिचिन्तारूपेण मतेरपि त्रिकालविषयत्वं, तथापि तद्भिन्नोपयोगावच्छेदेन; श्रुतं त्वेकोपयोगावच्छेदेन तदित्यदोष इत्येवं मतिश्रुतलक्षणं सप्रभेदं सांव्यवहारिकं प्रत्यक्षं निरूपितम् ॥४०–४१॥

अथ पारमार्थिकं तदाह–

**पारमार्थिकमुत्पत्तावात्ममात्रसमाश्रितम् ।**
**विकलं सकलं चाद्य–मवधिर्मनआख्यकम् ॥४२॥**

**पारमार्थिकमिति**। तत्त्वं चात्ममात्रजन्यत्वम्। तच्चोत्पत्ताविन्द्रियमनोनिरपेक्षत्वमेव। तेनाऽवध्यादेः क्षयोपशमभावापन्नकर्मपुद्गलजन्यत्वेऽपि न क्षतिः। तद् द्विविधं, विकलं सकलं च। तत्राद्यमवधिज्ञानं मनःपर्यायज्ञानं च ॥४२॥

तत्रावधिज्ञानं निरूपयति—

**विशिष्टावृतिविच्छेदा-दवधी रूपिगोचरः।**

**विशिष्टेति।** अवधिज्ञानत्वं रूपित्वसमव्याप्यविषयताशालिज्ञानवृत्तिज्ञानत्वव्याप्यजातिमत्त्वम्। तादृशज्ञानं च परमावधिज्ञानम्। इदं चाऽवधिज्ञानावरणक्षयोपशमविशेषाद्भवति ॥

मनःपर्यायज्ञानं निरूपयति—

**मनःपर्यायकं ज्ञानं, हृदयमात्रगोचरम् ॥४३॥**
**अनेकर्द्धिनिधानानां, शुद्धसंयमशालिनाम्।**
**आपुष्करार्द्धमाख्यातं, संज्ञिनां चित्तवेदकम् ॥४४॥**

**मन इति।** मनोमात्रसाक्षात्कारि मनःपर्यायज्ञानम्। चिन्त्यमानाः स्तम्भकुम्भादयो बाह्यपदार्थास्तु मनोद्रव्याणां तथारूपपरिणामान्यथानुपपत्तिप्रसूतानुमानत एवावगम्यन्ते। अथास्य स्वामिन आह—**अनेकेति**। इदं मनुष्यक्षेत्रवर्त्तिसर्वसंज्ञिनां मनोभाववेदकम्। आमर्षौषध्याद्यनेकर्द्धिमतामप्रमत्तसंयतानां मनःपर्यायज्ञानावरणक्षयोपशमादुत्पद्यते ॥४३-४४॥

अत्र नव्यमतमाह—

**अवधिज्ञानमेवेद-माहुर्नव्या महाशयाः।**
**सूत्रे भेदाभिधानं च, धर्मभेदाभिप्रायतः ॥४५॥**

**अवधीति। नव्यास्तार्किकास्तु** मनोद्रव्याकारग्राहकमिदमवधिविशेष एव। सूत्रे भेदाभिधानं च धर्मभेदाभिप्रायम्। अप्रमत्तसंयमविशेषजन्यतावच्छेदकजातेरवधित्वव्याप्यताया एव कल्पनात्। सङ्कल्पादिपरिणतद्रव्यमात्रग्राह्यभेदाद्

भेदे द्वीन्द्रियादिसूक्ष्मसङ्कल्पजननपरिणतद्रव्यविषयमपि मनःपर्यायज्ञानं स्यात्; चेष्टाहेतोरेव मनसस्तद्ग्राह्यत्वात्। न च ज्ञानस्य पञ्चविधत्वोच्छेदादुत्सूत्रापत्तिः। भाषावल्लयविवेकेनोत्सूत्राभावादित्याहुः ॥४५॥

केवलज्ञानं निरूपयति—

**घातिकर्मक्षयोद्भूतं, सर्वभावप्रकाशकम्।**
**केवलज्ञानमाख्यातं, सकलं सकलं सदा ॥४६॥**

**घातिकर्मेति।** ज्ञानावरणदर्शनावरणमोहनीयान्तरायक्षयात् केवलज्ञानमुत्पद्यते। न च योगजधर्मानुगृहीतमनोजन्यमेवेदं; धर्मानुगृहीतेनापि मनसा पञ्चेन्द्रियार्थज्ञानस्य जनयितुमशक्यत्वात्। तत्त्वं च सर्वविषयत्वम्। तच्च सामान्यधर्माऽनवच्छिन्ननिखिलधर्मप्रकारकत्वे सति निखिलधर्मिविषयकत्वम्। इत्थं च प्रमेयवदिति ज्ञाने केवलदर्शने च नातिव्याप्तिः। अत्र केवलज्ञानं स्वसमानाधिकरणकेवलदर्शनसमानकालीनं न वा ?; केवलज्ञानक्षणत्वं स्वसमानाधिकरणदर्शनक्षणाव्यवहितोत्तरत्वव्याप्यं न वा ? एवमाद्या क्रमोपयोगवादिनां युगपदुपयोगवादिनां यदेव केवलज्ञानं तदेव केवलदर्शनमिति वादिनां च साधारण्यो विप्रतिपत्तयः। एतच्च तत्त्वं ग्रन्थान्तरेभ्योऽवसेयम् ॥४६॥

केवलज्ञानवानेवास्माकमीश्वरो रागद्वेषाज्ञानविरहितत्वादित्याह—

**तद्वतो दोषमुक्तत्वा-दर्हत्त्वं प्रतिपादितम्।**
**तस्माच्च तत्र नैवेष्टा, क्षित्यादीनां तु कर्तृता ॥४७॥**

**तद्वत इति।** केवलज्ञानवतः। दोषा रागद्वेषमोहाः। अर्हत्त्वमष्टप्रातिहार्यादिपूजायोग्यतीर्थङ्करत्वमित्यर्थः। अस्यैव च प्रवचनं त्रिकालाऽबाधितमविच्छिन्नप्रभावशालि च। इत्थं च जगत्कर्तृतयाऽनादिशुद्धेश्वरसिद्धिर्निरस्ता। अनेकदुःखमयस्य जगतः करणे तस्य प्रयोजनाभावात्। भावे वा रागादिमत्त्वप्रसङ्गादित्याह- **तस्मादिति।** रागादिदोषमुक्तत्वादित्यर्थः। ननु तथापि क्षित्यादिकं

कर्तृजन्यं कार्यत्वादित्यत्र को दोष इति चेत्, कृतित्वेन कार्यत्वेन कार्यकारणभावे मानाभाव एव, सोपाधिकत्वं च हेतोः ।।४७।।

कथमिति चेदाह—

**जन्यत्वं तु शरीरेणो-पाधिना समलङ्कृतम् ।**

**इति प्रत्यक्षमाख्यातम्- ।।**

**जन्यत्वमिति ।** कार्यत्वमित्यर्थः । तथा च शरीरजन्यत्वोपाधिना व्याप्यत्वासिद्धो हेतुः । क्षित्यादिकं कर्त्रजन्यं शरीराजन्यत्वादिति सत्प्रतिपक्षितश्च । न चात्र शरीरविशेषणस्य व्यर्थता, धूमाभाववान् आर्द्रेन्धनजवह्निरहितत्वादित्यत्रेवासिद्धिवारकत्वेन सार्थकत्वात् । जन्यत्वाभावत्वशरीरजन्यत्वाभावत्वयोर्व्यधिकरणत्वाच्च स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तरघटितत्वैव तत्त्वात् । कम्बुग्रीवादिमान्नास्तीति प्रतीतेः सम्भवति लघौ स्वरूपसम्बन्धरूपेऽवच्छेदकत्वे गुरौ तदभावे मानाभावाच्च । प्रत्यक्षमुपसंहरति **इतीति ।।**

**इति प्रत्यक्षनिरूपणाख्यः प्रथमः परिच्छेदः ।।**

## अथ द्वितीयः परोक्षनिरूपणपरिच्छेदः ॥

परोक्षमुपक्रमते—

**परोक्षं चाथ कथ्यते ॥४८॥**

**परोक्षमिति** ॥४८॥

अथ लक्षणपुरःसरं तद्भेदसङ्ख्यामाह—

**तदस्पष्टं समाख्यातं, पञ्चधा पूर्वपण्डितैः ।**
**तत्प्रपञ्चोऽथ विज्ञेयो-वक्ष्यमाणो यथाक्रमम् ॥४९॥**

**तदिति** । परोक्षमित्यर्थः । **पञ्चधेति** । स्मरणप्रत्यभिज्ञानतर्कानुमानागम-भेदतः पञ्चप्रकारमित्यर्थः । शेषं स्पष्टमिति ॥४९॥

अथ प्रत्येकं दर्शयति—

**संस्कारबोधसम्भूत-मनुभूतार्थगोचरम् ।**
**तदित्याकारकं ज्ञानं स्मरणं कथितं बुधैः ॥५०॥**

**संस्कारेति** । स्पष्टम् । यथा तत्तीर्थकरबिम्बमिति । अनुभवमात्रजन्यज्ञानं स्मृतिरिति परमार्थस्तेन प्रमुष्टतत्ताकस्यापि तत्त्वम् । न च स्मृतेरप्रामाण्यं, प्रत्यक्षादिवदविसंवादकत्वात् । न चानुभवप्रमात्वायत्तत्वात्तत्, स्वविषयपरिच्छेदे स्वातन्त्र्यात् । अन्यथा ह्यनुमितेरप्युत्पत्तौ परापेक्षत्वेनाप्रामाण्यं स्यादिति ॥५०॥

प्रत्यभिज्ञानमाह—

**तिर्यगूर्ध्वत्वसामान्य-प्रभृत्यालम्बनं तथा ।**
**संकलनात्मकं ज्ञानं प्रत्यभिज्ञानमिष्यते ॥५१॥**

**तिर्यगिति** । अनुभवस्मृतिहेतुकं तिर्यगूर्ध्वतासामान्यादिगोचरं तदेवेद-मित्याकारकं ज्ञानं प्रत्यभिज्ञानं प्रत्यभिजानामीतिप्रतीतिसिद्धम् । यथा तज्जातीय एवायं गोपिण्डः, गोसदृशो गवयः, गोविलक्षणो महिषः, स एवायं जिनदत्तः,

इदं तस्माद्दूरं समीपं प्रांशु ह्रस्वं महत् सूक्ष्ममित्यादि। न चेदं स्मृतिसहायेन्द्रियजन्यं प्रत्यक्षमेव; तस्य स्मृतिनिरपेक्षत्वात्। एतेन सामान्यलक्षणापि निरस्ता। इत्थं च 'अयं गवयशब्दवाच्य' इति संज्ञासंज्ञिसम्बन्धप्रतिपत्तिरूपमुपमानमप्यपहस्तितं, 'गोविसदृशो महिष' इत्यादेरपि प्रमाणान्तरतापत्तेः। अनुभूतव्यक्तौ गवयपदवाच्यत्वसङ्कलनात्मकस्यास्य प्रत्यभिज्ञानत्वाऽनतिक्रमाच्चेति ॥५१॥

तर्कमाह—

**त्रिकालवर्त्तिनोर्यः स्यात् साध्यसाधनयोः खलु।**
**सम्बन्धादिस्तदालम्ब–मूहापरसुनामकम् ॥५२॥**
**उपलम्भेतरोद्भूतं विज्ञानं परिकीर्त्यते।**
**सत्येवास्मिन्निदं चेति, तर्कस्तार्किकशेखरैः ॥५३॥**

**त्रिकालेति।** सकलदेशकालावच्छेदेन साध्यसाधनभावादिविषय ऊहस्तर्कः। यथा यावान् कश्चिद् धूमः स सर्वो वह्नौ सत्येव भवति, वह्निं विना वा न भवति। न च स्वव्यापकसाध्यसामानाधिकरण्यव्याप्तेर्योग्यत्वाद् भूयोदर्शनव्यभिचारादर्शन सहकृतेनेन्द्रियेण तद्ग्रहोऽस्तु, सामान्यलक्षणया सकलसाध्यसाधनव्यक्त्युपसंहारस्यापि सम्भवादिति वाच्यम्। 'तर्कयामी' त्यनुभवसिद्धेन साध्यसाधनदर्शनस्मरणप्रत्यभिज्ञानाजनितेन तर्केणैव सकलसाध्यसाधनव्यक्त्युपसंहारेण व्याप्तिग्रहोपपत्तेः सामान्यलक्षणायां मानाभावात्। ज्ञातेनापि सामान्येन ऊहं विना सकलव्यक्त्यनुपस्थितेश्च। व्याप्यारोपेण व्यापकारोपस्तर्कस्तु विपर्ययपर्यवसायी क्वचिच्छङ्काविघटकतयैवोपयोगीति। 'घटशब्दमात्रं घटस्य वाचकं, घटमात्रं घटशब्दवाच्यं' इत्यादिर्वाच्यवाचकभावोऽपि तर्केणैवावगम्यते, तस्यैव सकलशब्दार्थगोचरत्वात्। **उपलम्भेति।** सहचारग्रहव्यभिचाराऽग्रहाभ्यामुद्भूतमित्यर्थः ॥५२–५३॥

अथानुमानं निरूपयति—

**अनुमानं द्विधा स्वार्थं परार्थं चादिमं त्विदम्।**
**हेतुग्रहणसम्बन्ध–स्मृतिहेतुकसाध्यवित् ॥५४॥**

**अनुमानमिति** । तच्च साधनात् साध्यविज्ञानम् । तत् स्वार्थं **परार्थं चेति** द्विधा । तत्र स्वार्थं हेतुग्रहणसम्बन्धस्मरणकारणकं साध्यविज्ञानम् । **यथा** गृहीतधूमस्य स्मृतव्याप्तिकस्य पर्वतो वह्निमानिति ज्ञानम् । **कारणत्वं चात्र** ग्रहणस्मरणयोः विस्मृताप्रतिपन्नसम्बन्धस्याऽगृहीतलिङ्गस्य चानुमानाऽनुत्पादात् समुदितयोरेव बोध्यम् । इत्थं च व्याप्तिप्रकारकपक्षधर्मताज्ञानरूपपरामर्शस्य हेतुता निरस्ता, पूर्वोक्तज्ञानद्वयादेवाऽनुमितेर्दर्शनाद् विलम्बाभावाच्चेति ॥५४॥

हेतुं निरूपयति—

**हेतुश्च निश्चितान्यथा–नुपपत्त्येकलक्षणः ।**
**अन्यथानुपपत्तिश्च साध्यधर्मेण गृह्यते ॥५५॥**

**हेतुरिति** । स च निश्चितान्यथानुपपत्त्येकलक्षणः । अन्यथानुपपत्तिश्चात्र हेतुप्रक्रमात् साध्यधर्मेण सार्धं ग्राह्या । अत्र त्रिलक्षण एव हेतुरिति **बौद्धाः** । लक्षणानि च पक्षसत्त्व–सपक्षसत्त्व–विपक्षाऽसत्त्वानि । अबाधितत्वाऽसत्प्रतिपक्षितत्वसहितानि पञ्च लक्षणानि हेतोरिति च **नैयायिकाः** । तन्न; पक्षधर्मत्वाभावेऽप्यस्ति नभश्चन्द्रो जलचन्द्रादित्याद्यनुमानदर्शनात् ॥५५ ।

साध्यं निरूपयति—

**अप्रतीतं च साध्यं स्या–दनिराकृतमीप्सितम् ।**
**विषयभागात् साध्यत्वं भिन्नं भिन्नमुदाहृतम् ॥५६॥**

**अप्रतीतमिति** । अप्रतीतमनिराकृतमभीप्सितं च साध्यम् । तत्र **शङ्कितवि**परीताऽनध्यवसितवस्तूनां साध्यताप्रतिपत्त्यर्थं अप्रतीतवचनम् । न च **शङ्कितस्यैव** साधनं, विपर्यस्ताऽव्युत्पन्नयोरपि परपक्षदिदृक्षादिना कथायामुपसर्पणात् **संशय**निरासार्थमिव विपर्ययाऽनध्यवसायनिरासार्थमपि प्रयोगसम्भवात् । **प्रत्यक्षादि**विरुद्धस्य साध्यत्वं मा प्रसज्यतामित्यनिराकृतग्रहणम् । इदं वादिप्रतिवाद्युभयापेक्षया बोध्यं, द्वयोः प्रमाणेनाऽबाधितस्य कथायां साध्यत्वात् । अनभिमतस्याऽसाध्यत्वप्रतिपत्तयेऽभीप्सितग्रहणं, इदं च वाद्यपेक्षयैवेति । **विषयभागादिति** ।

**भिन्नमिति** । तथाहि—व्याप्तिग्रहणसमयापेक्षया साध्यं धर्म एव, अन्यथा व्याप्त्यनुपपत्तेः । आनुमानिकप्रतिपत्त्यवसरापेक्षया तु पक्षापरपर्यायस्तद्विशिष्टः प्रसिद्धो धर्मी । वस्तुतस्तु तत्र पर्वतो वह्निमानित्यादौ हेतुग्रहणाधिकरणतयैव पक्षभानम् । क्वचिच्चान्यथानुपपत्त्यवच्छेदकतया पक्षभानं, यथा नभश्चन्द्रास्तित्वं विना जलचन्द्रोऽनुपपन्न इत्यत्र । व्याप्तिग्रहवेलायां तु पक्षस्य सर्वत्रानुवृत्त्यभावेन न तद्भानमिति । धर्मिणः प्रसिद्धिश्च क्वचिद्विकल्पतः क्वचित्प्रमाणतः क्वाप्युभाभ्याम् । यथाऽस्तित्वे साध्ये सर्वज्ञस्य, नास्तित्वे साध्ये खरविषाणस्य, वह्नौ साध्ये च पर्वतस्य, परिणामित्वसाधने शब्दस्य च । वस्तुतो विकल्पसिद्धस्थले खण्डशः सिद्धपदार्थेऽस्तित्वनास्तित्वसाधनमेवोचितमित्यन्यत्र विस्तरः ॥५६॥

परार्थमनुमानमाह—

**पक्षहेतुवचोरूपं परार्थमुपचारतः ।**
**दृष्टान्ताद्यत्र नैवाङ्गं वस्तुतो हेतुरेव च ॥५७॥**

**पक्षेति** । पक्षहेतुवचनात्मकं परार्थमनुमानम् । **उपचारत इति** । कारणे कार्योपचारादित्यर्थः, तेन श्रोतुरनुमानेनार्थबोधनात् । एवं प्रत्यक्षपरिच्छिन्नार्थाभिधायि वचनं परार्थं प्रत्यक्षम्; यथा पश्य पुरः स्फुरत्किरणमणिखण्डमण्डिताभरणभारिणीं जिनपतिप्रतिमामित्यपि बोध्यम् । हेतुश्चात्र साध्योपपत्त्यन्यथानुपपत्तिभ्यां द्विधा प्रयोक्तव्यः; यथा पर्वतो वह्निमान् सत्येव वह्नौ धूमोपपत्तेः, असत्यनुपपत्तेर्वा; अनयोश्च प्रायोऽन्यतरस्यैव प्रयोगस्यैकत्रोपयोगः । ननु पञ्चावयवरूपमेव वाक्यं परार्थानुमानं, तत्किमुक्तं पक्षहेतुवचोरूपमेवेत्यत आह—**दृष्टान्तादीति** । पक्षहेतुवचनरूपावयवद्वयस्यैव परप्रतिपत्त्यङ्गत्वान्न दृष्टान्तादिवचनमिति भावः । न चैवं हेतोरन्यथानुपपत्त्यनिर्णयः; तर्कप्रमाणेनैव तदुपपत्तेः । किञ्च यः क्षयोपशमविशेषवान् तं प्रति तु हेतुरेव प्रयोज्यः, न पक्षोऽपीत्याह—**वस्तुत इति** ॥५७॥

ननु व्युत्पन्नान् प्रति माऽस्तु दृष्टान्तादिप्रयोगः, परमव्युत्पन्नानां तदप्रयोगे कथं प्रतिपत्तिरिति चेदत आह—

**क्वचित् प्रयुज्यते नाम दृष्टान्तादिरिहापि च ।**

**क्वचिदिति ।** मन्दमतीनुद्दिश्येत्यर्थः । **दृष्टान्तादिरिति ।** दृष्टान्तोपनय-निगमनानीति । तथा च पञ्चावयवमपि परार्थानुमानमिति ॥

अत्र दृष्टान्तं निरूपयति—

**स्याद् दृष्टान्तोऽविनाभाव-प्रतिपत्तेः किलास्पदम् ॥५८॥**

**द्वेधोक्तोऽथ स साधर्म्य-वैधर्म्याभ्यां सुधीमुखैः ।**

**अन्तर्व्याप्तिर्बहिर्व्याप्ति-श्चेति व्याप्तिर्द्विधा मता ॥५९॥**

**स्यादिति । अविनाभावेति ।** व्याप्तिस्मरणस्थानं दृष्टान्तो यथा महान-सादिरिति । तद्भेदावाह—**द्वेधेति । साधर्म्येति ।** साधर्म्यदृष्टान्तो वैधर्म्यदृष्टा-न्तश्च । यत्र साधनसत्तायामवश्यं साध्यसत्ता प्रकाश्यते स आद्यः; यथा यत्र यत्र धूमस्तत्र तत्र वह्निर्यथा महानसे । यत्र तु साध्याभावे साधनस्याऽवश्यमभावः प्रदर्श्यते सोऽपरः; यथाऽग्न्यभावे न भवत्येव धूमो यथा जलाशये । दृष्टान्त-लक्षणप्रविष्टव्याप्तिभेदावाह-**अन्तर्व्याप्तीति ।** पक्षीकृत एव विषये साधनस्य साध्येन व्याप्तिरन्तर्व्याप्तिः, अन्यत्र तु बहिर्व्याप्तिः । तत्रान्तर्व्याप्त्या पक्षीय-साधनसम्बन्धग्रहात् पक्षीयसाध्यसंसर्गमानम् । तथा च तस्याः स्वरूपप्रयुक्ता-ऽव्यभिचारलक्षणत्वफलम्, बहिर्व्याप्तेश्च सहचारमात्रत्वाद् दुर्लभम् ॥५८–५९॥

अथोपनयनिगमने आह—

**उपनयो निगमनं, यथासङ्ख्यमथोच्यते ।**

**साध्यधर्मिणि यद्धेतोः साध्यधर्मस्य तु पुनः ॥६०॥**

**उपसंहरणं चैव तान्यवयवसंज्ञया ।**

**पञ्चाप्यत्र प्रसिद्धानि पण्डितानां प्रयोजने ॥६१॥**

**उपनय इति ।** साध्यधर्मिणि हेतोरुपसंहरणमुपनयः, यथा धूमश्चात्र प्रदेशे । साध्यधर्मस्य साध्यधर्मिण्युपसंहरणं निगमनं, यथा तस्मादग्निरत्र । **तानीति ।** पक्षप्रयोगादीनि पञ्चापीति; न तु प्रतिज्ञाहेतू इति द्वावेव, नापि

प्रतिज्ञादय उदाहरणादयो वा त्रय एवेति भावः । यद्वा अपिशब्दात्तच्छुद्धीनामप्यवयवसंज्ञा बोध्या । यतः पक्षादिस्वरूपविप्रतिपत्तिमतः प्रति पक्षशुद्ध्यादिकमपि वाच्यमिति सोऽयं दशावयवोऽपि हेतुर्ज्ञेय इति भावः ॥६०–६१॥

अथ प्रागुक्तं हेतुं प्रकारतो दर्शयति—

**उपलब्ध्यनुपलब्धि-भेदाद्धेतुर्द्विधा मतः ।**
**विधिनिषेधयोरेतौ, क्रमात् सिद्धिनिबन्धने ॥६२॥**

**उपलब्ध्यनुपलब्धिभेदादिति ।** अन्यथानुपपत्त्येकलक्षणो हेतुर्द्विविधः, उपलब्धिनामाऽनुपलब्धिनामा च । विधिरूपः प्रतिषेधरूपश्चेति भावः । **क्रमादिति ।** वक्ष्यमाणभेदक्रमेणेत्यर्थः । तत्र विधिरूपो विधिसाधकः प्रतिषेधसाधकश्चेति द्विधा । एवं प्रतिषेधरूपोऽपि द्विधेति तात्पर्यम् ॥६२॥

अथ विधिप्रतिषेधावाह—

**सदंशोऽत्र विधिर्ज्ञेयः, प्रतिषेधोऽसदंशकः ।**
**चतुर्विधः स विज्ञाना-मुत्तमैः परिकीर्त्तितः ॥६३॥**
**पूर्वप्रध्वंसकान्योन्या-त्यन्ताभावप्रकारतः ।**
**ज्ञेयः सोऽथोपलब्धिश्च, प्रभेदेन प्रदर्श्यते ॥६४॥**

**सदंश इति ।** सदसदंशात्मनो वस्तुनो योऽयं भावरूपः सदंशः स विधिरिति गीयते । **प्रतिषेध इति ।** तादृशस्यैव च वस्तुनो योऽयमभावरूपोऽसदंशः स प्रतिषेध इति गीयते । अथ प्रतिषेधप्रकारानाह—**पूर्वेत्यादि ।** स प्रतिषेधः प्रागभावः प्रध्वंसाभाव इतरेतराभावोऽत्यन्ताभावश्चेति चतुर्धा । तत्र यन्निवृत्तावेव कार्यस्य समुत्पत्तिः सोऽस्य प्रागभावः, यथा घटस्य मृत्पिण्डः । यदुत्पत्तौ कार्यस्याऽवश्यं विपत्तिः सोऽस्य प्रध्वंसाभावः, यथा घटस्य कपालकदम्बकम् । स्वरूपान्तरात् स्वरूपव्यावृत्तिरितरेतराभावः, यथा स्तम्भस्वभावात् कुम्भस्वभावव्यावृत्तिः । कालत्रयापेक्षिणी हि तादात्म्यपरिणामनिवृत्तिरत्यन्ताभावः, यथा चेतनाचेतनयोः । **अथेति** ॥६३–६४॥

अथेत्यादिना प्रतिज्ञातमाह—

**अविरुद्धा विरुद्धा च, तत्राद्या षड्विधा मता ।**
**सा साध्येनाऽविरुद्धानां, व्याप्यादीनां विभाविता ॥६५॥**

**अविरुद्धेति ।** उपलब्धिर्द्विविधा, अविरुद्धोपलब्धिर्विरुद्धोपलब्धिश्चेति । **आद्येति ।** अविरुद्धोपलब्धिरित्यर्थः । **षड्विधेति ।** षड्विधत्वमेवाह—**सेत्यादिना ।** तथा हि—अविरुद्धोपलब्धिनामा हेतुः षोढा, व्याप्य—कार्य—कारण—पूर्वचरो—त्तरचर—सहचरभेदात् । व्याप्यो यथा शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वादिति । यद्यपि सर्व एव हेतुर्व्याप्यस्तथापि कार्याद्यनात्मव्याप्यस्यात्र ग्रहणाद् भेदः । वृक्षः शिंशपाया इत्यादेः स्वभावहेतोरप्यत्रैवान्तर्भावः । कार्यरूपो यथा पर्वतो वह्निमान् धूमात् । कारणरूपो यथा वृष्टिर्भविष्यति विशिष्टमेघाऽन्यथानुपपत्तेरित्यत्र मेघविशेषः । अत्रेदं बोध्यं—यस्मिन् सामर्थ्याप्रतिबन्धः कारणान्तरसाकल्यं च निश्चेतुं शक्यते तस्यैव कारणस्य कार्यानुमापकत्वं, अन्यथा वह्नेरपि धूमानुमानप्रसङ्गात् । पूर्वचरो यथा—उदेष्यति मुहूर्त्तान्ते शकटं कृत्तिकोदयात् । उत्तरचरो यथा—उदगाद् भरणिः प्राक् कृत्तिकोदयात् । सहचरो यथा—मातुलिङ्गरूपवद् रसवत्तान्यथानुपपत्तेरित्यत्र रसः । एषूदाहरणेषु भावरूपा एवाविरुद्धोपलब्धयो धूमादिहेतवो भावरूपानेवाग्न्यादीन् साधयन्तीति विधिसाधकविधिरूपा उच्यन्ते ॥६५॥

विरुद्धोपलब्धिभेदानाह—

**सप्तधाऽन्या समाख्याता, स्वभावादिविरोधिनी ।**

**सप्तधेति । अन्येति ।** विरुद्धोपलब्धिरित्यर्थः । **स्वभावादीति ।** निषेधसाधको विधिरूपो विरुद्धोपलब्धिनामा हेतुः स्वभावविरुद्धव्याप्यादिभेदात् सप्तविधः । स्वभावविरुद्धो यथा—नास्त्येव सर्वथैकान्तोऽनेकान्तस्योपलम्भात्; अत्रानेकान्तः प्रतिषेध्यस्यैकान्तस्य स्वभावतो विरुध्यः । विरुद्धव्याप्यो यथा नास्त्यस्य तत्त्वनिश्चयस्तत्र सन्देहात्, अत्र तत्त्वसन्देहः प्रतिषेध्यतत्त्वनिश्चयविरुद्ध-

तदनिश्चयव्याप्यः। विरुद्धकार्यरूपो यथा—नास्त्यस्य क्रोधोपशान्तिर्वदनविकारादेः, अत्र वदनविकारादिः क्रोधोपशमविरुद्धतदनुपशमकार्यम्। एवमग्रेऽपि। विरुद्धकारणरूपो यथा—नास्त्यस्यासत्यं वचः, रागाद्यकलङ्कितज्ञानकलितत्वात्। विरुद्धपूर्वचरो यथा—नोद्गमिष्यन्ति मुहूर्त्तान्ते पुष्यतारा रोहिण्युद्गमात्। विरुद्धोत्तरचरो यथा—नोदगान्मुहूर्त्तात् पूर्वं मृगशिरः पूर्वफाल्गुन्युदयात्। विरुद्धसहचरो यथा—नास्त्यस्य मिथ्याज्ञानं सम्यग्दर्शनादिति॥

तदेवमुक्तोपलब्धिरथानुपलब्धिमाह—

**तथैवानुपलब्धिः स्याद् द्विधापि नवरं त्विदम्॥६६॥**

**विरुद्धानुपलब्धिश्च, पञ्चभेदा विभाविता।**

**इतरा सप्तधा ज्ञेया क्रमाद् विधिनिषेधकृत्॥६७॥**

**तथैवेति।** उपलब्धिवदित्यर्थः। **द्विधेति।** अनुपलब्धिरपि द्विविधा, विरुद्धानुपलब्धिरविरुद्धानुपलब्धिश्चेति। अनुपलब्धावुपलब्धेर्विशेषमाह—**विरुद्धेति। पञ्चभेदेति।** प्रतिषेधरूपो विधिसाधको विरुद्धानुपलब्धिनामा हेतुः विधेयविरुद्ध—कार्य—कारणस्वभावव्यापकसहचराऽनुपलम्भभेदात् पञ्चधा। यथा अस्त्यत्र रोगातिशयो नीरोगव्यापारानुपलब्धेः; अत्र विधेयरोगातिशयविरुद्धारोग्यकार्यं विशिष्टव्यापारः। एवमग्रेऽपि। विद्यतेऽत्र कष्टमिष्टसंयोगाभावात्। वस्तुजातमनेकान्तात्मकमेकान्तस्वभावाऽनुपलम्भात्। अस्त्यत्र छाया औष्ण्यानुपलब्धेः। अस्त्यस्य मिथ्याज्ञानं सम्यग्दर्शनाऽनुपलब्धेरिति। **इतरेति।** अविरुद्धानुपलब्धिरित्यर्थः। **सप्तधेति।** प्रतिषेधरूपः प्रतिषेधसाधकस्तु अविरुद्धानुपलब्धिनामा हेतुः सप्तप्रकारः, प्रतिषेध्याविरुद्ध—स्वभाव—व्यापक—कार्य—कारण—पूर्वचरो—त्तरचर—सहचरानुपलब्धिभेदात्। यथा नास्त्यत्र भूतले कुम्भ उपलब्धिलक्षणप्राप्तस्य तत्स्वभावस्याऽनुपलम्भात्। नास्त्यत्र पनसः पादपानुपलब्धेः। नास्त्यत्राप्रतिहतशक्तिकं बीजं, अङ्कुराऽनवलोकनात्। न सन्त्यस्य प्रशमप्रभृतयो भावास्तत्त्वार्थश्रद्धाभावात्। नोद्गमिष्यति मुहूर्त्तान्ते स्वातिः, चित्रोदयादर्शनात्।

नोदगमत् पूर्वभाद्रपदा मुहूर्त्तात्पूर्वं, उत्तरभाद्रपदोद्गमाऽनवगमात् । नास्त्यत्र सम्यग्ज्ञानं सम्यग्दर्शनानुपलब्धेरिति । **क्रमादिति** । स्पष्टम् ॥६६–६७॥

तदेवमुक्तमनुमानम्, अथाऽऽगमप्रमाणम्; तत्र पूर्वं वक्ष्यमाणागमलक्षण-घटकाप्तस्वरूपमाह–

**अभिधेयानि वस्तूनि यो जानीते यथास्थिति ।**
**अभिधत्ते यथाज्ञानं स आप्तोऽयं द्विधा मतः ॥६८॥**
**लौकिको जनकादिः स्या–ल्लोकोत्तरश्च तीर्थकृत् ।**
**तेषां ह्येव वचः शून्यं, विसंवादेन दृश्यते ॥६९॥**

**अभिधेयानीत्यादि** । यथास्थितार्थपरिज्ञानपूर्वकहितोपदेशप्रवण आप्त इति भावः । स द्वेधा–लौकिको लोकोत्तरश्च । आद्यो जनकजनन्यादिः । द्वितीयस्तीर्थकृद्गणधरादिः । उक्तस्वरूपाणामेव ह्याप्तत्वं युक्तं विसंवादशून्यत्वात् तद्वचनस्येत्याह–**तेषामिति** ॥६८–६९॥

अथागमलक्षणमाह–

**आविर्भूता च तद्वाचोऽर्थसंविन्मत आगमः ।**
**उपचाराद् भवेदाप्त–वचनं वक्ष्यतेऽथ तत् ॥७०॥**

**आविर्भूतेति** । आप्तवचनादाविर्भूतमर्थसंवेदनमागम इति भावः । नन्वेवं तर्हि कथमाप्तवचनस्यागमत्वव्यवहार इत्यत आह–**उपचारादिति** । कारणे कार्योपचारादाप्तवचनमप्यागम उच्यत इति । न च व्याप्तिग्रहबलेनार्थप्रतिपाद-कत्वाद्धूमवदस्याऽनुमानेऽन्तर्भावः, कूटाकूटकार्षापणनिरूपणप्रवणप्रत्यक्षवदभ्या-सदशायां व्याप्तिग्रहनैरपेक्ष्येणैवास्यार्थबोधकत्वादिति । नन्वाप्तवचनमित्यत्र किं नाम वचनमित्याह–**वक्ष्यत इति** । **तदिति** । वचनमिति ॥ ७० ॥

प्रतिज्ञातमाह–

**आदिः पौद्गलिको वर्णो वर्णानां निरपेक्षिका ।**

**अन्योन्यापेक्षकाणां च पदं संहतिरुच्यते ॥७१॥**
**वाक्यं स्याच्च पदानां तु वचनं तत्त्रयात्मकम् ॥**

वर्णपदवाक्यात्मकं वचनं, तत्र वर्णमाह—**आदिरिति** । अकारादिरित्यर्थः । **पौद्गलिक इति** । भाषावर्गणापुद्गलस्कन्धनिष्पन्न इत्यर्थः । अनेन शब्दस्य गुणत्वं प्रतिक्षिप्तं बोद्धव्यम् । पदमाह—**वर्णानामिति** । वर्णानामन्योन्यापेक्षाणां निरपेक्षिका संहतिः पदम् । **निरपेक्षिकेति** । पदान्तरवर्तिवर्णकृतोपकारपराङ्मुखीत्यर्थः । एवं क्वचिद् वर्णस्य वर्णयोश्चापि पदत्वं बोध्यम् । वस्तुतस्तु सङ्केतवत् पदमिति ॥ वाक्यमाह—**वाक्यमिति** । अन्योन्यापेक्षाणां पदानां समुदायो वाक्यमित्यर्थः । **तत्त्रयात्मकमिति** । वर्णपदवाक्यात्मकमित्यर्थः । प्रकरणपरिच्छेदादीनामप्येतदुपलक्षणं ज्ञेयं, तेषामपि वचनत्वादिति ॥७१–॥

नन्वर्थबोधनिबन्धनत्वं शब्दस्य कुत इत्याह–

**सामर्थ्यमथ शक्तिः स्यात्, सङ्केतः समयो मतः ॥७२॥**
**ताभ्यां स्वाभाविकाभ्यां स्या–च्छब्दोऽर्थस्य विबोधकृत् ॥**

**सामर्थ्यमिति । शक्तिरिति ।** योग्यता नाम्न्यर्थप्रतिपादकशक्तिरित्यर्थः । सङ्केतोऽस्मात् पदादयमर्थो बोद्धव्य इतीच्छारूपः ॥ **ताभ्यामिति ।** सामर्थ्यसमयाभ्याम् । **स्वाभाविकाभ्यामिति** । तत्र शक्तौ स्वाभाविकत्वं सहजत्वं, सङ्केते तु ईश्वराऽनपेक्षत्वं बोध्यम् । तेन च नेश्वरेच्छा शक्तिरिति सिद्धम् । इत्थं च शब्दः सङ्केतमात्रेणैवार्थप्रतिपादक इति **वदन्नैयायिकः,** समयादपि नायं वस्तुप्रतिपादक इति वदन् **सौगतश्च** पराकृतो वेदितव्यः । द्वाभ्यामपि शब्दस्यार्थप्रतिपत्तिकारणत्वात् । वस्तुतस्तु स्वाभाविकशक्त्या शब्दोऽर्थं बोधयति, तत्र सङ्केतस्तु सहकारी । सर्वशब्दानां सर्वार्थप्रत्यायनशक्तियुक्तत्वाच्च न देशभेदेनाऽर्थभेदेऽपि शब्दानां क्षतिः । यत्र हि देशे यदर्थप्रतिपादनशक्तिसहकारी सङ्केतः स तमर्थं तत्र प्रतिपादयतीति । अत्र अर्थावबोधसामर्थ्यं शब्दस्य पराऽनपेक्षं, तत्र प्रामाण्याप्रामाण्ये पुनः पुरुषगुणदोषापेक्षे इति बोध्यम् ॥७२–॥

सोऽयं शब्दो विधिप्रतिषेधाभ्यां स्वार्थमभिदधानः सप्तभङ्गीमनुगच्छतीत्याह—

**अयं विधिनिषेधाभ्यां, लभते भङ्गसप्तकम् ॥७३॥**

**अयमिति ।** ध्वनिरित्यर्थः । इत्थमेव च परिपूर्णार्थप्रापकत्वलक्षणतात्त्विकप्रामाण्यनिर्वाहः । क्वचिदेकभङ्गदर्शनेऽपि व्युत्पन्नमतीनामितरभङ्गाक्षेपध्रौव्यम् । यत्र तु 'घटोऽस्ती' त्यादिलोकवाक्ये सप्तभङ्गीसंस्पर्शशून्यता, तत्रार्थप्रापकत्वमात्रेण लोकापेक्षया प्रामाण्येऽपि तत्त्वतो न प्रामाण्यमिति बोध्यम् । एकत्र वस्तुन्येकैकधर्मपर्यनुयोगवशादविरोधेन व्यस्तयोः समस्तयोश्च विधिनिषेधयोः कल्पनया स्यात्काराङ्कितः सप्तधा वाक्प्रयोगः सप्तभङ्गी । इदं च लक्षणं प्रमाण-नय-सप्तभङ्ग्योः साधारणं बोध्यम् । तत्र स्यादस्त्येव, स्यान्नास्त्येव, स्यादवक्तव्यमेव, स्यादस्त्येव स्यान्नास्त्येव, स्यादस्त्येव स्यादवक्तव्यमेव, स्यान्नास्त्येव स्यादवक्तव्यमेव, स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेवेत्युल्लेखः । अत्र तृतीयचतुर्थभङ्गयोः **केचिद्** व्यत्ययमिच्छन्ति । अत्र सर्वत्रैवकारप्रयोगोऽनभिमतव्यावृत्त्यर्थम् । 'स्यात्' प्रयोगश्च सापेक्षप्रतिनियतस्वरूपप्रतिपत्तये । अत्र प्राधान्येन विधिकल्पनया प्रथमो भङ्गः । प्राधान्येन निषेधकल्पनया द्वितीयः । स्वरूपेण घटादिनाऽस्तित्वविवक्षयाऽसत्त्वोपसर्जनसत्त्वप्रतिपादनपरः प्रथमः, पररूपेण पटादिना नास्तित्वविवक्षया च सत्त्वोपसर्जनाऽसत्त्वप्रतिपादनपरो द्वितीयः । शब्दशक्तिस्वाभाव्यादेकोपर्जनेतरप्रधानभावेनैव शाब्द्याः प्रतीतेरिति भावः । न चाऽसत्त्वं काल्पनिकं सत्त्ववत्तस्य स्वातन्त्र्येणानुभवात् । अन्यथा विपक्षासत्त्वस्य तात्त्विकस्याऽभावेन हेतोर्लक्षणस्याऽसम्भवप्रसङ्गात् । युगपत् प्राधान्येन विधिनिषेधकल्पनया तृतीयः, एकेन पदेन युगपदुभयोर्वक्तुमशक्यत्वात् । अन्यतरत्वादिना कथञ्चिदुभयबोधनेऽपि प्रातिस्विरूपेणैकपदादुभयबोधस्य ब्रह्मणापि दुरुपपादत्वात् । अस्तित्वनास्तित्वधर्मविशिष्टमपि समकालमस्तित्वनास्तित्वाभ्यां वक्तुमशक्यत्वादनिर्वचनीयमिति तु फलितार्थः । प्राधान्येन क्रमिकविधिनिषेधकल्पनया चतुर्थः । न च क्रमबलादत्र ज्ञानद्वयमेवार्थसिद्धमित्याद्यभङ्गद्वयाऽनतिरेकः, क्रमगर्भोभयप्राधान्यबोधकत्वाभिप्रायेणोभयपदप्रयोगात्तत्रैकत्र द्वयमिति उभयविषयताद्वयशालिनो बोधान्तरस्यानुभविक-

त्वात् । विधिकल्पनया युगपद्विधिनिषेधकल्पनया पञ्चमः । निषेधकल्पनया युगपद्विधिनिषेधकल्पनया षष्ठः क्रमतो । विधिनिषेधकल्पनया युगपधिनिषेधकल्पनया च सप्तमः ॥ ७३ ॥

एवं च विधिनिषेधप्रकारापेक्षया प्रतिपर्यायं वस्तुनि सप्तैव भङ्गाः, प्रतिपर्यायं प्रतिपाद्यानुयोगानां सप्तानामेव सम्भवादित्याह–

**अनन्तत्वेऽपि धर्माणां, सप्तभङ्ग्येव यन्मता ।**
**तद्धि पर्यनुयोगानां, सप्तानामेव सम्भवात् ॥७४॥**

**अनन्तत्व इति** । एकत्र जीवादौ वस्तुनि विधीयमाननिषिध्यमानानामनन्तानां धर्माणामभ्युपगमादिति । शेषं स्पष्टम् । तथा च धर्मभेदेनाऽनन्तसप्तभङ्गीसम्भवेऽपि प्रतिधर्मं सप्तानामेव भाव इति तात्पर्यम् । पर्यनुयोगानां च सप्तत्वं सप्तविधतज्जिज्ञासानियमात् । तस्याश्च सप्तत्वं सप्तधैव तत्सन्देहसमुत्पादात् । तस्य सप्तत्वं तु स्वगोचरवस्तुधर्माणां सप्तविधत्वस्यैवोपपत्तेरिति ॥७४॥

अथ सप्तभङ्गीद्वैविध्यमाह–

**सकलादेशरूपान्य–रूपाभ्यामुदिता द्विधा ॥**

**सकलादेशेति** । इयं च सप्तभङ्गी प्रतिभङ्गं सकलादेशस्वभावा विकलादेशस्वभावा च । अखण्डवस्तुविषयत्वेन त्रिष्वेवाद्यभङ्गेषु सकलादेशत्वं, चतुर्षु चोपरितनेष्वेकदेशविषयत्वेन विकलादेशत्वमित्यन्ये । तत्र प्रमाणप्रतिपन्नानन्तधर्मात्मकवस्तुनः कालादिभिरभेदवृत्तिप्राधान्यादभेदोपचाराद् वा यौगपद्येन प्रतिपादकं वचः सकलादेशः । नयविषयीकृतस्य वस्तुधर्मस्य भेदवृत्तिप्राधान्याद् भेदोपचाराद् वा क्रमेण प्रतिपादकं वाक्यं विकलादेशः । अभेदवृत्तिप्राधान्यं च द्रव्यार्थिकनयगृहीतसत्ताद्यभिन्नानन्तधर्मात्मकवस्तुशक्तिकस्य सदादिपदस्य कालाद्यभेदविशेषप्रतिसन्धानेन पर्यायार्थिकनयपर्यालोचनप्रादुर्भवच्छक्यार्थबाधप्रतिरोधः । अभेदोपचारश्च पर्यायार्थिकनयगृहीतान्यापोहपर्यवसितसत्तादिमात्रशक्तिकस्य तात्पर्यानुपपत्त्या सदादिपदस्योक्तार्थे लक्षणेति । काला-

दयश्च कालः, आत्मरूपं, अर्थः, सम्बन्धः, उपकारः, गुणिदेशः, संसर्गः, शब्द इति । तत्र यत्कालमस्तित्वं तत्कालाः शेषा अनन्तधर्मा वस्तुन्येकत्रेति तेषां कालेनाऽभेदवृत्तिः । यदेव चास्तित्वस्य तद्गुणत्वमात्मरूपं तदेवाऽन्यगुणानामपीत्यात्मरूपेण सा । य एव चाऽधारोऽर्थो द्रव्याख्योऽस्तित्वस्य स एवान्यपर्यायाणामित्यर्थेन सा । य एव चाविष्वग्भावसम्बन्धोऽस्तित्वस्य स एवान्येषामिति सम्बन्धेन सा । य एव चोपकारोऽस्तित्वेन वस्तुनः स्वप्रकारकप्रतीतिविषयत्वलक्षणः स एवाऽन्येषामिति उपकारेण सा । य एव च गुणिनः सम्बन्धी देशः क्षेत्रलक्षणोऽस्तित्वस्य स एवान्येषामिति गुणिदेशेन सा । य एव च वस्तुनः संसर्गोऽस्तित्वस्याधाराधेयलक्षणः स एवान्येषामिति संसर्गेण सा । य एव च 'अस्ति' इति शब्दोऽस्तित्वधर्मात्मकस्य वस्तुनो वाचकः स एवाशेषानन्तधर्मात्मकस्यापीति शब्देनाऽभेदवृत्तिः । पर्यायार्थिकनयगुणभावेन द्रव्यार्थिकनयप्राधान्यात् ।

द्रव्यार्थिकगुणभावेन पर्यायार्थिकप्राधान्ये तु न गुणानामभेदवृत्तिः सम्भवति; समकालमेकत्र नानागुणानामसम्भवात्, सम्भवे वा तदाश्रयस्य भेदप्रसङ्गात् । नानागुणानां सम्बन्धिन आत्मरूपस्य भिन्नत्वात्, अन्यथा तेषां भेदविरोधात् । स्वाश्रयस्यार्थस्यापि नानात्वात्, अन्यथा नानागुणाश्रयत्वविरोधात् । सम्बन्धस्य च सम्बन्धिभेदेन भेददर्शनात्, नानासम्बन्धिभिरेकत्रैकसम्बन्धाऽघटनात् । तैः क्रियमाणस्योपकारस्य च प्रतिनियतरूपस्याऽनेकत्वात्, अनेकैरुपकारिभिः क्रियमाणस्योपकारस्यैकस्य विरोधात् । गुणिदेशस्य च प्रतिगुणं भेदात्, तदभेदे संसर्गिभेदविरोधात् । शब्दस्य च प्रतिविषयं नानात्वात्, सर्वगुणानामेकशब्दवाच्यतायां सर्वार्थानामेकशब्दवाच्यतापत्तेरिति कालादिभिर्भिन्नानामभेदोपचारः क्रियते । एवं भेदवृत्तितदुपचारावपि वाच्याविति । अत्राद्या प्रमाणसप्तभङ्गी, द्वितीया च नयसप्तभङ्गीति गीयते । वस्त्वंशग्राहकत्वेनैव प्रथमातोऽपरस्या विशेषः । इत्थमेव 'सदि' त्युल्लेखवत् 'स्यात् सदेवे' त्युल्लेखोऽपि नयस्यावेदितो भवति, दुर्नयस्य तु 'सदेवे'त्युल्लेखः । केचित्त नयदुर्नयविभागो दैगम्बर एव न

त्वास्माकीनः; यतो यो नयो नयान्तरसापेक्षः स प्रमाणमेव, यस्तु नयान्तर-निरपेक्षः स नयः, स च नियमान्मिथ्यादृष्टिरेवेति । **अन्ये तु** न दैगम्बर एव नयदुर्नयविभागः । **हेमसूरिभिरपि "सदेव" सत् स्यात्सदिति त्रिधाऽर्थो, मीयेत दुर्नीतिनयप्रमाणैः"** इत्यादि विभज्याभिधानात् । **आकरे** नयतदाभासविभक्तेर्बोधितत्वाच्चेत्यन्यत्र विस्तरः ।

तदेवं निरूपिते प्रमाणस्य स्वरूपसङ्ख्ये । अथ विषयो निरूपणीय इत्याह—

**कथ्यते विषयश्चाथ, परिच्छेद्यं च गोचरः ॥७५॥**

**अनेकान्तात्मकं वस्तु, सामान्येतरमुख्यकम् ।**
**तद्गोचरश्च तद् द्वेधा, तिर्यगूर्ध्वत्वभेदतः ॥७६॥**

**विशेषोऽपि द्विधा प्रोक्तो, गुणपर्यायभेदतः ।**
**सहभावी गुणो धर्मः, क्रमभावी तथा परः ॥७७॥**

**कथ्यत इत्यादि** । स्पष्टम् । **अनेकान्तेति** । सामान्यविशेष—सदसदाद्यनेकान्तात्मकं वस्तु, तद्गोचर इति प्रमाणस्य विषय इत्यर्थः । सामान्यं निरूपयति—**तदिति** । सामान्यमित्यर्थः । तिर्यक्सामान्यमूर्ध्वतासामान्यं चेति द्विप्रकारं सामान्यमित्यर्थः । तत्र प्रतिव्यक्ति तुल्या परिणतिस्तिर्यक्सामान्यं, यथा शबलशाबलेयादिपिण्डेषु गोत्वम् । पूर्वापरपरिणामसाधारणं द्रव्यमूर्ध्वतासामान्यं, कटककङ्कणाद्यनुगामिकाञ्चनवदिति । विशेषं निरूपयति—**विशेष इति । गुणपर्यायेति** । अत्र पर्यायशब्दः सर्वविशेषवाचकोऽपि सहवर्त्तिविशेषवाचिगुणशब्दसान्निध्यात् क्रमवर्त्तिविशेषवाची बोध्यः । **सहभावीति** । सहभावी धर्मो गुणो यथाऽऽत्मनि विज्ञानव्यक्तिशक्त्यादिः । क्रमभावी धर्मः पर्यायो यथा तत्रैव सुखदुःखादिरिति ॥७५-७६-७७॥

अथ फलमाह—

**फलं चाथ प्रमाणस्य, द्विविधं परिकीर्त्तितम् ।**
**अनन्तरफलं त्वाद्यं, परम्परफलं परम् ॥७८॥**

**फलमज्ञाननिवृत्तिः, सर्वेषामादिमं मतम् ।**
**आदानत्यजनोपेक्षा–बुद्धयश्चापरं फलम् ॥७९॥**
**केवलस्य तु विज्ञेय–मौदासीन्यं फलं परम् ॥**

**फलमित्यादि ।** स्पष्टम् । **अज्ञानेति ।** अज्ञानस्य विपर्ययादेर्निवृत्तिः प्रध्वंसः स्वपरव्यवसितिरूपा फलं बोद्धव्यम् । **आदिममिति ।** अनन्तरफलमित्यर्थः । **आदानेति ।** उपादेये ग्रहणबुद्धिः, हेये त्यागबुद्धिः, उपेक्षणीये उपेक्षाबुद्धिरिति भावः । **अपरमिति ।** परम्पराफलमित्यर्थः । इदं च केवलव्यतिरिक्तप्रमाणानां बोध्यम् । **केवलस्येति ।** केवलज्ञानस्य साक्षात् समस्तार्थानुभवेऽपि हानोपादानेच्छाविरहान्माध्यस्थ्यमेव फलम्, केवलज्ञानवतां भगवतां सिद्धप्रयोजनत्वादेवेति ॥७८–७९॥

अथ प्रमाणप्रमातृभ्यां फलस्य भेदाभेदावाह–

**तत्स्याद् भिन्नमभिन्नं च, प्रमाणाच्च प्रमातृतः ॥८०॥**
**क्रिया–क्रियावतोर्यस्माद्–भेदाभेदविभूषिता ।**
**कर्त्ता हि साधकः प्रोक्त–स्तन्निर्वर्त्या भवेत् क्रिया ॥८१॥**

**तदिति ।** प्रमाणमित्यर्थः । प्रमाणतया परिणतस्यैवात्मनः फलतया परिणतिप्रतीतेरेकप्रमातृतादात्म्येन फलस्य प्रमाणादभेद । साध्यसाधनभावेन प्रमाणफलयोः प्रतीयमानत्वाच्च कथञ्चिद् भेदोऽपि । एवं प्रमातृफलयोरपि कथञ्चिद् भेदाभेदावेव । क्रियाक्रियावतोः परस्परं कथञ्चिद् भेदाभेदकलितत्वादित्याह– **क्रियेति ।** अन्यथा प्रतिनियतक्रियाक्रियावद्भावभङ्गप्रसङ्गात् । अत्र साधकः प्रमाता कर्त्ता, साध्या च स्वपरव्यवसितिः क्रियेति बोध्यम् ॥८०–८१॥

अथ सकलप्रमाणफलव्यवहारसांवृतत्ववादिनं प्रतिक्षिपति–

**प्रमाणादिव्यवहृति–रियं स्यात् पारमार्थिकी ।**
**संवृत्त्या तदुरीकारे, स्वेष्टसिद्धिविरोधिता ॥८२॥**

**प्रमाणादिति । स्वेष्टेति ।** स्वेष्टं प्रमाणफलसांवृतत्वं तत्सिद्धिविरोध-इति भावः । तथाहि–प्रमाणफलयोः सांवृतत्वस्याऽपारमार्थिकत्वे तयोः पारमार्थिकत्वापत्त्या परमार्थवृत्त्यैव तदेष्टव्यम्, तदपि प्रमाणादेव, प्रमाणस्यापि सांवृतत्वग्राहकस्य सांवृतत्वे तस्मादसांवृतस्य प्रमाणफलसांवृतत्वस्यासिद्धिः । असांवृतत्वे च प्रमाणफलव्यवहारसांवृतत्वप्रतिज्ञाविरोधो व्यक्त एवेति भावः ॥८२॥

अथोपसंहरति–

**एवं प्रमाणमाख्यातं, स्वरूपादिचतुष्टयम् ।**
**विपरीतस्तदाभासो, विशेषस्तु प्रदर्श्यते ॥८३॥**

**एवमिति ।** उक्तप्रकारेणेत्यर्थः । स्वरूपसङ्ख्याविषमफलैः प्ररूपितं प्रमाणमिति भावः । अथ तदाभासं निरूपयति–**स्वरूपादीति । विपरीत इति ।** प्रमाणसम्बन्धिनः स्वरूपचतुष्टयाद् यदपां तत् प्रमाणस्य स्वरूपाभासः सङ्ख्याभासो विषयाभासः फलाभासो वा । तत्राज्ञानात्मकाऽनात्मप्रकाशकस्वमात्रावभासकनिर्विकल्पकसमारोपाः सामान्यतः स्वरूपाभासाः । विशेषतस्त्वेवम्–अम्बुधरादौ गन्धर्वनगरादिज्ञानं सांव्यवहारिकाभासं, शिवराजर्षेरसङ्ख्यातद्वीपसमुद्रेषु सप्तद्वीपसमुद्रज्ञानमवध्याभासरूपं पारमार्थिकाभासं; मनःपर्याय–केवलज्ञानयोस्तु विशुद्धत्वादाभासचिन्तैव न। अननुभूते मुनिमण्डले तन्मुनिमण्डलमिति ज्ञानं स्मरणाभासं, तुल्ये पदार्थे स एवायमित्यादिज्ञानं प्रत्यभिज्ञाभासं, असत्यामपि व्याप्तौ तदभासस्तर्काभासः, स श्यामो मैत्रातनयत्वादित्यादौ । एवं पक्षाभासादिसमुत्थं ज्ञानमनुमानाभासमवसेयम् । अत्र स्वार्थपरार्थभेदोऽपि बोध्यः ॥८३॥

तत्र पक्षाभासानाह–

**पक्षाभासास्त्रयस्तत्र, मध्यमोऽनेकभेदभृत् ।**
**प्रत्यक्षप्रमुखैर्यस्मात्, साध्यधर्मनिराकृतिः ॥८४॥**

**पक्षाभासा इति । त्रय इति ।** प्रतीत–निराकृता–ऽनभीप्सितसाध्यधर्म-विशेषणास्त्रयः पक्षाभासाः। आद्यो यथा–आर्हतान् प्रत्यवधारणवर्जं समस्ति जीव इत्यादिः। अयं च सिद्धसाधनं प्रसिद्धसम्बन्ध इत्यपि गीयते। द्वितीयमाह–**मध्यम इति ।** निराकृतसाध्यधर्मविशेष इत्यर्थः। **अनेकेति ।** अनेकप्रकारः। कथमित्याह–**प्रत्यक्षेति ।** प्रत्यक्षानुमानागमलोकस्ववचनादिभिः साध्यधर्मस्य निराकरणादित्यर्थः। यथा नास्ति भूतविलक्षण आत्मा, नास्ति सर्वज्ञ इत्यादिः। तृतीयो यथा–स्याद्वादिनः शाश्वतिक एव कलशादिरशाश्वतिक एव वेति वदत इति पक्षाभासाः ॥८४॥

अथ हेत्वाभासानाह–

**हेत्वाभासः परिज्ञेयो, भाषितो मुनिपुङ्गवैः।**
**असिद्धश्च विरुद्धश्चा–नैकान्तिक इति त्रिधा ॥८५॥**

**हेत्वाभास इति ।** हेतुलक्षणविकलत्वेनाऽहेतुरपि तद्वदाभासमान इत्यर्थः। तद्भेदानाह–**असिद्ध इति** ॥८५॥

असिद्धमाह–

**अप्रतीतस्वरूपः स्या–दसिद्धो द्विविधः स च।**
**उभयासिद्ध आद्यश्चा–ऽन्यतरासिद्धकोऽपरः ॥८६॥**

**अप्रतीतेति ।** अप्रतीयमानस्वरूपो हेतुरसिद्ध इति। स्वरूपाप्रतीतिश्चाज्ञानात् सन्देहाद् विपर्ययाद्वा। स च द्विविधः। द्वैविध्यमेवाह–**उभयेति ।** उभयासिद्धोऽन्यतरासिद्धश्चेति। तत्राद्यो यथा शब्दः परिणामी चाक्षुषत्वात्। द्वितीयो यथा अचेतनास्तरवः, विज्ञानेन्द्रियायुर्निरोधलक्षणमरणरहितत्वादिति ॥८६॥

विरुद्धमाह–

**साध्यविपर्ययव्याप्तो, विरुद्धः प्रथितो भुवि ॥**

**साध्येति ।** साध्यविपरीतव्याप्तो हेतुर्विरुद्धः। यथा शब्दोऽपरिणामी-कृतकत्वादिति। कृतकत्वं हि अपरिणामित्वविरुद्धेन परिणामित्वेन व्याप्तमिति ॥

अनैकान्तिकमाह–

**अन्यथानुपपत्तेश्च, सन्देहात् स्यात्तृतीयकः ॥८७॥**
**विपक्षवृत्तिसन्देह–निर्णयाभ्यां द्विधाऽस्त्ययम् ॥**

**अन्यथेति ।** यस्याऽन्यथानुपपत्तिः सन्दिह्यते सोऽनैकान्तिक इति । स द्वेधा–निर्णीतविपक्षवृत्तिकः सन्दिग्धविपक्षवृत्तिकश्चेति । आद्यो यथा–शब्दो नित्यः प्रमेयत्वात् । द्वितीयो यथा–विवादापन्नः पुरुषः सर्वज्ञो न भवति, वक्तृत्वात् । अत्र हि वक्तृत्वं विपक्षे सर्वज्ञे सन्दिग्धवृत्तिकमिति ॥८७॥

अथात्र मतान्तरमुपन्यस्य प्रतिक्षिपति–

**चतुर्धा पञ्चधा चैव, हेत्वाभासो मतोऽपरैः ॥८८॥**

**अकिञ्चित्करयोगेन, चतुर्धा यन्मतोऽपरैः ।**
**तन्नाप्रयोजकात्मा हि, पक्षाभासः स कीर्त्यते ॥८९॥**

**एवं सत्प्रतिपक्षश्च, बाधश्च नातिरिच्यते ।**
**असिद्धाऽनतिरिक्तत्वा–दिति जैनमतं मतम् ॥९०॥**

**चतुर्धेत्यादि । अपरैरिति ।** तत्र चतुर्विधो **धर्मभूषणै**र्मतः, पञ्चविधश्च **नैयायिकै**रिति बोध्यम् । **अकिञ्चित्करेति ।** तथा च पूर्वोक्तस्त्रिविधो हेत्वाभासोऽकिञ्चित्करयोगेन चतुर्विध इति । **तन्नेति । अप्रयोजकात्मेति ।** सिद्धसाधनो बाधितविषयश्चेति द्विविधस्याप्यप्रयोजकाह्वयस्याऽकिञ्चित्करस्य प्रतीतनिराकृतसाध्यधर्मविशेषणाख्यपक्षाभासभेदाऽनतिरिक्तत्वमेवेति भावः । एवं च बाधोऽपि नातिरिक्तस्तस्यापि बाधितविषयत्वेन निराकृतसाध्यधर्मविशेषणाख्य पक्षाभास एवान्तर्भावादित्यादित्याह–**एवमिति ।** अकिञ्चित्करवदित्यर्थः । बाध इति पदं व्यवहितमप्यत्रायोज्यम् । **बाध इति ।** कालात्ययापदिष्ट इत्यर्थः । **सत्प्रतिपक्षश्चेति ।** प्रकरणसमोऽपीत्यर्थः । **नातिरिच्यत इति ।** अत्र हेतुमाह–**असिद्धेति ।** तुल्यबलसाध्यतद्विपर्ययसाधकहेतुद्वयरूपे सत्यस्मिन् प्रकृतसाध्यसाधनयोरन्यथानुपपत्त्यनिश्चयेऽसिद्ध एवान्तर्भावादित्यन्यत्र विस्तरः ॥८८-८९-९०॥

अथ दृष्टान्ताभासमाह—

**दृष्टान्ताभास आख्यातो द्विविधो धौतकल्मषैः ।**
**एकैको नवधा चैव-माभासान्तरमूह्यताम् ॥९१॥**

**दृष्टान्ताभास इति । द्विविध इति ।** साधर्म्येण दृष्टान्ताभासो **वैधर्म्येण** दृष्टान्ताभासश्चेति । **एकैक इति ।** तत्र साधर्म्येण दृष्टान्ताभासो नवधैवम्—साध्यधर्मविकलः, साधनधर्मविकलः, उभयधर्मविकलः, सन्दिग्धसाध्यधर्मा, सन्दिग्धसाधनधर्मा, सन्दिग्धोभयधर्मा, अनन्वयोऽप्रदर्शितान्वयो विपरीतान्वयश्चेति । तत्राऽऽद्यो यथा—शब्दोऽपौरुषेयोऽमूर्त्तत्वाद् दुःखवदिति, एवमन्येऽपि बोध्याः । वैधर्म्येण दृष्टान्ताभासस्त्वेवं नवधा—असिद्धसाध्यव्यतिरेकोऽसिद्धसाधनव्यतिरेकोऽसिद्धोभयव्यतिरेकः, सन्दिग्धसाध्यव्यतिरेकः, सन्दिग्धसाधनव्यतिरेकः, सन्दिग्धोभयव्यतिरेकः, अव्यतिरेकोऽप्रदर्शितव्यतिरेको विपरीतव्यतिरेकश्चेति । आद्यं यथा—भ्रान्तमनुमानं प्रमाणत्वात् । यत्पुनर्भ्रान्तं न भवति न तत्प्रमाणं यथा स्वप्नज्ञानमिति । एवमन्येऽपि स्वयमेव बोध्या इति । **आभासान्तरमिति ।** उपनयाद्याभासागमाभासादिकमित्यर्थः । तत्र साध्यधर्मं साध्यधर्मिणि साधनधर्मं वा दृष्टान्तधर्मिणि उपसंहरतो निगमनाभासः । अनाप्तवचनप्रभवं ज्ञानमागमाभासमिति स्वरूपाभासः । प्रत्यक्षमेवैकं प्रमाणमित्यादिसङ्ख्यानं सङ्ख्याभासम् । सामान्यमेव, विशेष एव, तद्द्वयं वा स्वतन्त्रमित्यादिस्तस्य विषयाभासः । अभिन्नमेव भिन्नमेव वा प्रमाणात् फलं फलाभासमिति ॥९१॥

एवं ज्ञानस्य प्रामाण्यमप्रामाण्यं चोभयमप्युत्पत्तौ परत एव, ज्ञानकारणगतगुणदोषापेक्षणात् । ज्ञप्तौ तु प्रामाण्यं परत एवेति **नैयायिकाः ।** इदं ज्ञानं प्रमा, संवादिप्रवृत्तिजनकत्वाद् , यन्नैवं तन्नैवं यथाऽप्रमा । एवं इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा, गन्धवति पृथिवीत्वप्रकारकज्ञानत्वाद् इत्येवमनुमेयमिति भावः । **मीमांसकास्तु** स्वत एव; तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यत इत्यर्थः । तत्र **गुरुमते** ज्ञानं स्वप्रकाशम् । **भट्टमते** ज्ञानमतीन्द्रियं, ज्ञानजन्या ज्ञातता प्रत्यक्षा तया च ज्ञानमनुमीयते । **मुरारिमिश्रमते**ऽनुव्यवसायेन ज्ञानं

गृह्यते । सर्वेषामपि मते तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यत इति । वस्तुतस्तु प्रामाण्याऽप्रामाण्यद्वयमप्यभ्यासदशायां स्वतः, अनभ्यासदशायां तु परतो गृह्यते । तत्र स्वतस्त्वं संवादकबाधकज्ञानाऽनपेक्षया जायमानत्वं, तदपेक्षया जायमानत्वं च परतस्त्वम् । अयमपि विभागो विषयापेक्षया । स्वरूपे तु सर्वत्र स्वत एव प्रामाण्यनिश्चय इति । **प्राभाकरमते** त्वप्रामाण्यमेव नास्ति, सर्वेषां ज्ञानानां यथार्थत्वात् । विसंवादिप्रवृत्तौ च भेदाऽग्रहस्यैव हेतुतेति । तदेतद्-व्यवहारनयापेक्षया न समीचीनं, शब्दनयापेक्षया त्विष्टमेवेत्यलम् ॥

तदेवमुक्तं प्रमाणं, अथ तदेकदेशरूपनयतदाभासानाह—

**स्यात् प्रमाणैकदेशत्वाद् , भिन्नः प्रमाणतो नयः ।**
**द्रव्यार्थिको मतः पूर्वो-ऽन्यः पर्यायार्थिको बुधैः ॥९२॥**

**स्यादिति** । ननु नयः प्रमाणमेव स्वार्थव्यवसायकत्वादित्यत आह **प्रमेति** । तथा च नयस्य स्वार्थैकदेशनिर्णायकत्वेन स्वार्थव्यवसायकत्वासिद्धिरिति । तथा च प्रमाणान्नयस्य भेदः । प्रमाऽप्रमोभयविलक्षणमेव नयज्ञानमिति भावः । **नय इति** । प्रमाणपरिच्छिन्नस्यानन्तधर्मात्मकस्य वस्तुन एकदेशग्राही तदितरांशाऽप्रतिक्षेपी अध्यवसायविशेषः । तं विभजते—**द्रव्यार्थिक इति** । द्रव्यार्थिकपर्यायार्थिकभेदान्नयो द्वेधेत्यर्थः । तत्राद्यः प्राधान्येन द्रव्यमात्रग्राही, प्राधान्येन पर्यायमात्रग्राही तु द्वितीयः ॥९२॥

पुनस्तं विभजते—

**नैगमश्च सङ्ग्रहश्च, व्यवहार इति त्रिधा ।**
**आद्योऽपरश्चतुर्धा स्यात् , प्रथम ऋजुसूत्रकः ॥९३॥**
**शब्दः समभिरूढः स्या-देवम्भूतश्चतुर्थकः ॥**

**नैगम इति** । **आद्यः**—द्रव्यार्थिक इत्यर्थः । **अपरः**—पर्यायार्थिक इत्यर्थः । नैगमसङ्ग्रहव्यवहारभेदाद् द्रव्यार्थिकस्त्रिधा । ऋजुसूत्र—शब्द—समभिरूढै—वम्भूतभेदात् पर्यायार्थिकश्चतुर्धा । इदञ्च **श्रीसिद्धसेनभगवताम**भिमतम् ।

**श्रीजिनभद्रगणिक्षमाश्रमणपूज्या** भगवन्तस्तु ऋजुसूत्रो द्रव्यार्थिकस्यैव भेद इत्याहुः । तत्र सामान्यविशेषाद्यनेकधर्मोपनयनपरोऽध्यवसायो नैगमः, यथा पर्याययोर्द्रव्ययोः पर्यायद्रव्ययोश्च मुख्यामुख्यतया विवक्षणपरः; क्रमात् सच्चैतन्यमात्मनि, वस्तु पर्यायवद् द्रव्यम्, क्षणमेकं सुखी विषयासक्तजीव इत्यादिः । न चैवं द्रव्यपर्यायोभयावगाहित्वेनास्य प्रामाण्यं, प्राधान्येनोभयावगाहिन एव ज्ञानस्य प्रमाणत्वात् । सामान्यमात्रग्राही परामर्शः सङ्ग्रहः । स द्वेधा–परोऽपरश्च । तत्राशेषविशेषेष्वौदासीन्यं भजमानः शुद्धद्रव्यं सन्मात्रमभिमन्यमानः प्रथमः, यथा विश्वमेकं सदविशेषात्; द्रव्यत्वादीन्यवान्तरसामान्यानि मन्वानस्तद्भेदेषु गजनिमीलिकामवलम्बमानो द्वितीयः, यथा धर्माधर्मादिद्रव्याणामैक्यं पर्यायत्वाविशेषादित्यादिः । सङ्ग्रहेण गोचरीकृतानामर्थानां विधिपूर्वकमवहरणं येनाभिसन्धिना क्रियते स व्यवहारः, यथा यत् सत्तद् द्रव्यं पर्यायो वेत्यादिः । ऋजु–वर्त्तमानक्षणस्थायि पर्यायमात्रं प्राधान्यतः सूचयन्नभिप्राय ऋजुसूत्रः, यथा सुखविवर्त्तः सम्प्रत्यस्तीत्यादिः । कालादिभेदेन ध्वनेरर्थभेदं प्रतिपद्यमानः शब्दः, यथा बभूव भवति भविष्यति सुमेरुरित्यत्रातीतादिकालभेदेन सुमेरोर्भेदप्रतिपत्तिः । काल–कारक–लिङ्ग–सङ्ख्या–पुरुषो–पसर्गाश्च कालादयः । पर्यायशब्देषु निरुक्तिभेदेन भिन्नमर्थं समभिरोहन् समभिरूढः, यथेन्दनादिन्द्रः पूर्दारणात् पुरन्दर इत्यादिः । शब्दानां स्वप्रवृत्तिनिमित्तभूतक्रियाविष्टमर्थं वाच्यत्वेनाभ्युपगच्छन्नेवम्भूतः, यथेन्दनमनुभवन्निन्द्र इत्यादिरिति ॥९३॥

अथार्थशब्दप्राधान्येन नयविभागमाह–

**एतेष्वर्थनयाः केचित्, केचित् शब्दप्रधानकाः ॥९४॥**

**एतेष्विति** । एतेषु सप्तसु नयेषु । **केचिदिति** । आद्याश्चत्वारो नया अर्थनयाः; प्राधान्येनार्थगोचरत्वादर्थनया इत्यर्थः । **केचिदिति** । अन्त्यास्त्रयः शब्दप्रधानकाः प्राधान्येन शब्दगोचरत्वाच्छब्दनया इत्यर्थः । एवमेतेषु पूर्वः पूर्वो नयः प्रचुरगोचरः परः परस्तु परिमितगोचर इति बोध्यम् । एवमन्येऽपि भेदा बोद्धव्याः । तथा हि–विशेषग्राहिणोऽर्पितनयाः, सामान्यग्राहिण-

**ऽ**नर्पितनयाः । तत्राद्ये एकद्व्यादिसमयसिद्धाः स्वसमानसमयसिद्धैरेव तुल्याः, द्वितीये तु सर्वे सिद्धाः परस्परं तुल्यरूपा एव । एवं लोकप्रसिद्धार्थानुवादपरो व्यवहारनयः, यथा श्यामो भ्रमरः । तात्त्विकार्थाभ्युपगमपरस्तु निश्चयः, यथा पञ्चवर्णो भ्रमरः । अथवा एकनयमतार्थग्राही व्यवहारः, सर्वनयमतार्थग्राही च निश्चयः । एवं ज्ञाननयः क्रियानयः शुद्धनयोऽशुद्धनयश्चेति संक्षेपः ॥९४॥

अथ नयाभासानाह–

**विपरीतो नयाभासः फलादिकं च पूर्ववत् ॥**

**विपरीत इति ।** स्वाभिप्रेतादंशादितरांशापलापी नयाभासो नयप्रतिबिम्बात्मा दुर्नय इत्यर्थः । एवं द्रव्यमात्रग्राही पर्यायप्रतिक्षेपी द्रव्यार्थिकाभासः, यथा वेदान्तसाङ्ख्यमतम् । पर्यायमात्रग्राही द्रव्यप्रतिक्षेपी पर्यायार्थिकाभासः, यथा सौत्रान्तिकमतम् । एवं नैगमाभासादयोऽपि स्वयमेव बोध्याः । तदेवं निरूपिता नयाः स्वरूपसङ्ख्याविषयैः । अथ फलमतिदिशति–**फलादिकमिति ।** आदिपदान्नयफलयोर्भेदाभेदौ बोध्यौ । तत्र वस्त्वेकदेशाज्ञाननिवृत्तिर्नयस्यानन्तरफलं, वस्त्वंशविषयाश्चोपादानत्यजनोपेक्षाबुद्धयः परम्परफलमिति ॥९४॥

तदेवमुक्तं नयस्वरूपमथ प्रसङ्गान्निक्षेपस्वरूपमाह–

**शब्दार्थरचनारूपो, निक्षेपश्चाथ भाव्यते ॥९५॥**

**शब्दार्थेति ।** प्रकरणादिवशेनाप्रतिपत्त्यादिव्यवच्छेदको यथास्थानविनियोगाय शब्दार्थरचनाविशेषो निक्षेपः । मङ्गलादिपदार्थनिक्षेपान्नाममङ्गलादिविनियोगोपपत्तेश्च तस्य फलवत्त्वम् । तदुक्तम्–**"अप्रस्तुतार्थापाकरणात् प्रस्तुतार्थव्याकरणाच्च निक्षेपः फलवानिति"**॥९५॥

तद्भेदानाह–

**स नाम–स्थापना–द्रव्य–भावभेदाच्चतुर्विधः ॥**

**स इति ।** निक्षेप इत्यर्थः । तत्र प्रकृतार्थनिरपेक्षा नामार्थान्यतरपरिणतिर्नामनिक्षेपः । यथा सङ्केतितमात्रेणान्यार्थस्थितेनेन्द्रादिशब्देन वाच्यस्य गोपाल-

दारकस्य शक्रादिपर्यायशब्दाऽनभिधेयपरिणतिरियमेव वा यथाऽन्यत्रावर्त्तमानेन यदृच्छाप्रवृत्तेन डित्थडवित्थादिशब्देन वाच्या। तत्त्वतोऽर्थनिष्ठा, उपचारतः शब्दनिष्ठा च। मेर्वादिनामापेक्षया यावद्‌द्रव्यभाविनी, देवदत्तादिनामापेक्षया चाऽयावद्‌द्रव्यभाविनी। यथा वा पुस्तकपत्रादिलिखिता वस्त्वभिधानभूतेन्द्रादिवर्णावली। यत्तु वस्तु तदर्थवियुक्तं तदभिप्रायेण स्थाप्यते चित्रादौ तादृक्षाकारमक्षादौ च निराकारं, स स्थापनानिक्षेपः; यथा जिनप्रतिमा। भूतस्य भाविनो वा भावस्य कारणं यन्निक्षिप्यते स द्रव्यनिक्षेपः। यथाऽनुभूतेन्द्रपर्यायोऽनुभविष्यमाणेन्द्रपर्यायो वा इन्द्रः। क्वचिदप्राधान्येऽपि द्रव्यनिक्षेपो यथाऽङ्गारमर्दको द्रव्याचार्यः। क्वचिदनुपयोगेऽपि, यथाऽनाभोगादिना क्रियमाणा जिनपूजादिक्रिया द्रव्यक्रियेति। विवक्षितक्रियानुभूतिविशिष्टं स्वतत्त्वं यन्निक्षिप्यते स भावनिक्षेपः। यथेन्दनक्रियापरिणतो भावेन्द्रः। ननु भाववर्जितानां नामादीनां कः प्रतिविशेष इति चेदुच्यते। नामद्रव्याभ्यां स्थापना तावदाकाराभिप्रायबुद्धिक्रियाफलदर्शनाद् भिद्यते। द्रव्यमपि भावपरिणामिकारणत्वान्नामस्थापनाभ्यां भिद्यते। एवं नामापि स्थापनाद्रव्याभ्यामुक्तवैधर्म्यादेव भिद्यते इति। ननु भाव एव वस्तु, किं तदर्थशून्यैर्नामादिभिरिति चेद्, न। नामादीनामपि वस्तुपर्यायत्वेन सामान्यतो भावत्वाऽनतिक्रमात्। अविशिष्टे इन्द्रवस्तुन्युच्चरिते नामादिभेदचतुष्टयपरामर्शदर्शनात्। प्रकरणादिनैव विशेषपर्यवसानात्। भावाङ्गत्वेनैव वा नामादीनामुपयोगः, जिननामादिना भावोल्लासानुभवात्। एतदपि भिन्नवस्तुगतनामाद्यपेक्षयोक्तं, अभिन्नवस्तुगतानां तु नामादीनां भावाविनाभूतत्वादेव वस्तुत्वं; सर्वस्य वस्तुनः स्वाभिधानस्य नामरूपत्वात्, स्वाकारस्य स्थापनारूपत्वात्, कारणतायाश्च द्रव्यरूपत्वात्, कार्यापन्नस्य स्वस्य च भावरूपत्वादित्यलम्॥

अथ नामादिनिक्षेपा नयैः सह योज्यन्ते—

**द्रव्यार्थिकनयस्य स्या-दिष्टं नामादिकत्रयम्॥९६॥**

**पर्यायार्थिकयोगस्तु, भावस्यैव विभावितः ।**
**शुद्धत्वाद्भावमिच्छन्ति, शब्दादिका नयास्त्रयः ॥९७॥**

**चत्वारः सर्वनिक्षेपा–निच्छन्तीति मतं परम् ।**
**एतैर्जीवादिका भावा, निरूप्यन्ते यथागमम् ॥९८॥**

**द्रव्यार्थिकेति ।** द्रव्यार्थिकनयस्य नाम स्थापना द्रव्यं चेति त्रयमभिमतमित्यर्थः । **पर्यायार्थिकेति ।** पर्यायार्थिकनयस्य च भाव एव मत इत्यर्थः । इदं चाद्यस्य भेदौ सङ्ग्रहव्यवहारौ, नैगमस्याऽनयोरेवान्तर्भावात् ; द्वितीयस्य ऋजुसूत्रादयश्चत्वारो भेदा **इत्याचार्यश्रीसिद्धसेनमतानुसारेण । श्रीजिनभद्रगणिक्षमाश्रमणपूज्यपादानां** तु पर्यायार्थिकस्य भावनिक्षेप एव, द्रव्यार्थिकस्य तु चत्वारोऽपीति मतमित्याह–**शुद्धत्वादिति । शब्देति ।** शब्दसमभिरूढैवम्भूतानां शुद्धत्वाद् भाव एव, पर्यायार्थिकाश्चैते । **चत्वार इति ।** नैगम–सङ्ग्रह–व्यवहारर्जुसूत्राणामविशुद्धत्वाच्चत्वारोऽपि निक्षेपाः, द्रव्यार्थिकाश्चैते इति भावः । **मतं परमिति ।** द्वितीयं मतमित्यर्थः । ऋजुसूत्रो नामभावावेवेच्छतीत्यन्ये । सङ्ग्रहव्यवहारौ स्थापनावर्जांस्त्रीन् निक्षेपानिच्छत इति च **केचिदाहुः ।** एतैश्च नामादिनिक्षेपैर्जीवाजीवादयः पदार्था निक्षेप्या इत्याह–**एतैरिति ।** अत्र नामादीनां सर्ववस्तुव्यापित्वं बोध्यं, तथैव सूत्राभिप्रायात् । **नन्वत्र व्यभिचारः,** अनभिलाप्यभावेषु नामनिक्षेपाऽप्रवृत्तेः; द्रव्यजीवाद्यसिद्ध्याऽभिलाप्यभावव्यापितायाः अप्यभावादिति चेत् । अत्र **केचित्** , तत्तद्व्यभिचारस्थानान्यत्वविशेषणान्न दोष इति । **अपरे** तु केवलिप्रज्ञारूपमेव नाम अनभिलाप्यभावेष्वस्ति, द्रव्यजीवश्च मनुष्यादिरेव भाविदेवादिजीवपर्यायहेतुत्वादिति । गुणपर्यायवियुक्तत्वेन बुद्ध्या कल्पितो द्रव्यजीव **इत्यन्ये ।** जीवशब्दार्थज्ञस्तत्रानुपयुक्तो द्रव्यजीव **इत्यप्याहुः ।** तत्त्वं तु केवलालोकशालिनो भगवन्त एव विदन्तीति ॥ ९६–९७–९८ ॥

**इति परोक्षादिनिक्षेपान्तनिरूपणाख्यो द्वितीयः परिच्छेदः ॥**

# अथ तृतीयः परिच्छेदः ॥

तदेवमुक्तं जीवलक्षणनिरूपणप्रसङ्गात् प्रमाण–नय–निक्षेपस्वरूपम् । अथात्मभेदप्रतिपादनावसर इति तं निरूपयति–

**अथात्मा द्विविधः प्रोक्तो, मुक्तामुक्तविभागतः ।**
**मुक्तिः कर्मक्षयो ज्ञेयः परमानन्द इत्युत ॥९९॥**

**अथेति । मुक्तामुक्तेति ।** आत्मा द्विभेदः, सिद्धः संसारी चेत्यर्थः । मुक्तिलक्षणमाह–**मुक्तिरिति** । कर्मक्षयस्य ध्वंसरूपत्वान्न पुरुषार्थत्वमित्यत आह–**परमानन्द इति** । इत्थं च स्वसमानकालीनप्रागभावाऽसमानाधिकरणदुःखध्वंसादिरूपा मुक्तिरित्यपि निरस्तम् ॥९९॥

अथ सिद्धजीवानां स्वरूपमाह–

**मुक्ताः सिद्धा गताः पारं परम्परगताश्च ते ।**
**प्राक्प्रयोगादिना गत्वा, लोकाग्रस्थानसंस्थिताः ॥१००॥**
**पूर्वदेहत्रिभागेन, मिताकाशावगाहनाः ।**
**तीर्थातीर्थप्रकारेण, द्विविधाः परिकीर्तिताः ॥१०१॥**
**सर्वकर्मविनिर्मुक्ताः; कर्माष्टप्रभिदं मतम् ॥**

**मुक्ता इति ।** पूर्वोक्तरूपां मुक्तिं प्राप्ताः । **सिद्धाः**–सितं- बद्धं कर्म ध्मातं–भस्मीकृतं यैस्ते सिद्धाः । लब्धानन्तज्ञानादिस्वरूपेण परिनिष्ठिताः, न तु नैयायिकाद्यभिमतजडस्वरूपा इति भावः । एतेऽपि संसारनिर्वाणोभयपरित्यागेन स्थितवन्तः कैश्चिदिष्यन्ते इत्यत आह **गताः पारमिति** । संसारस्य प्रयोजनव्रातस्य वा पर्यन्तं प्राप्ता इत्यर्थः । इत्थम्भूता अपि कैश्चिद् यदृच्छावादिभिरक्रमसिद्धत्वेनापि गीयन्ते इत्यत आह–**परम्परगता इति** । परम्परया ज्ञानदर्शनचारित्ररूपया मिथ्यादृष्टि–सासादन–सम्यग्मिथ्यादृष्टि–अविरतसम्यग्दृष्टि–देशविरति–प्रमत्ता–ऽप्रमत्त–निवृत्त्य – निवृत्तिबादरसम्पराय – सूक्ष्मसम्परायो–

पशान्तमोह–क्षीणमोह–सयोगिकेवल्य–योगिगुणस्थानभेदभिन्नया गताः परम्परगता इत्यर्थः । ननु सिद्धा भगवन्तः कुत्र स्थिताः कथं वा गतिक्रियाकर्माभावात्तत्र गता इत्याशङ्कायामाह–**प्राक्प्रयोगेति** । पूर्वप्रयोगाऽसङ्गत्वबन्धच्छेदोर्ध्वगौरवैस्ते कर्मक्षयानन्तरमेवालोकान्ताद् गच्छन्ति । **लोकाग्रेति** । उत्तानकच्छत्रसंस्थानसंस्थिता येषत्प्राग्भारा पृथ्वी श्वेतसुवर्णमयी तस्या ऊर्ध्वं योजने लोकान्तो भवति, तस्य च योजनस्य यदुपरितनं चतुर्थं गव्यूतं, तस्य च गव्यूतस्य यः सर्वोपरितनः षड्भागस्तस्मिन् लोकाग्ररूपे ते सिद्धभगवन्तः शाश्वतं स्थिता इत्यर्थः । अथ तत्र गताः किमवगाहनास्ते इत्याह–**पूर्वदेहेति** । इह चरममनुष्यभावे उत्कर्षतः पञ्चधनुःशतप्रमाणं जघन्यतो हस्तद्वयमानं यत्संस्थानं तेषामासीत्, तस्माद् योगनिरोधसमये सूक्ष्मक्रियाऽप्रतिपातिध्यानबलेन वदनोदरादिरन्ध्रपूरणेन तृतीयभागेन हीना सिद्धानामवगाहना भवति । सा च जघन्यत एका रत्निरष्टौ चाङ्गुलानि, उत्कर्षतस्तु त्रीणि शतानि त्रयस्त्रिंशदधिकानि धनुषां धनुस्त्रिभागश्चेति । अथ सिद्धभेदावाह–**तीर्थातीर्थेति** । तत्र तीर्थं प्रवचनं सङ्घः प्रथमगणधरो वा । तस्मिन्नुत्पन्ने ये सिद्धास्ते तीर्थसिद्धाः । तीर्थस्याऽनुत्पादेऽपान्तराले व्यवच्छेदे वा ये सिद्धास्तेऽतीर्थसिद्धाः । अत्रैव च तीर्थातीर्थ–तीर्थकरातीर्थकर–स्वयम्बुद्ध–प्रत्येकबुद्ध–बुद्धबोधित–स्त्री– पुरुष–नपुंसकलिङ्ग–स्वाऽन्य–गृहिलिङ्गैकाऽनेकसिद्धरूपपञ्चदशप्रकारा अपि सिद्धा अन्तर्भवन्तीति बोध्यम् । **सर्वकर्मेति** । ज्ञानावरणीयादिसकलकर्मरहिता इत्यर्थः । अथ प्रसङ्गात् किञ्चित् कर्मस्वरूपमाह–**कर्मेति** । वक्ष्यमाणमिथ्यात्वादिहेतुभिर्जीवेन यत् क्रियते तत् कर्म । आत्मत्वेनाविशिष्टानामपि जीवानां नरत्वनृपत्वादिवैचित्र्यनिर्वाहकशक्तिमत्तया तत्सिद्धिः । **अष्टेति** । तस्य च कर्मणो मूलभेदा अष्टाविति ॥१००-१०१॥

अथ तान् भेदानाह–

**ज्ञानावरणमाद्यं स्याद्–दर्शनावरणं परम् ॥१०२॥**

**वेद्यं च मोहनीयं चा–युष्कं च नाम गोत्रकम् ।**

**विघ्नं चाष्टममाख्यातं, शुभाशुभमिति द्विधा ॥१०३॥**

**ज्ञानेति** । ज्ञानावरणीय–दर्शनावरणीय–वेदनीय–मोहनीया–यु–र्नाम–गोत्रान्तरायरूपास्तस्य मूलभेदाः । उत्तरभेदास्तु क्रमेण पञ्च, नव, द्वौ, अष्टाविंशतिः, चत्वारः, त्र्युत्तरशतं, द्वौ, पञ्चेति । **शुभाशुभेति** । एतत् सर्वं कर्मापि सामान्यतः शुभमशुभं चेति द्विप्रकारम् । तत्र शुभफलदं शुभं, अशुभफलदमशुभं बोध्यम् ॥१०२–१०३॥

अथादृष्टस्यान्यैरात्मधर्मत्वमभिमन्यते, तन्निरासायाह–

**कार्मणवर्गणाजात–मिदं पौद्गलिकं मतम् ।**
**औदारिकादिभेदेन, वर्गणाऽष्टविधा मता ॥१०४॥**

**इदमिति** । कर्म । **पौद्गलिकमिति** । पुद्गलनिर्वृत्तं मूर्त्तमिति यावत् । इदञ्चात्रानुमानम्–अदृष्टं पौद्गलिकं; आत्मानुग्रहोपघातहेतुत्वात्, शरीरवत् । ननु किंवर्गणासम्बन्धिनः पुद्गलाः कर्मत्वमापद्यन्ते इत्याह–**कार्मणेति** । तथा च कार्मणवर्गणासम्बन्धिन एव पुद्गलस्कन्धा आत्मना कर्मत्वमापाद्यन्त इति भावः । ननु वर्गणा कतिविधेत्याह–**औदारिकादिति** । औदारिक–वैक्रिया–हारक–तैजसो–च्छ्वास–भाषा–मनः–कार्मणवर्गणाभेदादष्टविधा वर्गणेति । एताश्च जघन्यतोऽप्यभव्यानन्तगुण–सिद्धानन्तभागकल्पपरमाणुसमुदायरूपा उत्कर्षतस्तु स्वस्वानन्ततमभागेन विशेषाधिका बोध्याः । एवमेता अष्टौ वर्गणा जीवग्रहणप्रायोग्या बोध्याः । अन्यथाऽन्तराऽन्तराऽग्रहणान्तरीयवर्गणाभेदेन ध्रुवाचित्तादिवर्गणाभेदेन च तासां बहूनां सद्भावात् । एवं चौदारिकादिसम्बन्धी परमाणुः कार्मणादिवर्गणात्वेन परिणमति, कार्मणादिसम्बन्धी चौदारिकादित्वेन । एवं पृथ्व्यादि जलादित्वेन जलादि च पृथ्व्यादित्वेनापि परिणमतीति बोध्यम् ॥१०४॥

अथ प्रकारान्तरेण कर्मभेदानाह–

**प्रकृत्यादिविधाभिश्च, चतुर्धा कर्म कीर्तितम् ॥**

**प्रकृत्यादीति** । प्रकृति–स्थित्यनुभाग–प्रदेशभेदात् कर्म चतुर्विधम् । तत्र कर्मणां ज्ञानावारकत्वादिस्वभावः प्रकृतिः । प्रतिनियतकालावस्थानरूपा

स्थितिः, सप्ततिकोटाकोटिप्रमाणादिः । शुभाशुभादिरनुभागः । बहुतरतमादिविभागरूपाः प्रदेशाः ॥

अथ कर्मबन्धहेतूनाह—

**मिथ्यात्वाऽविरतियोग-कषायाश्चेति बन्धकाः ॥१०५॥**

**प्रकृत्यां च प्रदेशे च, कारणं योग आहितः ।**

**अनुभागे स्थितौ च स्यात्, कषायः कारणं किल ॥१०६॥**

**मिथ्यात्वेति** । तत्राभिग्रहिकादिकं मिथ्यात्वं पञ्चविधम् । पृथ्वीकायाद्यविरत्यादिकाऽविरतिर्द्वादशविधा । मनोयोगादिका योगाः पञ्चदशविधाः । अनन्तानुबन्ध्यादिकाः कषायाः पञ्चविंशतिविधाः । अत्र योगात् प्रकृतिबन्ध-प्रदेशबन्धौ भवतः, कषायाच्चानुभागबन्ध-स्थितिबन्धावित्याह—**प्रकृत्यामिति** । स्पष्टम् ॥ १०५ १०६ ॥

अत्र कर्मणां न बन्ध एव केवलः, किन्तु बद्धानां सङ्क्रमादिरपीति बन्धसङ्क्रमादिहेतु करणमाह—

**यथासम्भवमेतेषा-मष्टधा करणं मतम् ।**

**एतेषामुदयादिः स्याद्, द्रव्यक्षेत्रादिभेदतः ॥१०७॥**

**ज्ञानदर्शनचारित्र-प्रभृति स्याद् यथायथम् ।**

**क्षयोपशान्तिभावेन, चैतेषामेव कर्मणाम् ॥१०८॥**

**यथासम्भवमिति** । इत्थं च सम्यक्त्वमोहनीयादेर्बन्धाऽभावेऽपि, आयुरादीनां परस्परं सङ्क्रमाऽभावेऽपि, ज्ञानावरणीयादीनामुपशमाऽभावेऽपि न क्षतिः । **अष्टधेति** । बन्धन-सङ्क्रमणो-द्वर्त्तना-ऽपवर्त्तनो-दीरणो-पशमना-निधत्ति-निकाचनाभेदादष्टविधं करणमित्यर्थः । करणं च बन्धसङ्क्रमादिहेतुरात्मनो वीर्यपरिणतिविशेष एव । तत्र बन्धः कर्मपुद्गलानां जीवप्रदेशैः सहान्योन्यानुगतीकरणम् । अन्यकर्मरूपतया व्यवस्थितानां प्रकृतिस्थित्यनुभागप्रदेशानामन्यकर्मरूपतया व्यवस्थापनं सङ्क्रमः । तद्भेदावेवोद्वर्त्तनापवर्त्तने; ते च कर्मणां

स्थित्यनुभागाश्रये । तत्र स्थित्यनुभागयोः प्रभूतीकरणमुद्वर्त्तना । तयोर्ह्रस्वीकरणमपवर्त्तना । अनुदयप्राप्तस्य कर्मदलिकस्योदयावलिकायां प्रवेशनमुदीरणा । उदयोदीरणानिधत्तिनिकाचनाकरणाऽयोग्यत्वेन कर्मणां व्यवस्थापनमुपशमना । उद्वर्त्तनाऽपवर्त्तनाऽन्यशेषकरणाऽयोग्यत्वेन व्यवस्थापनं निधत्तिः । सकलकरणाऽयोग्यत्वेनावश्यवेद्यतया व्यवस्थापनं निकाचनेति । कर्मणामुदयादौ बाह्यस्य द्रव्यादेरपि हेतुत्वमस्तीत्याह—**एतेषामिति** । कर्मणामित्यर्थः । **उदयादिरिति** । आदिपदात् क्षयोपशम—क्षयोपशमा ग्राह्याः । **द्रव्यक्षेत्रादीति** । आदिपदात्कालभावभवा बोध्याः । तत्र द्रव्यं जिनप्रतिमादिकं, क्षेत्रं सिद्धक्षेत्रादिकं, कालः पर्युषणादिको, भावः शुभात्मपरिणतिः, भवो देवभवादिरिति । ननु कर्मक्षयोपशमादिभ्यः किं भवतीत्याह—**ज्ञानेति** । तत्र ज्ञानदर्शनावृतिक्षयोपशमेन क्रमाज्ज्ञानदर्शने; मोहनीयक्षयोपशमात् सम्यक्त्वचारित्रे; अन्तरायक्षयोपशमे दानादयो भवन्ति । एतच्च सर्वं क्षायोपशमिकं बोध्यम् । तत्तत्कर्मणां क्षये तु क्षायिकं भवति । एवं मोहनीयस्योपशमे सम्यक्त्वचारित्रे औपशमिकेऽपि स्यातामिति संक्षेपः ॥ १०७–१०८ ॥

अथाऽमुक्तजीवस्वरूपमाह—

**चतुर्विधा अमुक्ताः स्यु–र्नरकादिप्रभेदतः ।**
**रत्नप्रभादिभेदेन, नारकाः सप्तधा मताः ॥१०९॥**
**पञ्चाक्षा एव विज्ञेया–मुक्त्वा तिर्यक्शरीरिणः ।**
**एकेन्द्रियादिभेदेन, तिर्यञ्चः पञ्चधा मताः ॥११०॥**
**आद्याः पृथ्वी–पय–स्तेजो–वरेण्यु–वन–भेदतः ।**
**सूक्ष्माश्च बादराश्चैते, द्वीन्द्रियाद्या अनेकधा ॥१११॥**
**गर्भजेतरभेदेन, द्विधा च मनुजा मताः ।**
**भवनपत्यादिभेदेन, देवताश्च चतुर्विधाः ॥११२॥**

**चतुर्विधा इति** । संसारिणो जीवा नारकास्तिर्यञ्चो मनुष्या देवाश्चेति चतुर्विधाः । नारकानाह—**रत्नप्रभेति** । रत्नप्रभा—शर्कराप्रभा—वालुकाप्रभा—पङ्कप्रभा

धूमप्रभा–तमःप्रभा–तमस्तमःप्रभाभेदान्नारकाः सप्तविधाः। अत्र तिरश्चो वर्जयित्वा नारकमनुष्यदेवाः पञ्चेन्द्रिया एवेत्याह–**पञ्चाक्षा इति**। ननु तर्हि तिर्यञ्चः कतिविधा इत्याकाङ्क्षायामाह–**एकेन्द्रियादीति**। एकेन्द्रिय–द्वीन्द्रिय–त्रीन्द्रिय–चतुरिन्द्रिय–पञ्चेन्द्रियभेदात् तिर्यञ्चः पञ्चप्रकारा इत्यर्थः। तत्रैकेन्द्रियादिभेदानाह–**आद्या इत्यादि**। पृथ्वीकाया–ऽप्काय–तेजःकाय–वायुकाय–वनस्पतिकायभेदादेकेन्द्रियाः पञ्चविधाः। एते पञ्चापि पुनः सूक्ष्मा बादराश्चेति द्विधा। तत्र सूक्ष्मनामकर्मोदयवर्त्तिनः सूक्ष्मा बादरनामकर्मोदयवर्त्तिनश्च बादराः। **द्वीन्द्रियाद्या इति**। तत्र शङ्खकृम्यादयो द्वीन्द्रियाः, मत्कुणकीटिकादयस्त्रीन्द्रियाः, वृश्चिकमक्षिकादयश्चतुरिन्द्रियाः। एवं मत्स्याश्वसर्पनकुलहंसादयः पञ्चेन्द्रियास्तिर्यञ्चः। ते पुनः समासतो द्विधा–गर्भजाः सम्मूर्च्छिमाश्चेति। अथ मनुष्यानाह–**गर्भज इति**। मनुष्या गर्भजाः सम्मूर्च्छिमाश्चेति द्विविधा इत्यर्थः। अत्रेदं बोध्यम्–जरायुजा मनुष्यगोमहिष्यादयः, अण्डजाः सर्पमत्स्यहंसादयः, पोतजा हस्तिनकुलभारण्डादयश्च गर्भजा उच्यन्ते। नारकदेवाश्चोपपातजा उच्यन्ते। शेषा एकेन्द्रियादयो गर्भजभिन्ना मनुष्याः पञ्चेन्द्रिय–तिर्यञ्चश्च सम्मूर्च्छनजा उच्यन्त इति। अथ देवभेदानाह–**भवनपत्येति**। भवनवासिनो व्यन्तरा ज्योतिष्का वैमानिकाश्चेति चतुर्विधा देवाः। तत्र भवनवासिनोऽसुर–नाग–विद्युत्–सुपर्णा–ऽग्नि–वातस्तनितो–दधि–द्वीप–दिक्कुमाराः। व्यन्तराः किन्नर–किम्पुरुष–महोरग–गान्धर्व–यक्ष–राक्षस–भूत–पिशाचाः। ज्योतिष्काश्चन्द्र–सूर्य–ग्रह–नक्षत्र–तारकाः। वैमानिकाः कल्पोपपन्नाः कल्पातीताश्च। तत्राद्याः सौधर्मेशानसनत्कुमारमाहेन्द्रब्रह्मलोकलान्तकमहाशुक्रसहस्रारानतप्राणतारणाच्युताः। द्वितीया नव ग्रैवेयका विजय–वैजयन्त–जयन्ता–ऽपराजित–सर्वार्थसिद्धाश्चेति ॥१०९–११०–१११–११२॥

अथैते सर्वेऽपि जीवाः पर्याप्ता अपर्याप्ताश्चेति द्विविधा भवन्तीत्याह–

**पर्याप्तेतरभेदेना–ऽमी सर्वे द्विविधा मताः।**
***पर्याप्तिरात्मनः शक्ति–विशेषःसा च षड्विधा ॥११३॥***

**पर्याप्त इति**। स्पष्टम्। ननु का नाम पर्याप्तिरिति चेदत आह **पर्याप्तिरिति**। आहारादिपुद्गलग्रहणपरिणमनहेतुरात्मनः शक्तिविशेषः पर्याप्तिः। सा

च षड्विधा, आहार–शरीरे – न्द्रियो–च्छ्वास–भाषा – मनःपर्याप्तिभेदात् । ताश्च यथाक्रममेकेन्द्रियाणां द्वीन्द्रियादीनां संज्ञिनां चतुः–पञ्च–षट्–सङ्ख्या भवन्ति ॥११३॥

पुनर्विशेषतो जीवस्वरूपमाह—

**सर्वेऽमी ससमुद्घाताः, सलेश्याश्च सयोगिनः ।**
**यथार्हस्थानिनः प्रोक्ताः, सर्वभावप्रदर्शिभिः ॥११४॥**

**सर्वे इति ।** तत्र समुद्घातो वेदनादिभिः सहैकीभावेन प्राबल्येन कर्मणां घातः । तत्र वेदनासमुद्घातोऽसद्वेद्यकर्माश्रयः । कषायसमुद्घातः कषायाख्य-चारित्रमोहनीयकर्माश्रयः । मारणान्तिकसमुद्घातोऽन्तर्मुहूर्त्तशेषायुःकर्माश्रयः । वैक्रियतैजसाहारकसमुद्घाता यथाक्रमं वैक्रियतैजसाहारकशरीरनामकर्माश्रयाः । केवलिसमुद्घातः सदसद्वेद्यशुभाशुभनामोच्चनीचैर्गोत्रकर्माश्रयः । लेश्या च योगान्तर्गतद्रव्यरूपकृष्णादिद्रव्यसाचिव्यादात्मनः परिणामविशेषः । योगश्च परिस्पन्द-क्रिया मनोवचःकायनिमित्तक आत्मव्यापार इति यावदिति ॥११४॥

अथ समुद्घातादिभेदानाह—

**वेदनादिसमुद्घाताः, सप्त शास्त्रे प्रकीर्त्तिताः ।**
**लेश्याः कृष्णा च नीला च, कापोती तैजसी तथा ॥११५॥**
**पद्मा शुक्ला च, योगास्तु, त्रय एव प्रकीर्त्तिताः ।**
**मनोयोगो वचोयोगः, सत्यादिकश्चतुर्विधः ॥११६॥**
**सप्तधा काययोगः स्यात्, काय औदारिकस्तथा ।**
**वैक्रियश्चाऽऽहारकश्च, तैजसः कार्मणस्तथा ॥११७॥**

**वेदनेति ।** वेदना–कषाय–मारणान्तिक वैक्रिय–तैजसा–हारक–केवलि-समुद्घातभेदात् सप्तविधः समुद्घातः । तत्र मनुजेषु सप्त, देवेष्वन्त्यद्वयवर्जाः पञ्च, तिर्यङ्नारकयोराद्याश्चत्वारः । **लेश्या इति ।** कृष्ण–नील–कापोत–तेजः-पद्म–शुक्ललेश्याभेदात् षड्विधा लेश्या । तत्र तिर्यङ्मनुजदेवेषु षट्,

नारकेष्वाद्यास्तिस्रः। **योगा इति**। मनोवचःकाययोगभेदात् त्रिविधो योगः। तदुत्तरभेदानाह-**मन इति**। सत्या-ऽसत्य-सत्यमृषा-ऽसत्याऽमृषामनोयोग-भेदान्मनोयोगश्चतुर्धा। एवं वचनयोगोऽपि चतुर्धा। काययोगश्चौदारिकौ-दारिकमिश्र-वैक्रिय-वैक्रियमिश्रा-ऽहारका-ऽहारकमिश्र-कार्मणकाययोगभेदात् सप्तविधः। तैजसस्तु कार्मण एवान्तर्भूतः। एवं पञ्चदश योगाः। तत्र देव-नारकेष्वेकादश चतुर्विधमनोयोग-वचनयोग-वैक्रिय-वैक्रियमिश्र-कार्मणरूपाः। तिर्यक्षु त एवौदारिकौदारिकमिश्राधिकास्त्रयोदश। मनुष्येषु पञ्चदशापीति। काययोग इत्यत्र कायः शरीरमिति तद्भेदानाह-**काय इति**। शरीरमित्यर्थः। तच्चौदारिक-वैक्रिया-ऽहारक-तैजस-कार्मणभेदात् पञ्चविधमिति। तत्रासार-स्थूलद्रव्यवर्गणासमारब्धमौदारिकम्। अनेकाद्भुताश्चर्यं विविधगुणर्द्धिसम्प्रयुक्त-पुद्गलवर्गणाप्रारब्धं वैक्रियम्। शुभतरशुक्लविशुद्धद्रव्यवर्गणाप्रारब्धं प्रतिविशिष्ट-प्रयोजनकमाहारकम्। तेजोगुणोपेतद्रव्यवर्गणासमारब्धं शापानुग्रहसामर्थ्या-विर्भावनमभ्यवहृताहारपाचनशक्तियुक्तं च तैजसम्। अशेषकर्मराशेराधारभूत-मशेषकर्मप्रसवसमर्थं वा कार्मणमिति ॥११५-११६-११७॥

अथ कस्य कतिविधं तदित्याह-

**तिर्यञ्चश्च मनुष्याश्च, ज्ञेया औदारिकाङ्गिनः।**
**नारकाश्च सुरा लब्धि-मन्तो वैक्रियकायिनः ॥११८॥**

**वपुश्चाहारकं शुद्धं, स्याच्चतुर्दशपूर्विणाम्।**
**तैजसं कार्मणं च स्या-दाभवं सर्वदेहिनाम् ॥११९॥**

**तिर्यञ्च इति**। **लब्धिमन्त इति**। ते च तिर्यञ्चो मनुष्याश्च बोध्याः। **शुद्धमिति**। असावद्यमित्यर्थः। **चतुर्दशेति**। आहारकामर्षौषध्यादिलब्धिमता-मिति शेषः। **आभवमिति**। आसंसारमित्यर्थः। तथा च देवनारकाणां वैक्रियं तैजसं कार्मणं चेति शरीरत्रयम्। तिरश्चामौदारिकमपि। मनुष्याणां त्वाहारक-मपीति भावः॥ ११८-११९॥

अथ जीवानां स्थानमाह–

**रत्नप्रभादिपृथ्व्यः स्यात्, स्थानं नारकदेहिनाम् ।**
**विमानाद्यासिनो देवाः, तिर्यञ्चः सर्वलोकगाः ॥१२०॥**

**आपुष्करार्द्धमास्थानं, मनुष्याणां मतं जिनैः ।**
**जम्बूद्वीपादयो द्वीपाः, समुद्रा लवणादयः ॥१२१॥**

**रत्नप्रभादीति** । आदिपदात् शर्कराप्रभाद्यास्तमस्तमःप्रभान्ता ग्राह्याः । **विमानादीति** । आदिपदाद् भवनान्यावासाश्च बोध्याः । **सर्वलोकेति** । इदं चैकेन्द्रियानाश्रित्य बोध्यम् । द्वीन्द्रियादीनां लोकैकदेश एव वृत्तित्वादिति । **आपुष्करार्द्धमिति** । सर्वाभ्यन्तरः प्रथमो जम्बूद्वीपो योजनलक्षप्रमाणायामविष्कम्भस्ततो लवणसमुद्रो द्विगुणस्ततो धातकीखण्डो लवणाद् द्विगुणस्ततस्तस्माद् द्विगुणः कालोदसमुद्रस्ततस्तस्माद् द्विगुणः पुष्करवरद्वीपस्तस्य च यदर्द्धं तन्मर्यादीकृत्येति भावः । **जम्बूद्वीपेति** । आदिपदाद् धातकीखण्डादयः स्वयम्भूरमणद्वीपान्ता बोध्यास्ते चाऽसङ्ख्याताः । **लवणेति** । आदिपदात् कालोदसमुद्रादयः स्वयम्भूरमणसमुद्रपर्यन्ता बोध्यास्तेऽप्यसङ्ख्याता इति ॥१२०–१२१॥

तदेवं निरूपितं जीवद्रव्यमथ पुद्गलद्रव्यमाह–

**एवञ्च पुद्गला ज्ञेया–रूपिणः परिणामिनः ।**
**दशधा परिणामश्च, बन्धनादिप्रकारतः ॥१२२॥**

**एवमिति** । पुद्गललक्षणमाह–**रूपिण इति** । तथा च रूपवत्त्वं पुद्गलस्य लक्षणम् । वाय्वादिपुद्गलानामप्यस्ति रूपवत्त्वं स्पर्शवत्त्वादिति नाव्याप्तिः । अनुपलम्भस्त्वनुद्भूतत्वादेवेति । **परिणामिन इति** । बन्धनादिपरिणामवन्त इत्यर्थः । परिणामश्चाऽर्थान्तरगमनमात्ररूपाः पर्यायविशेषा एव । परिणामभेदानाह–**दशधेति** । बन्धन–गति–संस्थान–भेद–वर्ण–गन्ध–रस–स्पर्शा–ऽगुरुलघु–शब्द–भेदाद् दशप्रकारः परिणाम इति ॥१२२॥

अथ बन्धनादीनाह–

स्निग्धरूक्षप्रभेदेन, भावितं बन्धनं द्विधा ।
स्पृशन्ती चास्पृशन्ती च, गतिरेवं द्विभेदिनी ॥१२३॥

संस्थानं पञ्चधा तत्र, परिमण्डलमादिमम् ।
वृत्तं त्र्यस्रं चतुरस्र–मायतं चैव कीर्त्तितम् ॥१२४॥

पञ्चधैवं च भेदः स्यात्, खण्डश्च प्रतरस्तथा ।
चूर्णकोऽनुतटिका चो–त्करिका तत्र पञ्चमः ॥१२५॥

वर्णोऽप्येवं स चैवं स्यात्, कृष्णो नीलश्च रोहितः ।
पीतः शुक्लश्च, गन्धश्च, सुरभ्यसुरभी द्विधा ॥१२६॥

तिक्तश्च कटुकश्चैव, कषायश्चाम्बलस्तथा ।
मधुरश्चेति विज्ञेयो, रसः पञ्चविधः खलु ॥१२७॥

स्पर्शा अष्ट मताश्चैवं, कर्कशश्च मृदुर्गुरुः ।
लघुरेवं च शीतोष्णौ, स्निग्धरूक्षौ तथैव च ॥१२८॥

अगुरुलघुराख्यात–एकाकारो बुधेश्वरैः ।
शब्दाख्यः परिणामस्तु, भाव्यतेऽथो विपश्चिमः ॥१२९॥

स द्विधा वा चतुर्धा च, द्विधा तत्र विभाव्यते ।
शुभाशुभतया यद्वा, वैस्रसिकः प्रयोगजः ॥१३०॥

ततश्च विततश्चैव, घनश्च शुषिरस्तथा ।
सङ्घर्षश्चाथ भाषा च, स्यात् षोढेति प्रयोगजः ॥१३१॥

चतुर्भेदाश्च तत्र स्यु–र्विमुच्यान्तिमयुग्मकम् ।
पुद्गलानां परिणामाः, संक्षेपादित्युदाहृताः ॥१३२॥

तत्र पूर्वं द्वयोर्बहूनां वैकत्वपरिणतिलक्षणं बन्धनपरिणाममाह–**स्निग्धेति** । स्निग्धबन्धो रूक्षबन्धश्चेति द्विधा बन्धः । तत्र जघन्यगुणस्निग्धरूक्षपुद्गलानां न

परस्परं बन्धः, अजघन्यगुणानां तु स्यात् । तत्रापि समगुणस्निग्धानां समगुणस्निग्धैः सह समगुणरूक्षाणां च समगुणरूक्षैः सह न बन्धः, किन्तु स्निग्धानां द्विकाद्यधिकस्निग्धैरेव सह रूक्षाणां च द्विकाद्यधिकरूक्षैः सह भवति बन्धः । स्निग्धानां रूक्षाणां परस्परं तु विषमाणां समानामपि अजघन्यगुणानां भवत्येव बन्ध इति । अथ देशान्तरप्राप्तिलक्षणं गतिपरिणाममाह—**स्पृशन्तीति** । स्पृशद्गतिरस्पृशद्गतिरिति गतिपरिणामो द्वेधा । तत्र वस्त्वन्तरं स्पृशतो यो गतिपरिणामः स आद्यः । यद्वस्तु केनापि सहापान्तराले न संस्पर्शनमनुभवति तस्य द्वितीयः । अथ रचनाविशेषरूपं संस्थानपरिणाममाह—**संस्थानमिति** । तत्र वलयादिवद् यदन्तः शुषिरं बहिश्च मण्डलाकृत्यवस्थिताण्वोघं तत्परिमण्डलम् । कुलालचक्रादिवद् यदन्तरपि पूर्णं तद् वृत्तम् । यत् शृङ्गाटकादिवत् त्रिकोणं तत् त्र्यस्रम् । कुम्भिकादिवच्चतुष्कोणं चतुरस्रम् । यच्च दण्डादिवद् दीर्घं तदायतमिति । अथ विभक्तप्रत्ययहेतुलक्षणं भेदपरिणाममाह—**पञ्चधा इति** । तत्र लोहखण्डादिवत् खण्डः, अभ्रपटलादिवत् प्रतरः, क्षिप्तमृत्पिण्डादेरिव चूर्णकः, इक्षुत्वगादिवदनुतटिकाभेदः, उत्कीर्यमाणप्रस्थादिवदुत्करिकाभेद इति । अथ वर्णपरिणाममाह—**वर्ण इति** । स च सामान्यतः कृष्ण-नील—रक्त—पीत—शुक्लभेदात् पञ्चप्रकारः । गन्धमाह—**सुरभिरिति** । स्पष्टम् । रसमाह—**तिक्त इति** । स्पष्टम् । स्पर्शमाह—**स्पर्श इति** । स्पष्टम् । तत्र कर्कशगुर्वादिस्पर्शानामपि स्पर्शनेन्द्रियजन्यप्रत्यक्षविषयत्वात् स्पर्शत्वं स्पष्टमेवेति । अथाऽगुरुलघुपरिणाममाह—**अगुरुलघुरिति** । अगुरुलघुपरिणामस्त्वेकाकार इत्यर्थः । अत्र यद् द्रव्यं न गुरुकमधोगमनस्वभावं नापि लघुकमूर्ध्वगमनस्वभावं तदगुरुलघुकमुच्यते; परिणामपरिणामवतोरभेदात् । अत्रैतद्विपक्षो गुरुलघुपरिणामोऽपि बोध्यः । तत्राष्टस्पर्शा बादरा औदारिक-वैक्रिया—ऽऽहारक—तैजसपुद्गला गुरुलघवः । चतुःस्पर्शाः शेषाश्च भावा अगुरुलघव इति । अथ शब्दपरिणाममाह—**शब्दाख्य इति** । तत्र प्रथमं द्वैविध्यमाह—**शुभाशुभेति** । प्रतीतार्थमेव । प्रकारान्तरेण द्वैविध्यमाह—**वैस्रसिक इति** । स्वाभाविक इत्यर्थः । स च जलधरध्वानादिः । **प्रयोगज इति** । जीवव्यापार-

निष्पन्न इत्यर्थः । अथैतद्भेदानाह–तत इति । तत्र पटहादिभवस्ततः; वीणादिभवो विततः; कांस्यभाजनादिभवो घनः; वेण्वादिभवः शुषिरः; क्रकचकाष्ठादिसंघर्षभवः संघर्षः । यश्च व्यक्तवाग्भिर्वर्णपदवाक्याकारेण भाष्यते स भाषारूप इति । अथ ग्रन्थान्तरोक्तं चातुर्विध्यमाह–**चतुर्भेदा इति ।** शब्दा इति शेषः । **विमुच्येति । अन्तिमयुग्मेति ।** चरमभेदद्वयं मुक्त्वेत्यर्थः । तथा च ग्रन्थान्तरे तत–वितत–घन–शुषिरभेदाच्चतुर्भेदा अपि शब्दाः प्रोक्ता इति भावः । तत्र ततं वीणादिकं, विततं पटहादिकं बोध्यम्, शेषं पूर्ववदेवेति ॥१२३–१३२॥

तदेवं निरूपिताः पुद्गलपरिणामाः । छायादयोऽपि तत्परिणामविशेषा एवेत्याह–

**एवं छायातपोद्योता–दयोऽप्यागमवेदिभिः ।**
**पुद्गलानां परिणाम–विशेषाः परिकीर्त्तिताः ॥१३३॥**

**छायेति** । आदिपदादन्धकारादिकं ग्राह्यम् । तत्र छायायाः शीतलत्वाज्जलवत्; आतपस्योष्णत्वादनलवत्; उद्योतस्याह्लादकत्वात् पयोवत्; अन्धकारस्य च दृष्टिप्रतिरोधकारित्वात् कुड्यादिवद् आवारकत्वाच्च पटादिवत् पुद्गलपरिणामत्वं सुप्रतीतमेवेति ॥१३३॥

तदेवं निरूपितं पुद्गलद्रव्यं, अथावसरायातं कालद्रव्यमाह–

**अथ निरूप्यते कालो, वर्त्तनालक्षणः स च ।**
**परिणामा नवत्वाद्या–वर्त्तना त्वभिधीयते ॥१३४॥**

**अथेति** । काललक्षणमाह–**वर्त्तनेति** । जनकताविशेषसम्बन्धेन वर्त्तनासम्बन्धित्वं कालस्य लक्षणमिति । ननु का सा वर्त्तनेत्याह–**परिणामा इति** । नवत्वजीर्णत्वादिपरिणामा एव वर्त्तना कथ्यते इति भावः ॥१३४॥

अथ क्षेत्रतः कालमानमाह–

**सार्द्धद्वीपद्वयाम्भोधि–द्वैतमानः प्रकीर्त्तितः ॥**

सार्द्धेति । अर्धतृतीयद्वीपसमुद्रद्वयाक्रान्तक्षेत्रपरिमाणस्तिर्यग्मानेन पञ्चचत्वारिंशद्योजनलक्षप्रमाण ऊर्ध्वमधश्चाष्टादशशतयोजनप्रमाणः कालो नाम द्रव्यम् , तत्रैव वर्त्तनालिङ्गसद्भावात् ॥ अयं च काल एक एव वर्त्तमानसमयरूपो वास्तवः, नातीताऽनागताः समयाः; तेषां विनष्टत्वेनाऽनुत्पन्नत्वेन चाऽसत्त्वात् । अत एव चायमद्धासमय इत्युच्यते । अत एव चात्र न स्कन्धदेशादिविभागः । आवलिकादयस्तु व्यवहारार्थं कल्प्यमाना बुद्धिसमुचितसमयसमुदयरूपत्वादौपचारिका एवेत्याह–

**एक एवाऽस्त्ययं कालो, वर्त्तमानः स वास्तवः ॥१३५॥**
**कल्प्यन्ते व्यवहारार्थं, पुनरावलिकादयः ।**
**समयानामसङ्ख्याना–मेका साऽभिहिता बुधैः ॥१३६॥**
**समयस्त्वविभाज्योऽति–सूक्ष्मः कालः समीरितः ।**
**द्रव्यपर्यायरूपो वा, सोऽभिरूपैः प्रकीर्त्तितः ॥१३७॥**

**एक इत्यादि** । स्पष्टम् । आवलिकामाह–**समयानामिति** । जघन्ययुक्ताऽसङ्ख्यातसमयप्रमितैकावलिकेत्यर्थः । समयमाह–**समय इति** । यः कालविशेषः परमसूक्ष्मः सर्वविदाऽपि द्विधा विभक्तुमशक्यः स समय इत्यर्थः । अत्र मतान्तरमाह–**द्रव्येति** । **अन्ये तु** द्रव्यपर्यायरूप एव कालस्तस्यैव वर्त्तनारूपत्वात् सर्वत्र सम्भवितत्वाच्चेति भावः ॥१३५–१३६–१३७॥

अथोच्छ्वासादिकालभेदानाह–

**ताः सङ्ख्येया भवेदेक–उच्छ्वासश्च बलीयसः ।**
**ताभ्यां द्वाभ्यां भवेत्प्राणः, स्तोकः स्यात्तैश्च सप्तभिः ॥१३८॥**

**तावद्भिस्तैर्लवः प्रोक्तः, सार्द्धाष्टात्रिंशता च तैः ।**
**नालिकैका भवेद् द्वाभ्यां, ताभ्यां मुहूर्त्त ईरितः ॥१३९॥**
**त्रिंशता तैरहोरात्र–एवमग्रेऽपि विस्तरः ।**

**ता इति ।** आवलिका इत्यर्थः । उच्छ्वासश्चेत्यत्र चकारान्निःश्वासोऽपि ग्राह्यः । सोऽपि ह्युच्छ्वाससमान एव । **बलीयस इति ।** अत्र नीरोगस्याऽप्राप्ताध्वखेदस्य सुखासनसमाश्रितस्याऽव्याकुलस्य यून इत्यपि बोध्यम् । शेषं स्पष्टम् । **विस्तर इति ।** तथाहि–पञ्चदशभिरहोरात्रैः पक्षः, ताभ्यां द्वाभ्यां मासः, तैर्द्वादशभिश्च संवत्सरः । यद्यप्यादित्यर्तुचन्द्रर्क्षाभिवर्द्धिताख्याः पञ्च संवत्सरास्तदनुसारिदिवसादीनामप्यनैयत्यं, तथापि कर्मसंवत्सरमुद्दिश्यैष क्रमो बोध्यः । एष एव च ऋतुसंवत्सरः सायनसंवत्सर इत्यप्युच्यते । एवं पञ्चभिः संवत्सरैर्युगम् । एवं चतुरशीत्या वर्षलक्षैः पूर्वाङ्गम्, चतुरशीत्या तल्लक्षैरेकं पूर्वमित्यादि विभावनीयमिति कालः ॥१३८–१३९॥

तदेवं द्रव्यपदार्थो निरूपितोऽथ पर्यायपदार्थनिरूपणावसर इत्याह–

**एवं निरूपितं द्रव्यं, पर्यायोऽथो निरुच्यते ॥१४०॥**

**स द्वेधा सहभाव्याद्यः, क्रमभावी द्वितीयकः ।**
**संज्ञाविशेषतश्चेमौ, गुणः पर्याय इत्यथ ॥१४१॥**

**एवमिति ।** स्पष्टम् । तं विभजते–**स इति ।** सहभावी क्रमभावी चेति द्वेधा पर्यायः । **संज्ञेति ।** तत्र सहभावी पर्यायो गुण इति विशेषसंज्ञया गीयते, क्रमभावी तु पर्याय इति सामान्यसंज्ञामधितिष्ठतीति भावः । अत्र यावद्द्रव्यभावित्वे सति सकलपर्यायानुगामित्वमित्यन्यत्रोक्तं गुणलक्षणमपि प्रोक्तलक्षणादनतिरिक्तमेव, सहभावित्वत एव सकलपर्यायानुगामिताया लाभादिति ॥ ॥१४०–१४१॥

अथ गुणान् विभजते–

**तत्रास्तित्वं च वस्तुत्वं, द्रव्यत्वं च प्रमेयता ।**
**तथाऽगुरुलघुत्वं च, प्रदेशत्वं तथैव च ॥१४२॥**
**ज्ञानं च दर्शनं सौख्यं, वीर्यस्पर्शौ रसस्तथा ।**
**गन्धवर्णौ तथा ज्ञेयौ, गतिहेतुत्वकं तथा ॥१४३॥**

**स्थित्यवगाहहेतुत्वं, वर्त्तनाहेतुता तथा ।**
**चेतनत्वाचेतनत्वे, मूर्त्तत्वामूर्त्तते इति ॥१४४॥**

**तत्रेति ।** अस्तित्वादयोऽमूर्त्तत्वान्ता द्वाविंशति गुणा इत्यर्थः । तत्राऽस्तित्वं सद्भूतत्वं, यतः 'सदि'ति व्यवहारः । वस्तुत्वं सामान्यविशेषोभयात्मकत्वम् । द्रव्यत्वमपि पर्यायानुगामित्वाभिव्यङ्ग्यं गुण एव । प्रमेयत्वं प्रमाविषयत्वं स्वाश्रयनिरूपितविषयत्वसम्बन्धेन प्रमात्वमेव वा । अगुरुलघुत्वं नाम स्वनाम्ना ख्यातः प्रवचनसिद्धो गुणः, येन द्रव्याणामगुरुलघुव्यवहृतिः सम्पद्यते । प्रदेशत्वमविभागिपुद्गलावगाह्यक्षेत्रमात्रव्यापित्वं येनानुगतप्रदेशव्यवहारः । ज्ञानादयस्तु प्रतीता एव ! चेतनत्वमनुभवाख्यो गुणः । अचेतनत्वमनुभवराहित्यम् । मूर्त्तत्वं रूपादिमत्त्वम् । अमूर्त्तत्वं रूपादिराहित्यमिति ॥ १४२-१४३-१४४॥

अथात्र सामान्यविशेषविभागमाह—

**विज्ञेयाः षट् च सामान्या-स्तत्रास्तित्वादयो गुणाः ।**
**विशेषा द्वादश प्रोक्ता-बुधैर्ज्ञानादिका गुणाः ॥१४५॥**
**सामान्याश्च विशेषाश्च, चेतनत्वादयो मताः ।**

**विज्ञेया इति ।** तत्रास्तित्वादयः प्रदेशत्वान्ताः षट् सामान्यगुणाः । **विशेषा इति ।** ज्ञानादयो वर्त्तनाहेतुत्वान्ता द्वादश विशेषगुणाः । **सामान्या इति ।** चेतनत्वादयोऽमूर्त्तत्वान्ताश्चत्वारः सामान्यगुणा विशेषगुणाश्चेति । तत्राऽस्तित्व-द्रव्यत्व-प्रमेयत्वा-ऽगुरुलघु-प्रदेशत्व-चेतनत्वा-ऽमूर्त्तत्वान्यष्टावात्मनः सामान्यगुणाः; धर्मास्तिकायादीनां चेतनत्वस्थानेऽचेतनत्वसहितानि तान्येवाष्टौ; पुद्गलस्य च चेतनत्वाऽमूर्त्तत्वस्थानेऽचेतनत्व-मूर्त्तत्वान्वितानि । ज्ञान-दर्शन-सुख-वीर्य-चेतनत्वा-ऽमूर्त्तत्वानि षडात्मनो विशेषगुणाः । पुद्गलस्य स्पर्शरसगन्धवर्णाऽचेतनत्वमूर्त्तत्वानि षट् । धर्मास्तिकायादीनां च क्रमशो गति-स्थित्यवगाह-वर्त्तनाहेतुत्वानामेकैकोऽचेतनत्वाऽमूर्त्तत्वयुगलमिति त्रयस्त्रयो गुणा इति ॥१४५॥

तदेवं निरूपितो गुणोऽथ पर्यायमाह—

**पर्यायश्च द्विधा द्रव्य–गुणपर्यायभेदतः ॥१४६॥**

**मनुष्यत्वादिराद्यः स्याद्–नीलादिर्द्वितीयो मतः ।**
**एवमन्यप्रकाराच्च, पर्यायाणां भिदा मता ॥१४७॥**

**पर्याय इति ।** क्रमभावी पर्यायस्तु द्रव्यपर्याय–गुणपर्यायभेदाद् द्विविध इत्यर्थः । **मनुष्यत्वादिरिति ।** तत्र मनुष्यत्व–स्कन्धत्वादिर्द्रव्यपर्यायः, नीलपीतादिर्मत्यादिश्च गुणपर्याय इत्यर्थः । यद्वा गुणविकाराः पर्यायाः, ते च द्वादश; अनन्ताऽसङ्ख्यातसङ्ख्यातभागगुणवृद्धिभ्यां तथाऽनन्ताऽसङ्ख्यातसङ्ख्यातभागगुणहानिभ्यां च षट् षड् इति । प्रकारान्तरेणापि पर्यायभेदः सम्भवतीत्याह— **अन्यप्रकारादिति ।** तत्र व्यञ्जनार्थपर्यायाभ्यामपि पर्यायद्वैविध्यम् । तत्र स्थूलः कालान्तरस्थायी शब्दानां सङ्केतविषयो व्यञ्जनपर्यायो गोत्वादिकं, सूक्ष्मवर्त्तमानकालवर्त्यर्थपरिणतिरर्थपर्यायः । इत्थं च भूतत्व–भविष्यत्वसंस्पर्शरहितशुद्धवर्त्तमानकालत्वावच्छिन्नं वस्तुस्वरूपमर्थपर्याय इति । एवं स्वभावपर्याया अगुरुलघुद्रव्यविकाररूपाः । नरनारकादिचतुर्गतिरूपाश्चतुरशीतिलक्षयोनयो वा विभावपर्याया इति । एवमेकत्व–पृथक्त्व–सङ्ख्या-संस्थान–संयोग–विभागादयोऽपि पर्यायविशेषा एव । एवं निरूपिताः सामान्यतः पर्यायाः । विशेषतस्तु एकस्य विधिनिषेधात्मनो घटादिद्रव्यस्य स्वद्रव्यक्षेत्रकालभावैरस्तित्वादीनां परद्रव्यक्षेत्रकालभावैर्नास्तित्वादीनां स्वपर्यायाणां, परपर्यायाणां च पटादिगतास्तित्वनास्तित्वादीनामानन्त्यमेव । ननु पटादिगतास्तित्वादीनां धर्माणां घटगतत्वाभावात् कथं घटपर्यायत्वमिति चेत्, न; परपर्यायाणामज्ञाने तद्व्यावृत्ततया स्वपर्यायाणामवसातुमशक्यत्वेन तज्ज्ञानोपयोगितया घटाऽसम्बद्धानामपि तेषां परपर्यायतया घटपर्यायत्वाभ्युपगमात् । धनादीनां चैत्राद्यसम्बद्धत्वेऽपि तदुपयोगात्तदीयत्वव्यवहारस्य लोकसिद्धत्वात् । इत्थमेव **"एको भावः सर्वथा येन दृष्टः, सर्वे भावाः सर्वथा तेन दृष्टाः"** इति तत्र तत्र सुष्ठूक्तमिति संक्षेपः ॥ इति पर्यायः ॥१४६–१४७॥

तदेवं द्रव्यपर्यायरूपौ पदार्थौ निरूपितौ, अथ ग्रन्थसमाप्तौ मङ्गलादिकमाह—

जयति श्रीजिनो वीरो, यच्छिष्येण सुधर्मणा ।
प्रत्यद्यापि प्रभावाढ्यो, गच्छो निर्ग्रन्थनामकः ॥१४८॥
विबुधैर्विहितावासो, मध्यस्थभावभावितः ।
अनुत्तरस्तपागच्छो, महामेरूपमोऽस्ति यः ॥१४९॥
निर्ग्रन्थगच्छ एवायं, जगच्चन्द्रप्रभोरनु ।
तपागच्छाख्यया लोके, बभूव सुप्रसिद्धिभाक् ॥१५०॥
आचार्यो नेमिसूरीश–स्तद्गच्छाम्भोधिचन्द्रमाः ।
सर्वशास्त्रस्य यो वेत्ता, जेता यः सर्ववादिनाम् ॥१५१॥
यत्पादाम्भोजभक्त्यैव, चरणस्थैर्यमाप्नुवम् ।
दर्शनज्ञानदाता मे, जयत्ययमनुत्तरः ॥१५२॥
तत्पादाब्जप्रभावेण, प्राज्ञवाचोऽनुसृत्य च ।
वाचकोदयशिष्येण, नन्दनाख्येन भिक्षुणा ॥१५३॥
पदार्थकथनं किञ्चित्, कृतं बालसुबोधकृत् ।
परमार्थपरैः प्राज्ञैः, शोध्यं तच्च सुचेतसा ॥१५४॥

संवत्सरे शरहयाङ्कविधुप्रमाण(१९७५) आषाढमाससितपक्षदिने द्वितीये ।
श्रीभाजि राजनगरे नगरप्रधाने, मुक्तावलेर्विरचनप्रथनं प्रपूर्णम् ॥१५५॥

जैनमुक्तावलीं कृत्वा, सुकृतं यन्मयाऽर्जितम् ।
सुखी भवतु लोकोऽयं, तेन पुण्येन हेतुना ॥१५६॥

जयतीत्यादि । स्पष्टमिति ॥ १४८–१५६ ॥

इति जीवभेदादिपर्यायान्तनिरूपणाख्यस्तृतीयः परिच्छेदः ॥

## अथ प्रशस्तिः ॥

वन्दे श्रीस्तम्भनाधीशं, स्तम्भतीर्थे प्रतिष्ठिता ।
दृष्टमात्रापि यन्मूर्त्तिः, कल्पवृक्षातिशायिनी ॥१॥

श्रीतपागच्छपाथोज–भास्वते सूरिचक्रिणे ।
सर्वतन्त्रस्वतन्त्राय, नमः श्रीनेमिसूरये ॥२॥

प्रौढप्रतापिनो यस्य, पादरेणुपवित्रिताः ।
भूमयोऽनेकदेशीया–धर्मार्थानन्दपूरिताः ॥३॥

सिद्धान्ताश्च नयाः कणादकपिलव्यासाक्षपादोद्भवा-
मायासौनवजैमिनीयसमया येनाऽखिला वेदिताः ।
तत्तन्नव्यमहार्थशास्त्ररचनासम्प्राप्तसद्गौरवः
सोऽयं श्रीगुरुनेमिसूरिभगवान् भट्टारको नः श्रिये ॥४॥

तस्य पट्टधरः पूज्यः, सिद्धान्तज्ञशिरोमणिः ।
विजयोदयसूरीश–स्तस्य पट्टभृता मया ॥५॥

श्रीमतां नेमिसूरीणां, पादसेवाप्रभावतः ।
सूरिणा नन्दनेनेयं, तत्त्वकल्पलता कृता ॥६॥

स्तम्भतीर्थपुरे वेद–गजाङ्केन्दुमिताब्दके । (१९८४)
चैत्रकृष्णद्वितीयायां, शनौ पूर्णीकृता शुभे ॥७॥

जैनमुक्तावलीटीकां, कृत्वैनां यदुपार्जितम् ।
सुपुण्यमत्र तेनास्तु, सर्वलोकः सुखी सदा ॥८॥

इति श्रीमहावीरप्रभुशासनोद्धरणधुरीण–यथावस्थिततत्त्वप्रणयनप्रवीण–विशुद्धधीसाम्राज्यविद्वद्वृन्दवन्द्यपवित्रचरणयुगल – कलिकालात्महिताद्वितीयसाधन श्रीशत्रुञ्जय–रैवत – सम्मेतशिखरप्रभृत्यनेकमहापवित्रतीर्थसंरक्षणैकपरायण–प्रथितानेकभव्यसत्त्वोपकारक–तत्त्वप्रभा –न्यायप्रभा–प्रतिमामार्त्तण्डा–ऽनेकान्ततत्त्वमीमांसा–न्यायसिन्धु–सप्तभङ्ग्युपनिषद् – बृहल्लघुपरमलघुहेमप्रभाद्यनेकग्रन्थ–श्रीभगवत्याद्यनेकयोगोद्वहनविद्यापीठादिप्रस्थानपञ्चकसूरिमन्त्रसमाराधनपूर्वकप्राप्तसूरिपद–श्रीसर्वतन्त्रस्वतन्त्र–शासनसम्राट् – सूरिचक्रचक्रवर्ति–जगद्गुरु–तपागच्छाधिपति–भट्टारकाचार्य **श्रीमद्विजयनेमिसूरि**भगवत्साम्राज्ये तत्पट्टपूर्वाचलभास्कर–पूज्यचरण–सिद्धान्तवाचस्पतिन्यायविशारदाचार्यप्रवर **श्रीविजयोदयसूरि**पट्टालङ्कार**श्रीविजयनन्दनसूरि**विरचिता **श्रीतत्त्वकल्पलतानाम्नी श्रीजैनमुक्तावलीटीका ॥**

**श्रीरस्तु ॥**

卐

# परिशिष्टानि

# परिशिष्टम् १

## श्रीजैनतर्कसङ्ग्रहः ॥

### ( सूत्रपाठः । )

श्रीनाभेयं नमस्कृत्य, नेमिसूरिं जगद्गुरुम् ।

तन्यते बालबोधाय जैनोऽयं तर्कसङ्ग्रहः ॥१॥

देवगुरुधर्मास्तत्त्वम् ॥१॥

रागद्वेषाज्ञानविनिर्मुक्तोऽर्हन् देवः । स सकलभावसाक्षात्कारी तीर्थप्रणेता चतुस्त्रिंशदतिशयशाली ॥२॥

सम्यग्भावप्ररूपकः पञ्चमहाव्रतधारी गुरुः ॥३॥

द्रव्यगुणपर्याया भावाः ॥४॥

गुणपर्यायवद् द्रव्यम् । द्रव्याश्रिता निर्गुणाः गुणाः । उभयाश्रिताः पर्यायाः ॥५॥

**परे तु, द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावाः सप्त पदार्थाः । तत्र द्रव्यगुणौ वक्ष्येते । उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनभेदात् कर्म पञ्चधा । नित्यमनेकसमवेतं सामान्यं, द्रव्यगुणकर्मवृत्ति, परमपरं चेति तद् द्विधा । परं सत्ता, अपरं द्रव्यत्वादि । नित्यद्रव्यवृत्तयो व्यावर्त्तका विशेषा अनन्ताः । नित्यसम्बन्धः समवाय एक एव, अयुतसिद्धवृत्तिः । अभावश्चतुर्विधः–प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्च । तत्राऽनादिः सान्तः प्रागभावः । सादिरनन्तो ध्वंसः । तादात्म्यभिन्न-सम्बन्धावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः । तादात्म्यसम्बन्धावच्छि-न्नप्रतियोगिताकोऽन्योन्याभाव इति ॥**

तन्न, यथायथं यथोक्तभावेष्वन्तर्भावात् । किञ्चाऽवयवावयविनोः गुण-गुणिनोः क्रियाक्रियावतोश्च भेदाभेद एव सम्बन्धः । अभावश्चाऽधिकरणात्मक एवेति । तत्र, यन्निवृत्तावेव कार्यस्य समुत्पत्तिः सोऽस्य प्रागभावः, यथा घटस्य

मृत्पिण्डः । यदुत्पत्तौ कार्यस्याऽवश्यं विपत्तिः सोऽस्य प्रध्वंसाभावः, यथा कलशस्य कपालकदम्बकम् । स्वरूपान्तरात् स्वरूपव्यावृत्तिरितरेतराभावः, यथा स्तम्भस्वभावात् कुम्भस्वभावव्यावृत्तिः । कालत्रयापेक्षिणी तादात्म्यपरिणामनिवृत्तिरत्यन्ताभावः, यथा चेतनाचेतनयोः ॥६॥

धर्माधर्माकाशजीवपुद्गलकाला द्रव्याणि ॥७॥

गत्युपष्टम्भको धर्मास्तिकायः । स्थित्युपष्टम्भकोऽधर्मास्तिकायः । अवगाहस्वभाव आकाशः । उपयोगलक्षणो जीवः । ग्रहणगुणः पुद्गलः । वर्तनालक्षणः कालः ॥८॥

**परे तु, पृथिव्यप्तेजोवाय्वाकाशकालदिग्देहिमनांसि द्रव्याणि । गन्धवत्त्वं शीतस्पर्शवत्त्वमुष्णस्पर्शवत्त्वमपाकजानुष्णाशीतस्पर्शवत्त्वं शब्दसमवायिकारणत्वं अतीतादिव्यवहारहेतुता प्राच्यादिव्यवहारहेतुता ज्ञानवत्त्वं सुखादिसाक्षात्कारहेतुतेति क्रमात्तेषां लक्षणानि । पृथिव्यादयश्चत्वारो नित्या अनित्याश्च । नित्याः परमाणुरूपा अनित्या द्व्यणुकादिरूपाः । ते च शरीरेन्द्रियविषयभेदात् त्रिधा । पृथिव्यां शरीरं योनिजमयोनिजं च मनुजकृम्यादीनाम् । इन्द्रियं घ्राणं । विषयः पाषाणादिः । जले शरीरमयोनिजं वरुणलोके । इन्द्रियं रसनं, विषयः सरिदादिः । तेजसि शरीरं प्राग्वत्, तच्च सूर्यलोके । इन्द्रियं चक्षुः । विषयो वह्निसुवर्णादिः । वायौ शरीरं प्राग्वत्, तच्च वायुलोके । इन्द्रियं त्वक् । विषयः प्राणादिः । आकाशे इन्द्रियं श्रोत्रं । आत्मा जीवात्मा परमात्मा च । आद्यः प्रत्यङ्गं भिन्नः । द्वितीयः सर्वत एक एव नित्यज्ञानेच्छाकृतिमान् । आकाशाद्यो विभवो नित्याश्च । मनोऽणुरूपं नित्यमनन्तं चेति ॥**

तन्न, पृथिव्यप्तेजोवायुमनसां पुद्गलस्वरूपाऽनतिरेकात् पुद्गलत्वप्रतीतेः सर्वत्राविशिष्टत्वात् । किञ्च य एव पुद्गलाः पृथिवीत्वादिना परिणतास्त एव जलत्वादिनाऽपि परिणमन्ति, य एव च जलत्वादिना परिणतास्त एव पृथिवी-

त्वादिनाऽपि परिणमन्तीति । अन्यथा पटसुवर्णादीनामपि द्रव्यभेदापत्तेः । दिक् च नभःप्रदेशपङ्क्तिरूपैवेति नातिरिच्यते ॥९॥

जीवपुद्गलाः सक्रियाः शेषाण्यक्रियाणि ॥१०॥

आकाशादेकद्रव्याणि । जीवपुद्गलकाला अनन्तानि ॥११॥

रूपिणः पुद्गलाः । शेषाण्यरूपीणि ॥१२॥

तानि च दशधा—धर्मास्तिकायस्तद्देशस्तत्प्रदेशः । अधर्मास्तिकायस्तद्देशस्तत्प्रदेशः । आकाशास्तिकायस्तद्देशस्तत्प्रदेशः । अद्धा समयश्च । निर्विभागत्वाच्चास्य न देशप्रदेशसम्भवः । सकलदेशप्रदेशानुगतसमानपरिणतिमद्विशिष्टं द्रव्यमस्तिकायः । तस्य सांशो भागस्तद्देशः । निरंशो भागस्तत्प्रदेशः ॥१३॥

धर्माधर्मौ लोकपरिमाणावङ्ख्येयप्रदेशकौ ॥१४॥

आकाशं लोकालोकभेदाद् द्विविधम् । तल्लक्षणं त्विदं—धर्मादीनां वृत्तिर्द्रव्याणां भवति यत्र तत् क्षेत्रम् । तैर्द्रव्यैः सह लोकस्तद्विपरीतं ह्यलोकाख्यम् । प्रदेशा लोकस्याऽसङ्ख्याताः, अलोकस्याऽनन्ताः ॥१५॥

जीवा द्विधा मुक्ताः संसारस्थाश्च ॥१६॥

तत्र मुक्ताः जिनाजिनतीर्थातीर्थस्वयंबुद्धप्रत्येकबुद्धबुद्धबोधितनपुंसकस्त्रीपुंलिङ्गगृह्यन्यस्वलिङ्गैकानेकेतिप्ररूपणाभेदात् पञ्चदशधा । मुक्तिः कर्मक्षयः परमानन्दो वा । न त्वात्यन्तिको दुःखध्वंसो दुरितध्वंसो वा, तस्याऽपुरुषार्थत्वात् ॥१७॥

ज्ञानदर्शनावरणवेद्यमोहनीयायुर्नामगोत्रान्तरायभेदादष्टधा कर्म, कार्मणवर्गणानिष्पन्नं पौद्गलिकम् ॥१८॥

औदारिकवैक्रियाहारकतैजसभाषोच्छ्वासमनःकार्मणाभिधा वर्गणाः॥१९॥

प्रत्येकमभव्यानन्तगुणसिद्धानन्तभागकल्पपरमाणुस्कन्धनिष्पन्नाः ॥२०॥

उत्तरोत्तरमनन्तगुणाः ॥२१॥

संसारस्था द्विधा—स्थावराश्च त्रसाश्च ॥२२॥

द्वितयेऽपि द्विधा पर्याप्ताऽपर्याप्तभेदात् ॥ पर्याप्तिश्चाहारादिग्रहणपरिणमनादिहेतुरात्मनः शक्तिविशेषः । आहारशरीरेन्द्रियप्राणभाषामनोभेदात् सा षड्विधा । ताश्चैकाक्षविकलाक्षपञ्चाक्षाणां क्रमाच्चतस्रः पञ्च षट् च ॥२३॥

स्थावरा एकेन्द्रियास्ते च पृथिव्यप्तेजोवायुवनस्पतयः । तत्र वनस्पतयः प्रत्येकाः साधारणाश्च । प्रत्येका बादरा एव । साधारणाः पृथिव्यप्तेजोवायवश्च सूक्ष्मबादरभेदाद् द्विधा ॥२४॥

त्रसा द्वित्रिचतुःपञ्चेन्द्रियत्वेन चतुर्विधाः । द्वीन्द्रियाः कृमिशङ्खाद्याः । त्रीन्द्रिया यूकामत्कुणादयः । चतुरिन्द्रिया दंशमक्षिकादयः । पञ्चेन्द्रिया नारकतिर्यग्मनुष्यदेवाः ॥२५॥

तत्र नारका रत्नशर्करावालुकापङ्कधूमतमस्तमःप्रभाभेदात् सप्तधा । तिर्यञ्चो जलचरस्थलचरखेचरभेदाच्च त्रिधा । प्रत्येकं तेऽपि सम्मूर्च्छिमा गर्भजाश्च । तत्र गर्भजा जरायुपोताण्डभवाः । मनुष्याः सम्मूर्च्छिमगर्भजभेदेन द्विविधाः । अत्र गर्भजा जरायुजा एव । देवा भवनपतिव्यन्तरज्योतिष्कवैमानिकभेदाच्चतुर्धा । देवनारकगर्भजाः संज्ञिनः, शेषा असंज्ञिनः ॥२६॥

स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रमितीन्द्रियम् । तस्य स्पर्शो रसो गन्धो रूपं शब्दश्च गोचरः ॥२७॥

प्रदेशाश्चैकैकजीवस्य धर्माधर्मलोकाकाशप्रमिताः । अयं च गमनागमनात् सक्रियः शरीरमात्रः स्वसंविदितश्च ॥२८॥

स्वपरव्यवसायि संवेदनं प्रमाणम् ॥२९॥

प्रमेयाऽव्यभिचारित्वं प्रामाण्यं, तदितरत्त्वप्रामाण्यं; तदुभयमुत्पत्तौ परत एव, ज्ञप्तौ तु स्वतः परतश्च ॥३०॥

तद् द्विविधं- प्रत्यक्षं च परोक्षं च ॥३१॥

**न तु प्रत्यक्षानुमानोपमानशब्दभेदाच्चतुर्धा । अनुमानादीनां परोक्षेऽन्तर्भावात् ॥३२॥**

स्पष्टं प्रत्यक्षम् ॥३३॥

तद् द्विधा-सांव्यवहारिकं पारमार्थिकं च। सांव्यवहारिकमिन्द्रियापेक्षं पारमार्थिकमुत्पत्तावात्ममात्रापेक्षम् ॥३४॥

तत्राद्यं द्विविधमिन्द्रियनिबन्धनमनिन्द्रियनिबन्धनं च। तत्राद्यं स्पार्शनरासन-घ्राणजचाक्षुषश्रावणभेदात् पञ्चधा। अन्त्यं मानसम् ॥३५॥

तद्द्वयं अवग्रहेहापायधारणाभेदादेकशश्चतुर्धा ॥३६॥

विषयविषयिसन्निपातानन्तरसमुद्भूतसत्तामात्रगोचरदर्शनाज्जातमाद्यमवान्तर-सामान्याकारविशिष्टवस्तुग्रहणमवग्रहः। अवगृहीतार्थविशेषाकांक्षणमीहा। ईहित-विशेषनिर्णयोऽवायः। स एव दृढतमावस्थापन्नो धारणा ॥३७॥

पारमार्थिकं विकलं सकलं च ॥३८॥

विकलमवधिमनःपर्यायभेदाद् द्विधा। अवधिज्ञानावरणकर्मक्षयोपशमसमुद्भवं भवगुणप्रत्ययं रूपिविषयकमाद्यम्। द्वितीयं संयमविशुद्धिनिबन्धनतदावरणक्षयो-पशमसमुद्भवं मनोविषयकम् ॥३९॥

सकलं समस्तावरणक्षयापेक्षं निखिलभावसाक्षात्कारिस्वरूपं केवल-ज्ञानम् ॥४०॥

**एतेन इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षं तन्निर्विकल्पकं सविक-ल्पकं चेति। पुनस्तद् घ्राणजादिभेदेन षड्विधं। सन्निकर्षश्च द्रव्यप्रत्यक्षे संयोगः। द्रव्यसमवेतगुणकर्मजातिप्रत्यक्षे संयुक्तसमवायः। द्रव्यसम-वेतसमवेतजातिप्रत्यक्षे संयुक्तसमवेतसमवायः। शब्दप्रत्यक्षे समवायः। शब्दसमवेतप्रत्यक्षे समवेतसमवायः। अभावप्रत्यक्षे विशेषणविशेष्यभावः इति निरस्तम्। सन्निकर्षस्यैवाऽप्रामाणिकत्वात् ॥४१॥**

इति श्री जैनतर्कसङ्ग्रहे प्रत्यक्षखण्डः ॥

卐

## अथ परोक्षखण्डः ॥

अस्पष्टं परोक्षम् ॥४२॥

स्मरणप्रत्यभिज्ञानतर्कानुमानागमभेदतस्तत्पञ्चप्रकारम् ॥४३॥

तत्र संस्कारप्रबोधसम्भूतमनुभूतार्थविषयं तदित्याकारं संवेदनं स्मरणं, यथा तत्तीर्थंकरबिम्बमिति ॥४४॥

अनुभवस्मृतिहेतुकं सङ्कलनात्मकं ज्ञानं प्रत्यभिज्ञानं, यथा गोसदृशो गवयः, स एवायं जिनदत्त इत्यादि ॥४५॥

उपलम्भानुपलम्भसम्भवं त्रिकालीकलितसाध्यसाधनसम्बन्धाद्यालम्बनमिद-मस्मिन् सत्येव भवतीत्याद्याकारं संवेदनमूहापरनामा तर्कः, यथा यावान् कश्चिद् धूमः स सर्वो वह्नौ सत्येव भवतीति तस्मिन्नसत्यसौ न भवत्येवेति ॥४६॥

अनुमानं द्विधा—स्वार्थं परार्थं च। तत्र हेतुग्रहणसम्बन्धस्मरणकारणकं साध्यविज्ञानं स्वार्थम्। तथाहि, यः पूर्वं भूयः सहचारदर्शनादिना यत्र यत्र धूमस्तत्र तत्राग्निरिति महानसादौ व्याप्तिं गृहीतवान्, स कदाचित् पर्वतसमीपं गतः पर्वते धूमं पश्यन् व्याप्तिं स्मरति,—यावान् कश्चिद् धूमः स सर्वो वह्नौ सत्येव भवतीति तदनन्तरं पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते। तदेतत् स्वार्थानुमानम्। **न तु मध्ये वह्निव्याप्यधूमवान् अयं पर्वत इतिज्ञानात्मक-परामर्शस्यावश्यकत्वम्** ॥४७॥

**एतेन परामर्शजन्यज्ञानमनुमितिः, लिङ्गपरामर्शोऽनुमानं, व्याप्ति-विशिष्टपक्षधर्मताज्ञानं परामर्शः, व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मत्व-मित्यपास्तम्** ॥४८॥

निश्चितान्यथानुपपत्त्येकलक्षणो हेतुः। स द्विधा—उपलब्ध्यनुपलब्धिभ्यां भिद्यमानत्वात्। तत्रोपलब्धिर्द्विधा—अविरुद्धोपलब्धिर्विरुद्धोपलब्धिश्च। यथा अस्त्यत्र गिरिनिकुञ्जे धनञ्जयो धूमसमुपलम्भादिति; न विद्यतेऽस्य क्रोधाद्युप-शान्तिर्वदनविकारादेरिति च। अनुपलब्धिरपि द्विधा—अविरुद्धानुपलब्धिर्विरुद्धानु-

पलब्धिश्च । यथा नास्त्यत्र भूतले कुम्भः उपलब्धिलक्षणप्राप्तस्य तत्स्वभावस्याऽनुपलम्भात्; वस्तुजातमनेकान्तात्मकमेकान्तस्वभावानुपलम्भादिति च ॥४९॥

अप्रतीतमनिराकृतमभीप्सितं साध्यम् ॥५०॥

पक्षहेतुवचनात्मकं परार्थानुमानम् । साध्यविशिष्टो धर्मी पक्षः । हेतुप्रयोगस्तथोपपत्त्यन्यथानुपपत्तिभ्यां द्विप्रकारः । यथा कृशानुमानयं पाकप्रदेशः सत्येव कृशानुमत्त्वे धूमवत्त्वस्योपपत्तेरसत्यनुपपत्तेर्वा । क्वचित् पञ्चावयववाक्यप्रयोगोऽपि ॥५१॥

**परेषां तु पञ्चावयववाक्यमेव परार्थानुमानम् । तथा हि, पर्वतो वह्निमान्, धूमवत्त्वात्, यो यो धूमवान् स स वह्निमान् यथा महानसं, तथा चायं, तस्मात्तथा ।**

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः । हेतुस्त्रिविधः, अन्वयव्यतिरेकी केवलान्वयी केवलव्यतिरेकी च । तत्रान्वयेन व्यतिरेकेण च व्याप्तिमान् आद्यः, यथा वह्नौ साध्ये धूमवत्त्वम् । अन्वयमात्रव्याप्तिको द्वितीयो, यथा घटोऽभिधेयः प्रमेयत्वात् । व्यतिरेकमात्रव्याप्तिकस्तृतीयो, यथा पृथ्वी इतरेभ्यो भिद्यते गन्धवत्त्वादिति ॥५२॥

असिद्धविरुद्धानैकान्तिकास्त्रयो हेत्वाभासाः ॥५३॥

यस्यान्यथानुपपत्तिः प्रमाणेन न प्रतीयते सोऽसिद्धः । स द्विविधः, उभयासिद्धोऽन्यतरासिद्धश्च । आद्यः–शब्दः परिणामी चाक्षुषत्वात् । द्वितीयः–तरवोऽचेतना मरणरहितत्वात् ॥५४॥

साध्यविपर्ययेणैव यस्यान्यथानुपपत्तिरध्यवसीयते स विरुद्धः । यथा नित्य एव पुरुषोऽनित्य एव वा प्रत्यभिज्ञानादिमत्त्वात् ॥५५॥

यस्याऽन्यथानुपपत्तिः सन्दिह्यते सोऽनैकान्तिकः ॥ स द्वेधा–निर्णीतविपक्षवृत्तिकः सन्दिग्धविपक्षवृत्तिकश्च । आद्यः–शब्दो नित्यः प्रमेयत्वात् । द्वितीयः–विवादापन्नः पुरुष सर्वज्ञो न भवति, वक्तृत्वात् । ॥५६॥

परे तु, सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः। साधारणाऽसाधारणाऽनुपसंहारिभेदादनैकान्तिकस्त्रिधा। तत्र साध्याभाववद्वृत्तिः साधारणो यथा पर्वतो वह्निमान् प्रमेयत्वात्। सपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणो यथा शब्दो नित्यः शब्दत्वात्। अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी यथा सर्वमभिधेयं प्रमेयत्वात्। साध्यव्यापकीभूताऽभावप्रतियोगी हेतुर्विरुद्धो यथा शब्दो नित्यः कृतकत्वात्। साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षो यथा शब्दो नित्यः श्रावणत्वात्, शब्दोऽनित्यः कार्यत्वात्। असिद्धस्त्रिविधः—आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्च। आद्यः—गगनारविन्दं सुरभि अरविन्दत्वात्। द्वितीयः शब्दो गुणश्चाक्षुषत्वात्। सोपाधिको हेतुर्व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः। यथा पर्वतो धूमवान् वह्निमत्त्वादित्यत्र आर्द्रेन्धनसंयोग उपाधिः सोपाधिकत्वाच्च वह्निमत्त्वं व्याप्यत्वासिद्धम्। यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितो यथा वह्निरनुष्णो द्रव्यत्वादिति॥

तन्न, सत्प्रतिपक्षबाधयोरतिरिक्तहेत्वाभासत्वे मानाभावात्॥५७॥

आप्तवचनादाविर्भूतमर्थसंवेदनमागमः। आप्तवचनं तूपचारात्॥५८॥

अभिधेयं वस्तु यथावस्थितं यो जानीते यथाज्ञातं चाभिधत्ते स आप्तः। स द्विधा—लौकिको लोकोत्तरश्च। आद्यो जनकादिर्द्वितीयस्तु तीर्थकृदादिः॥५९॥

वर्णपदवाक्यात्मकं वचनम्॥६०॥

स्वाभाविकसामर्थ्यसमयाभ्यामर्थबोधनिबन्धनं शब्दः। न त्वस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छा शक्तिरिति। मानाभावात्॥६१॥

सर्वत्रायं ध्वनिर्विधिप्रतिषेधाभ्यां स्वार्थमभिदधानः सप्तभङ्गीमनुगच्छति। तद्यथा—१ स्यादस्त्येव सर्वमिति विधिकल्पनया प्रथमो भङ्गः। २ स्यान्नास्त्येव सर्वमिति निषेधकल्पनया द्वितीयः। ३ स्यादस्त्येव स्यान्नास्त्येवेति क्रमतो विधिनिषेधकल्पनया तृतीयः। ४ स्यादवक्तव्यमेवेति युगपद्विधिनिषेधकल्पनया

चतुर्थः। ५ स्यादस्त्येव स्यादवक्तव्यमेवेति विधिकल्पनया युगपद्विधिनिषेधकल्पनया च पञ्चमः। ६ स्यान्नास्त्येव स्यादवक्तव्यमेवेति निषेधकल्पनया युगपद्विधिनिषेधकल्पनया च षष्ठः। ७ स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेवेति क्रमतो विधिनिषेधकल्पनया युगपद्विधिनिषेधकल्पनया च सप्तमः॥ तत्र स्यात्–कथञ्चित् स्वद्रव्यक्षेत्रकालभावरूपेणाऽस्त्येव सर्वं कुम्भादि, न पुनः परद्रव्यक्षेत्रकालभावरूपेण। तथाहि–कुम्भो द्रव्यतः पार्थिवत्वेनाऽस्ति, नाऽऽप्यादिरूपत्वेन। क्षेत्रतः पाटलिपुत्रकत्वेन, न कान्यकुब्जादित्वेन। कालतः शैशिरत्वेन, न वासन्तिकादित्वेन। भावतः श्यामत्वेन, न रक्तादित्वेन। अन्यथेतररूपापत्त्या स्वरूपहानिप्रसङ्ग इति। अवधारणं चात्र भङ्गेऽनभिमतार्थव्यावृत्त्यर्थमुपात्तम्। इतरथाऽनभिहिततुल्यतैवास्य वाक्यस्य प्रसज्ज्येत, प्रतिनियतस्वार्थाऽनभिधानात्। तथाप्यस्त्येव कुम्भ इत्येतावन्मात्रोपादाने कुम्भस्य स्तम्भाद्यस्तित्वेनापि सर्वप्रकारेणाऽस्तित्वप्राप्तेः प्रतिनियतस्वरूपानुपपत्तिः स्यात्। तत्प्रतिपत्तये 'स्याद्' इति शब्दः प्रयुज्यते। स्यात्–कथञ्चित् स्वद्रव्यादिभिरेवायमस्ति न परद्रव्यादिभिरपीत्यर्थः॥६२॥

एकत्र वस्तुन्येकैकधर्मपर्यनुयोगवशादविरोधेन व्यस्तयोः समस्तयोश्च विधिनिषेधयोः कल्पनया स्यात्काराङ्कितः सप्तधा वाक्प्रयोगः सप्तभङ्गी॥६३॥

प्रमाणपरिच्छिन्नस्यानन्तधर्मात्मकस्य वस्तुनः एकदेशग्राहिणस्तदितरांशाऽप्रतिक्षेपिणोऽध्यवसायविशेषा नयाः। नैगमसंग्रहव्यवहारर्जुसूत्रशब्दसमभिरूढैवम्भूताः सप्त॥६४॥ प्रमाणैकदेशत्वाच्चैषां ततो भेदः॥६५॥ अत्र संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिस्तत्करणं सादृश्यज्ञानं उपमानमिति तु प्रत्यभिज्ञानान्तर्भावादेव न पृथगिति॥६६॥

इति जैनतर्कसंग्रहे परोक्षखण्डः॥

कृष्णनीलरोहितपीतशुक्ला वर्णाः। तिक्तकटुकषायाम्लमधुरा रसाः। दुरभ्यसुरभी गन्धौ। शीतोष्णस्निग्धरूक्षगुरुलघुकर्कशमृदवः स्पर्शाः। छायाऽऽतपोद्योतशब्दादयः पुद्गलपरिणामा एव॥६८॥

स्कन्धदेशप्रदेशपरमाणुभेदाच्च पुद्गलश्चतुर्धा । तत्र परमाणुरप्रदेशः ॥६९॥

वर्त्तनालक्षणः कालः । नवपुराणादिपरिणामा वर्त्तना । आवलिकादयश्च व्यवहारार्थं कल्प्यन्ते ॥७०॥

इति श्री जैनतर्कसङ्ग्रहे द्रव्यखण्डः ॥

पर्यायो द्विविधः, क्रमभावी सहभावी च ॥७१॥

तत्र सहभाविपर्याया गुणा, यथाऽऽत्मनो विज्ञानव्यक्तिशक्त्यादयः । क्रमभाविनः पर्यायास्त्वात्मनः, यथा सुखदुःखशोकहर्षादयः ॥७२॥

पर्याया अपि स्वभावविभावाभ्यां द्रव्यगुणाभ्यां च चतुर्भेदाः । तथा हि स्वभावद्रव्यव्यञ्जनपर्यायश्चरमशरीरात् किञ्चिन्न्यूनसिद्धपर्यायः । स्वभावगुणव्यञ्जनपर्याया यथा जीवस्यानन्तचतुष्टयरूपाः । विभावद्रव्यव्यञ्जनपर्याया गत्यादयः । विभावगुणव्यञ्जनपर्याया मत्यादयः ॥ पुद्गलस्यापि द्व्यणुकादयो विभावद्रव्यव्यञ्जनपर्यायाः । रसरसान्तरगन्धगन्धान्तरादयो विभावगुणव्यञ्जनपर्यायाः । अविभागिपुद्गलपरमाणवः स्वभावद्रव्यव्यञ्जनपर्यायाः । वर्णगन्धरसैकैकाऽविरुद्धस्पर्शद्वये च स्वभावगुणव्यञ्जनपर्यायाः । एवमेकत्वपृथक्त्वसंख्यासंस्थानसंयोगविभागादयोऽपि पर्यायाः ॥ एवं सकलव्यक्त्यनुगतं सत्त्वं व्यञ्जनपर्यायः । प्रतिव्यक्त्यनुगतं चार्थपर्यायः । उत्पादव्ययध्रौव्ययोगात्मकं च सत् ॥७३॥

**परे तु रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वाऽपरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिर्गुणाः । रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च, अन्यत्रापाकजं नित्यमनित्यं च । परिमाणमणु महद् दीर्घं ह्रस्वं च । परत्वापरत्वे दिक्कृते कालकृते च । द्रवत्वं सांसिद्धिकं नैमित्तिकं च । शब्दो ध्वन्यात्मको वर्णात्मकश्च । बुद्धिः स्मृतिरनुभवश्च । अनुभवो यथार्थोऽयथार्थश्च । प्रत्यक्षानुमित्युपमितिशाब्दभेदाच्चतुर्विधोऽपि । तत्करणमपि चतुर्धा । (असाधारणं कारणं करणम् ।) समवाय्यसमवायि**

निमित्तभेदात् कारणं त्रिविधम् । संशयविपर्ययतर्कभेदादयथार्थानुभवस्त्रिधा । प्रयत्नः प्रवृत्तिनिवृत्तिजीवनयोनिभेदात् त्रिधा । संस्कारो वेगो भावना स्थितिस्थापकश्च । तत्र "वायोर्नवैकादश तेजसो गुणा जलक्षितिप्राणभृतां चतुर्दश । दिक्कालयोः पञ्च षडेव चाम्बरे, महेश्वरेऽष्टौ मनसस्तथैव च ।।" इति ।।

तन्न, यथायथं पर्यायादिष्वन्तर्भावात् ।।७४।।

इति पर्यायखण्डः ।।

महाव्रतानि पञ्च, प्राणातिपातमृषावादाऽदत्तादानमैथुनपरिग्रहविरतिरूपाणि ।।७५।।

प्राणातिपातादयः प्रत्येकं मनोवचःकायभेदात् करणकारणानुमतिभेदाच्च नवधा । ते चाश्रवाः । तद्विरतिः संवरः ।।७६।।

धर्मोऽहिंसा संयमस्तपः ।।७७।।

गृहिधर्मः साधुधर्मश्चेति द्विधा ।।७८।।

गृहिणां देशतो विरतिः साधूनां सर्वतः ७९।।

तत्त्वश्रद्धानं सम्यग्दर्शनं शमाद्यभिव्यङ्ग्यः शुभात्मपरिणामः ।।८०।।

औपशमिकं क्षायोपशमिकं क्षायिकमिति तत् त्रिधा ।।८१।।

तत्प्रागवस्थो बहिरात्मा । तद्वान् अन्तरात्मा प्राक्कैवल्यात् । केवली परमात्मा ।।८२।।

तत्रान्तरात्मा ध्याता । परमात्मा ध्येयः । ऐकाग्र्यसंवित्तिर्ध्यानम् । ध्येयैकता समापत्तिः ।।८३।।

ज्ञानपूर्वककर्मयोगाद् ध्यानयोगः । ध्यानयोगान्मुक्तियोगः ।।८४।।

इति धर्मनिरूपणान्तः खण्डः ।।

श्रीमद्वीरजिनो जीयात् , सल्लब्धिर्गौतमः प्रभुः ।
यद्वचःसुधया सिक्ता विबुधा अमराः सदा ॥१॥
साम्राज्यं यस्य प्रौढप्रकटमहिमसज्ज्ञानकर्मप्रधानं,
स्याद्वादाध्यात्मरम्या मितिनयविशदा शुद्धभावा च वाणी ।
सोऽयं प्रोद्दामधामा परमगुणनिधिः सर्वतन्त्रस्वतन्त्रः,
स्वप्ने वा जागरे वा शरणमनुदिनं नेमिसूरिर्ममास्तु ॥२॥
श्रीतपागच्छराजस्य तस्य पट्टनभोमणिः ।
विजयोदयसूरीशः तस्य पट्टभृता मया ॥३॥
गुप्त्यष्टाङ्केन्दुवर्षे श्रीवीरकैवल्यवासरे ।
सूरिणा नन्दनेनायं निर्मितस्तर्कसङ्ग्रहः ॥४॥

इति श्रीसर्वतन्त्रस्वतन्त्र शासनसम्राट् सूरिचक्रचक्रवर्त्ति जगद्गुरु श्रीप्रज्ञप्त्यादिसकलयोगोद्वहनसूरिमन्त्रसमाराधनपूर्वकप्राप्तसूरिपद विद्यापीठादि-प्रस्थानपञ्चकसमाराधक श्रीशत्रुञ्जयादिमहापवित्रतीर्थसंरक्षणपरायण ग्रथित न्यायव्याकरणाद्यनेकग्रन्थसन्दर्भ तपागच्छाधिराज भट्टारकाचार्यवर्य**श्रीमद्विजय-नेमिसूरि**भगवत्पट्टालङ्कार सिद्धान्तवाचस्पति न्यायविशारद **विजयोदयसूरि-**पट्टालङ्कार **विजयनन्दनसूरिणा** विरचितः **श्रीजैनतर्कसङ्ग्रहः ॥**

लिखितश्चायं ग्रन्थः वस्वष्टाङ्केन्दुप्रमिते वैक्रमसंवत्सरे मृगशीर्षासितपक्षपञ्चम्यां श्रीगोधावीनगरे श्री जयतारण वास्तव्य दीपचन्द्रसूनुशिवराजनाम्ना लेखकेन ॥ शुभं भूयात् ॥ ॐ ॥ श्रीः ॥

# परिशिष्टम् २

## श्रीजैनमुक्तावली-मूलकारिकाः ॥

प्रणमामि महावीरं, चरमं तीर्थनायकम् ।
सच्चिदानन्दसम्पूर्णं, भव्याभीष्टार्थदायकम् ॥१॥
वन्दे श्रीगौतमं देवं, देवतासङ्घसेवितम् ।
निःशेषलब्धिसम्पन्नं, प्रथमं गणनायकम् ॥२॥
श्रीमच्छ्रमणसङ्घस्या-धीश्वरं योगशालिनम् ।
परमप्रौढसाम्राज्यं, नेमिसूरिं प्रणौमि तम् ॥३॥
सूरेर्भगवतस्तस्य, पादसेवानुभावतः ।
जैनमुक्तावली काचिद् , विधियाऽपि विरच्यते ॥४॥
द्रव्यपर्यायभेदेना-ऽनेकभेदसमन्वितौ ।
सत्पदार्थौ समाख्यातौ, कृत्स्नभावप्रकाशिभिः ॥५॥
धर्माऽधर्मनभोजीव-पुद्गलानेहसस्तथा ।
द्रव्याणि गुणपर्याय-वत्त्वं तत्त्वमुदाहृतम् ॥६॥
गत्युपकारकोऽसङ्ख्य-प्रदेशोऽरूपिनिष्क्रियः ।
एकद्रव्यं समाख्यातो, धर्मो धर्मोपदर्शिभिः ॥७॥
तथैवाऽधर्म आदिष्टः, परं स्थित्युपकारकः ।
अवगाहद आकाशो, वस्तूनामवगाहिनाम् ॥८॥
अनन्तोऽयं प्रदेशैश्च, लोकालोकविभागभाक् ।
तदसङ्ख्येयभागादि-ष्वात्मनामवगाहना ॥९॥
आसमस्ताच्च लोकात् सा-ऽजीवानां त्ववगाहना ।
मूर्त्तामूर्त्तप्रभेदेन, द्विविधाप्यवगाहना ॥१०॥
एकप्रदेशमुख्येष्व-प्युक्ताऽन्या तत्र सर्वतः ।
प्रदेशानां हि संहार-विसर्गौ स्तः प्रदीपवत् ॥११॥

एवं जीवोऽपि विज्ञेयो—विशेषस्तूपदर्श्यते ।
अविभुः सक्रियश्चाथा—नेकद्रव्यं वपुर्मितः ॥१२॥
चिह्नं चास्योपयोगः स, साकारेतरभेदतः ।
द्विविधः स यथासङ्ख्यं, पुनश्चाष्टचतुर्विधः ॥१३॥
मतिश्रुतावधिमनः—पर्ययकेवलानि हि ।
मत्यज्ञानं श्रुताज्ञानं, विभङ्गज्ञानमेव च ॥१४॥
इत्यष्टधा चतुर्धा च श्रूयतामत्र कथ्यते ।
चक्षुरचक्षुरवधि—केवलदर्शनं तथा ॥१५॥
मतिश्चतुर्विधोक्ताव—ग्रहेहापायधारणाः ।
तत्र चावग्रहो द्वैधं, व्यञ्जनार्थप्रभेदतः ॥१६॥
ईहाप्रभृतयस्तु स्यु—र्थर्थस्यैवाववग्रहः ।
स्पर्शजिह्वाघ्राणकर्ण—प्रभेदेन चतुर्विधः ॥१७॥
चक्षुर्मनोविधाधिक्यात्, षोढाऽर्थावग्रहादयः ।
द्वादशधा पुनः सर्वे, प्रत्येकं परिकीर्तिताः ॥१८॥
बहुबहुविधक्षिप्रा—ऽनिश्रितनिश्रितध्रुवाः ।
सेतरा इति षट्त्रिंशत्, त्रिशतप्रभिदा मतिः ॥१९॥
मतिपूर्वं श्रुतं द्वैध—मङ्गबाह्यप्रविष्टकम् ।
अनेकभेदं तत्राद्यं, ज्ञेयं सामायिकादिकम् ॥२०॥
अङ्गप्रविष्टमाचारा—ङ्गादि द्वादशधा मतम् ।
द्विधाऽवधिर्भवहेतुः, क्षयोपशमहेतुकः ॥२१॥
द्वितीयस्तत्र विज्ञेयः, षड्विकल्पसमन्वितः ।
आनुगामिवर्द्धमाना—ऽवस्थितेतरभेदतः ॥२२॥
मनःपर्यायकं नाम, ज्ञानं द्विविधमिष्यते ।
ऋजुमतिर्विपुलधीः, केवलं केवलं मतम् ॥२३॥

प्रमाणं च तदेव स्यात्, स्वपरव्यवसायकम् ।
व्यवसायस्वभावं तत्, पण्डितैः परिकीर्त्तितम् ॥२४॥

यतस्तस्यास्ति प्रामाण्यं, समारोपविरोधिता ।
समारोपोऽतस्मिँस्तद–ध्यवसायोऽधिगम्यताम् ॥२५॥

विपर्ययः संशयोऽन–ध्यवसाय इति त्रिधा ।
अधिज्ञेयः स तत्राद्यो, विपर्ययः प्रदर्श्यते ॥२६॥

विपरीतैककोटेः स्या–न्निष्टङ्कनं विपर्ययः ।
भवेद् यथा शुक्तिकायां, रजताकारतामतिः ॥२७॥

तत्संशयोऽनवस्थिता–नेककोट्यवलम्बि यत् ।
ज्ञानं साधकबाधक–प्रमाणाऽनुपलम्भतः ॥२८॥

यथा स्थाणुरयं किं वा, भवेद्वा पुरुषश्च किम् ? ।
अथानध्यवसायस्य, स्वरूपं किञ्चिदुच्यते ॥२९॥

स विद्वद्भिः समाख्यातः, किमित्यालोचमात्रकम् ।
ज्ञानं यत्तद्यथा गच्छ–त्तृणस्पर्शस्य शेमुषी ॥३०॥

तच्च द्विधाथ प्रत्यक्षं, परोक्षं तत्र चादिमम् ।
स्पष्टं तत्, स्पष्टता तत्र, यद्विशेषप्रकाशनम् ॥३१॥

सांव्यवहारिकं पार–मार्थिकत्वेन तद् द्विधा ।
सांव्यवहारिकं तत्रे–न्द्रियाऽनिन्द्रियहेतुकम् ॥३२॥

इन्द्रियमिन्द्रलिङ्गं स्या–दिन्द्रदृष्टं तथैव च ।
इन्द्रसृष्टमिन्द्रजुष्ट–मिन्द्रश्चात्मा प्रकीर्तितः ॥३३॥

तच्चोक्तं पञ्चधा स्पर्श–जिह्वाघ्राणाक्षिकर्णतः ।
द्विधा तद् द्रव्यभावाभ्यां, ते द्वे एवं द्विधा मते ॥३४॥

निर्वृतिरुपकरणं, द्रव्यतस्तत्र भाव्यताम् ।
लब्धिश्चाथोपयोगश्च, भावतः परिभावितम् ॥३५॥

स्पर्शरसगन्धवर्ण–शब्दा अनुक्रमादिमे ।
एतेषां विषया ज्ञेया, वक्ष्यन्तेऽथश्च तद्द्विधाः ॥३६॥
अनिन्द्रियं मनो द्वैधं, द्रव्यभावप्रकारतः ।
एतद् द्वयं भवेद् द्वेधा, मतिश्रुतविकल्पतः ॥३७॥
स्याच्छ्रुताऽननुसार्याद्य–मितरं चेतरं मतम् ।
अवग्रहादिका प्रोक्ता, चतुर्धैव मतिर्यतः ॥३८॥
ईहा स्यात् संशयाद् भिन्ना, संशयोत्तरभाविनी ।
क्रमश्चैष तथा हेतु–क्षयोपशमभावतः ॥३९॥
श्रुतज्ञानं समाख्यातं, चतुर्दशविधं जिनैः ।
अक्षरं संज्ञि सम्यक् च, सादि सान्तं तथा गमि ॥४०॥
एवमङ्गप्रविष्टं च, प्रतिपक्षान्वितं मतम् ।
सांव्यवहारिकं प्रोक्तं, मयैवं च यथामति ॥४१॥
पारमार्थिकमुत्पत्ता–वात्ममात्रसमाश्रितम् ।
विकलं सकलं चाद्य–मवधिर्मनआख्यकम् ॥४२॥
विशिष्टावृतिविच्छेदा–दवधी रूपिगोचरः ।
मनःपर्यायकं ज्ञानं, हृदयमात्रगोचरम् ॥४३॥
अनेकर्द्धिनिधानानां, शुद्धसंयमशालिनाम् ।
आपुष्करार्द्धमाख्यातं, संज्ञिनां चित्तवेदकम् ॥४४॥
अवधिज्ञानमेवेद–माहुर्नव्या महाशयाः ।
सूत्रे भेदाभिधानं च, धर्मभेदाभिप्रायतः ॥४५॥
घातिकर्मक्षयोद्भूतं, सर्वभावप्रकाशकम् ।
केवलज्ञानमाख्यातं, सकलं सकलं सदा ॥४६॥
तद्वतो दोषमुक्तत्वा–दर्हत्त्वं प्रतिपादितम् ।
तस्माच्च तत्र नैवेष्टा, क्षित्यादीनां तु कर्तृता ॥४७॥

जन्यत्वं तु शरीरेणो–पाधिना समलङ्कृतम् ।
इति प्रत्यक्षमाख्यातं, परोक्षं चाथ कथ्यते ॥४८॥
तदस्पष्टं समाख्यातं, पञ्चधा पूर्वपण्डितैः ।
तत्प्रपञ्चोऽथ विज्ञेयो, वक्ष्यमाणो यथानयम् ॥४९॥

संस्कारबोधसम्भूत–मनुभूतार्थगोचरम् ।
तदित्याकारकं ज्ञानं, स्मरणं कथितं बुधैः ॥५०॥

तिर्यगूर्ध्वत्वसामान्य–प्रभृत्यालम्बनं तथा ।
सङ्कलनात्मकं ज्ञानं, प्रत्यभिज्ञानमिष्यते ॥५१॥

त्रिकालवर्त्तिनोर्यः स्यात्, साध्यसाधनयोः खलु ।
सम्बन्धादिस्तदालम्ब–मूहापरसुनामकम् (मूहेत्यपरनामकम्) ॥५२॥

उपलम्भेतरोद्भूतं, विज्ञानं परिकीर्त्यते ।
सत्येवास्मिन्निदं चेति, तर्कस्तार्किकशेखरैः ॥५३॥

अनुमानं द्विधा स्वार्थं, परार्थं चादिमं त्विदम् ।
हेतुग्रहणसम्बन्ध–स्मृतिहेतुकसाध्यवित् ॥५४॥

हेतुश्च निश्चितान्यथा–नुपपत्त्येकलक्षणः ।
अन्यथानुपपत्तिश्च, साध्यधर्मेण गृह्यते ॥५५॥

अप्रतीतं च साध्यं स्या–दनिराकृतमीप्सितम् ।
विषयभागात् साध्यत्वं, भिन्नं भिन्नमुदाहृतम् ॥५६॥

पक्षहेतुवचोरूपं, परार्थमुपचारतः ।
दृष्टान्ताद्यत्र नैवाङ्गं, वस्तुतो हेतुरेव च ॥५७॥

क्वचित् प्रयुज्यते नाम, दृष्टान्तादिरिहापि च ।
स्याद् दृष्टान्तोऽविनाभाव–प्रतिपत्तेः किलास्पदम् ॥५८॥

द्वेधोक्तोऽथ स साधर्म्य–वैधर्म्याभ्यां सुधीमुखैः ।
अन्तर्व्याप्तिर्बहिर्व्याप्ति–श्चेति व्याप्तिर्द्विधा मता ॥५९॥

उपनयो निगमनं, यथासङ्ख्यमथोच्यते ।
साध्यधर्मिणि यद्धेतोः, साध्यधर्मस्य वा पुनः ॥६०॥
उपसंहरणं चैव, तान्यवयवसंज्ञया ।
पञ्चाप्यत्र प्रसिद्धानि, पण्डितानां प्रयोजने ॥६१॥
उपलब्ध्यनुपलब्धि–भेदाद्धेतुर्द्विधा मतः ।
विधिनिषेधयोरेतौ, क्रमात् सिद्धिनिबन्धने ॥६२॥
सदंशोऽत्र विधिर्ज्ञेयः, प्रतिषेधोऽसदंशकः ।
चतुर्विधः स विज्ञाना–मुत्तमैः परिकीर्तितः ॥६३॥
पूर्वप्रध्वंसकान्योन्या–त्यन्ताभावप्रकारकः ।
ज्ञेयः सोऽथोपलब्धिश्च, प्रभेदेन प्रदर्श्यते ॥६४॥
अविरुद्धा विरुद्धा च, तत्राद्या षड्विधा मता ।
सा साध्येनाऽविरुद्धानां, व्याप्यादीनां विभाविता ॥६५॥
सप्तधाऽन्या समाख्याता, स्वभावादविरोधिनी ।
तथैवाऽनुपलब्धिः स्याद्, द्विधापि नवरं त्विदम् ॥६६॥
विरुद्धानुपलब्धिश्च, पञ्चभेदा विभाविता ।
इतरा सप्तधा ज्ञेया, क्रमाद् विधिनिषेधकृत् ॥६७॥
अभिधेयानि वस्तूनि, यो जानीते यथास्थिति ।
अभिधत्ते यथाज्ञानं, स आप्तोऽयं द्विधा मतः ॥६८॥
लौकिको जनकादिः स्या–ल्लोकोत्तरश्च तीर्थकृत् ।
तेषां ह्येव वचः शून्यं विसंवादेन दृश्यते ॥६९॥
आविर्भूता च तद्वाचोऽर्थसंविन्मत आगमः ।
उपचाराद्भवेदाप्त–वचनं वक्ष्यतेऽथ तत् ॥७०॥
आदिः पौद्गलिको वर्णो, वर्णानां निरपेक्षिका ।
अन्योन्यापेक्षकाणां च, पदं संहतिरुच्यते ॥७१॥

वाक्यं स्याच्च पदानां तु, वचनं तत्त्रयात्मकम् ।
सामर्थ्यमथ शक्तिः स्यात् सङ्केतः समयो मतः ॥७२॥

ताभ्यां स्वाभाविकाभ्यां स्या–च्छब्दोऽर्थस्य विबोधकृत् ।
अयं विधिनिषेधाभ्यां, लभते भङ्गसप्तकम् ॥७३॥

अनन्तत्वेऽपि धर्माणां, सप्तभङ्ग्येव यन्मता ।
तद्धि पर्यनुयोगानां, सप्तानामेव सम्भवात् ॥७४॥

सकलादेशरूपान्य- रूपाभ्यामुदिता द्विधा ।
कथ्यते विषयश्चाथ, परिच्छेद्यं च गोचरः ॥७५॥

अनेकान्तात्मकं वस्तु, सामान्येतरमुख्यकम् ।
तद्गोचरश्च तद् द्वेधा, तिर्यगूर्ध्वत्वभेदतः ॥७६॥

विशेषोऽपि द्विधा प्रोक्तो, गुणपर्यायभेदतः ।
सहभावी गुणो धर्मः, क्रमभावी तथा परः ॥७७॥

फलं चाथ प्रमाणस्य, द्विविधं परिकीर्तितम् ।
अनन्तरफलं त्वाद्यं, परम्परफलं परम् ॥७८॥

फलमज्ञाननिवृत्तिः, सर्वेषामादिमं मतम् ।
आदानत्यजनोपेक्षा–बुद्धयश्चाऽपरं फलम् ॥७९॥

केवलस्य तु विज्ञेय–मौदासीन्यं फलं परम् ।
तत् स्याद्भिन्नमभिन्नं च, प्रमाणाच्च प्रमातृतः ॥८०॥

क्रियाक्रियावतोर्यस्माद्–भेदाभेदविभूषिता ।
कर्त्ता हि साधकः प्रोक्त–स्तन्निर्वर्त्या भवेत् क्रिया ॥८१॥

प्रमाणादिव्यवहृति–रियं स्यात् पारमार्थिकी ।
संवृत्या तदुरीकारे, स्वेष्टसिद्धिविरोधिता ॥८२॥

एवं प्रमाणमाख्यातं, स्वरूपादिचतुष्टयम् ।
विपरीतस्तदाभासो, विशेषस्तु प्रदर्श्यते ॥८३॥

पक्षाभासास्त्रयस्तत्र, मध्यमोऽनेकभेदभृत् ।
प्रत्यक्षप्रमुखैर्यस्मात्, साध्यधर्मनिराकृतिः ॥८४॥
हेत्वाभासः परिज्ञेयो, भाषितो मुनिपुङ्गवैः ।
असिद्धश्च विरुद्धश्चा–ऽनैकान्तिक इति त्रिधा ॥८५॥
अप्रतीतस्वरूपः स्या–दसिद्धो द्विविधः स च ।
उभयासिद्ध आद्यश्चा–ऽन्यतरासिद्धकोऽपरः ॥८६॥
साध्यविपर्ययव्याप्तो, विरुद्धः प्रथितो भुवि ।
अन्यथानुपपत्तेश्च, सन्देहात् स्यात् तृतीयकः ॥८७॥
विपक्षवृत्तिसन्देह–निर्णयाभ्यां द्विधाऽस्त्ययम् ।
चतुर्धा पञ्चधा चैव, हेत्वाभासो मतोऽपरैः ॥८८॥
अकिञ्चित्करयोगेन, चतुर्धा यन्मतोऽपरैः ।
तन्नाऽप्रयोजकात्मा हि, पक्षाभासः स कीर्त्यते ॥८९॥
एवं सत्प्रतिपक्षश्च, बाधश्च नाऽतिरिच्यते ।
असिद्धाऽनतिरिक्तत्वा–दिति जैनमतं मतम् ॥९०॥
दृष्टान्ताभास आख्यातो, द्विविधो धौतकल्मषैः ।
एकैको नवधा चैव–माभासान्तरमूह्यताम् ॥९१॥
स्यात्प्रमाणैकदेशत्वाद्, भिन्नः प्रमाणतो नयः ।
द्रव्यार्थिको मतः पूर्वोऽन्यः पर्यायार्थिको बुधैः ॥९२॥
नैगमश्च सङ्ग्रहश्च, व्यवहार इति त्रिधा ।
आद्योऽपरश्चतुर्धा स्यात्, प्रथम ऋजुसूत्रकः ॥९३॥
शब्दः समभिरूढः स्या–देवम्भूतश्चतुर्थकः ।
एतेष्वर्थनयाः केचित्, केचिच्छब्दप्रधानकाः ॥९४॥
विपरीतो नयाभासः, फलादिकं च पूर्ववत् ।
शब्दार्थरचनारूपो, निक्षेपश्चाथ भाव्यते ॥९५॥

स नामस्थापनाद्रव्य–भावभेदाच्चतुर्विधः ।
द्रव्यार्थिकनयस्य स्या–दिष्टं नामादिकत्रयम् ॥९६॥
पर्यायार्थिकयोगस्तु, भावस्यैव विभावितः ।
शुद्धत्वाद् भावमिच्छन्ति, शब्दादिका नयास्त्रयः ॥९७॥
चत्वारः सर्वनिक्षेपा–निच्छन्तीति मतं परम् ।
एतैर्जीवादिका भावा, निरूप्यन्ते यथागमम् ॥९८॥
अथात्मा द्विविधः प्रोक्तो, मुक्तामुक्तविभागतः ।
मुक्तिः कर्मक्षयो ज्ञेयः परमानन्द इत्युत ॥९९॥
मुक्ताः सिद्धा गताः पारं, परम्परगताश्च ते ।
प्राक्प्रयोगादिना गत्वा, लोकाग्रस्थानसंस्थिताः ॥१००॥
पूर्वदेहत्रिभागेन, मिताकाशावगाहनाः ।
तीर्थातीर्थप्रकारेण, द्विविधाः परिकीर्तिताः ॥१०१॥
सर्वकर्मविनिर्मुक्ताः; कर्माष्टप्रभिदं मतम् ।
ज्ञानावरणमाद्यं स्या–द्दर्शनावरणं परम् ॥१०२॥
वेद्यं च मोहनीयं चा–युष्कं च नाम गोत्रकम् ।
विघ्नं चाष्टममाख्यातं, शुभाशुभमिति द्विधा ॥१०३॥
कार्मणवर्गणाजात–मिदं पौद्गलिकं मतम् ।
औदारिकादिभेदेन, वर्गणाऽष्टविधा मता ॥१०४॥
प्रकृत्यादिविधाभिश्च, चतुर्धा कर्म कीर्तितम् ।
मिथ्यात्वाविरतियोग–कषायाश्चेति बन्धकाः ॥१०५॥
प्रकृत्यां च प्रदेशे च, कारणं योग आहितः ।
अनुभागे स्थितौ च स्यात्, कषायः कारणं किल ॥१०६॥
यथासम्भवमेतेषा–मष्टधा करणं मतम् ।
एतेषामुदयादिः स्याद्, द्रव्यक्षेत्रादिभेदतः ॥१०७॥

ज्ञानदर्शनचारित्र–प्रभृतिः स्याद् यथायथम् ।
क्षयोपशान्तिभावेन, चैतेषामेव कर्मणाम् ॥१०८॥
चतुर्विधा अमुक्ताः स्यु–र्नारकादिप्रभेदतः ।
रत्नप्रभादिभेदेन, नारकाः सप्तधा मताः ॥१०९॥
पञ्चाक्षा एव विज्ञेया--मुक्त्वा तिर्यक्शरीरिणः ।
एकेन्द्रियादिभेदेन, तिर्यञ्चः पञ्चधा स्मृताः ॥११०॥
आद्याः पृथ्वीपयस्तेजो–वरेण्युवनभेदतः ।
सूक्ष्माश्च बादराश्चैते, द्वीन्द्रियाद्या अनेकधा ॥१११॥
गर्भजेतरभेदेन, द्विधा च मनुजा मताः ।
भवनपत्यादिभेदेन, देवताश्च चतुर्विधाः ॥११२॥
पर्याप्तेतरभेदेना–ऽमी सर्वे द्विविधा मताः ।
पर्याप्तिरात्मनः शक्ति–विशेषः सा च षड्विधा ॥११३॥
सर्वेऽमी ससमुद्घाताः, सलेश्याश्च सयोगिनः ।
यथार्हस्थानिनः प्रोक्ताः, सर्वभावप्रदर्शिभिः ॥११४॥
वेदनादिसमुद्घाताः, सप्त शास्त्रे प्रकीर्तिताः ।
लेश्याः कृष्णा च नीला च, कापोती तैजसी तथा ॥११५॥
पद्मा शुक्ला च; योगास्तु, त्रय एव प्रकीर्तिताः ।
मनोयोगो वचोयोगः, सत्यादिकश्चतुर्विधः ॥११६॥
सप्तधा काययोगः स्यात् , काय औदारिकस्तथा ।
वैक्रियश्चाहारकश्च, तैजसः कार्मणस्तथा ॥११७॥
तिर्यञ्चश्च मनुष्याश्च, ज्ञेया औदारिकाङ्गिनः ।
नारकाश्च सुरा लब्धि–मन्तो वैक्रियकायिनः ॥११८॥
वपुश्चाहारकं शुद्धं, स्याच्चतुर्दशपूर्विणाम् ।
तैजसं कार्मणं च स्या–दाभवं सर्वदेहिनाम् ॥११९॥
रत्नप्रभादिपृथ्व्यः स्यात् , स्थानं नारकदेहिनाम् ।
विमानाध्यासिनो देवा–स्तिर्यञ्चः सर्वलोकगाः ॥१२०॥

आपुष्करार्धमास्थानं, मनुष्याणां मतं जिनैः ।
जम्बूद्वीपादयो द्वीपाः, समुद्रा लवणादयः ॥१२१॥
एवं च पुद्गला ज्ञेया—रूपिणः परिणामिनः ।
दशधा परिणामश्च, बन्धनादिप्रकारतः ॥१२२॥
स्निग्धरूक्षप्रभेदेन, भाषितं बन्धनं द्विधा ।
स्पृशन्ती चास्पृशन्ती च, गतिरेवं द्विभेदिनी ॥१२३॥
संस्थानं पञ्चधा तत्र, परिमण्डलमादिमम् ।
वृत्तं त्र्यस्रं चतुरस्र—मायतं चैव कीर्तितम् ॥१२४॥
पञ्चधैवं च भेदः स्यात्, खण्डश्च प्रतरस्तथा ।
चूर्णिकोऽनुतटिका चो—त्करिका तत्र पञ्चमः ॥१२५॥
वर्णोऽप्येवं स चैवं स्यात्, कृष्णो नीलश्च रोहितः ।
पीतः शुक्लश्च गन्धश्च, सुरभिश्चासुरभिर्द्विधा
(सुरभ्यसुरभी द्विधा) ॥१२६॥
तिक्तश्च कटुकश्चैव, कषायश्चाम्बलस्तथा ।
मधुरश्चेति विज्ञेयो, रसः पञ्चविधः खलु ॥१२७॥
स्पर्शा अष्ट मताश्चैवं, कर्कशश्च मृदुर्गुरुः ।
लघुरेवं च शीतोष्णौ, स्निग्धरूक्षौ तथैव च ॥१२८॥
अगुरुलघुराख्यात एकाकारो बुधेश्वरैः ।
शब्दाख्यः परिणामस्तु, भाव्यतेऽथो विपश्चिमः ॥१२९॥
स द्विधा वा चतुर्धा च, द्विधा तत्र विभाव्यते ।
शुभाशुभतया यद्वा, वैस्रसिकः प्रयोगजः ॥१३०॥
ततश्च विततश्चैव, घनश्च शुषिरस्तथा ।
सङ्घर्षश्चाथ भाषा च, स्यात् षोढेति प्रयोगजः ॥१३१॥
चतुर्भेदाश्च तत्र स्यु—र्विमुच्यान्तिमयुग्मकम् ।
पुद्गलानां परिणामाः, संक्षेपादित्युदाहृताः ॥१३२॥

एवं छायातपोद्योता–दयोऽप्यागमवेदिभिः ।
पुद्गलानां परिणाम–विशेषाः परिकीर्तिताः ॥१३३॥
अथ निरूप्यते कालो, वर्त्तनालक्षणः स च ।
परिणामा नवत्वाद्या, वर्तना त्वभिधीयते ॥१३४॥
सार्द्धद्वीपद्वयाम्भोधि–द्वैतमानः प्रकीर्तितः ।
एक एवास्त्ययं कालो, वर्तमानः स वास्तवः ॥१३५॥
कल्प्यन्ते व्यवहारार्थं, पुनरावलिकादयः ।
समयानामसङ्ख्याना–मेका साऽभिहिता बुधैः ॥१३६॥
समयस्त्वविभाज्योऽति–सूक्ष्मः कालः समीरितः ।
द्रव्यपर्यायरूपो वा, सोऽभिरूपैः प्रकीर्तितः ॥१३७॥
ताः सङ्ख्येयाः भवेदेक–उच्छ्वासश्च बलीयसः ।
ताभ्यां द्वाभ्यां भवेत् प्राणः, स्तोकः स्यात् तैश्च सप्तभिः ॥१३८॥
तावद्भिस्तैर्लवः प्रोक्तः सार्द्धाष्टात्रिंशता च तैः ।
नालिकैका भवेद् द्वाभ्यां, ताभ्यां मुहूर्त्त ईरितः ॥१३९॥
त्रिंशता तैरहोरात्र–एवमग्रेऽपि विस्तरः ।
एवं निरूपितं द्रव्यं, पर्यायोऽथो निरुच्यते ॥१४०॥
स द्वेधा सहभाव्याद्यः, क्रमभावी द्वितीयकः ।
संज्ञाविशेषतश्चेमौ गुणः पर्याय इत्यथ ॥१४१॥
तत्रास्तित्वं च वस्तुत्वं, द्रव्यत्वं च प्रमेयता ।
तथाऽगुरुलघुत्वं च, प्रदेशत्वं तथैव च ॥१४२॥
ज्ञानं च दर्शनं सौख्यं, वीर्यस्पर्शौ रसस्तथा ।
गन्धवर्णौ तथा ज्ञेयौ, गतिहेतुत्वकं तथा ॥१४३॥
स्थित्यवगाहहेतुत्वं, वर्तनाहेतुता तथा ।
चेतनत्वाचेतनत्वे, मूर्त्तत्वामूर्त्तते इति ॥१४४॥
विज्ञेयाः षट्‌ च सामान्या–स्तत्रास्तित्वादयो गुणाः ।
विशेषा द्वादश प्रोक्ता, बुधैर्ज्ञानादिका गुणाः ॥१४५॥

सामान्याश्च विशेषाश्च, चेतनत्वादयो मताः ।
पर्यायश्च द्विधा द्रव्य–गुणपर्यायभेदतः ॥१४६॥
मनुष्यत्वादिराद्यः स्याद्, नीलादिर्द्वितीयो मतः ।
एवमन्यप्रकाराच्च, पर्यायाणां भिदा मताः ॥१४७॥

० ० ०

जयति श्रीजिनवीरो, यच्छिष्येण सुधर्मणा ।
प्रत्यष्ठापि प्रभावाढ्यो, गच्छो निर्ग्रन्थनामकः ॥१४८॥
विबुधैर्विहितावासो, मध्यस्थभावभावितः ।
अनुत्तरस्तपागच्छो, महामेरूपमोऽस्ति यः ॥१४९॥
निर्ग्रन्थगच्छ एवायं, जगच्चन्द्रप्रभोरनु ।
तपागच्छाख्यया लोके, बभूव सुप्रसिद्धिभाक् ॥१५०॥
आचार्यो नेमिसूरीश–स्तद्गच्छाम्भोधिचन्द्रमाः ।
सर्वशास्त्रस्य यो वेत्ता, जेता यो सर्ववादिनाम् ॥१५१॥
यत्पादाम्भोजभक्त्यैव, चरणस्थैर्यमाप्नुवम् ।
दर्शनज्ञानदाता च, जयत्ययमनुत्तरः ॥१५२॥
तत्पादाब्जप्रभावेण, प्राज्ञवाचोऽनुसृत्य च ।
वाचकोदयशिष्येण, नन्दनाख्येन भिक्षुणा ॥१५३॥
पदार्थकथनं किञ्चित्, कृत बालसुबोधकृत् ।
परमार्थपरैः प्राज्ञैः, शोध्यं तच्च सुचेतसा ॥१५४॥
संवत्सरे शरहयाङ्कविधुप्रमाण–आषाढमाससितपक्षदिने द्वितीये ।
श्रीभाजि राजनगरे नगरप्रधाने, मुक्तावलेर्विरचनप्रथनं प्रपूर्णम् ॥१५५॥
जैनमुक्तावलीं कृत्वा, सुकृतं यन्मयाऽर्जितम् ।
सुखी भवतु लोकोऽयं, तेन पुण्येन हेतुना ॥१५६॥

इति श्रीजैनमुक्तावली ॥

# परिशिष्टम् ३

## तार्किकचूडामणि–विद्यावाचस्पति पण्डित श्रीशशिनाथ झा शर्मणा प्रणीतो निक्षेपविचारः ॥

ननु प्रमाणनयपरिच्छेद्यानां तत्त्वानां विशेषतोऽधिगमाय व्याख्याङ्गतया निक्षेपाः **समये** नामस्थापनाद्रव्यभावभेदेन चत्वारो निर्दिष्टाः; तत्र निक्षिप्यन्ते-स्थाप्यन्ते इति निक्षेपा इति निरुक्तिरपि तत्र तत्राहता; एतावतेदन्तावन्निक्षेपत्वमिति विशेषतो नावधारयितुं शक्यते ।

न च कर्मप्रत्ययान्त 'निक्षिप्यन्त' इत्यनेन स्थापनाकर्मत्वरूपतया निष्टङ्कित-मतो नाऽनवधारणांशलेशोऽपीति वाच्यम् । न हि पर्यायसहस्रोक्तावपि स्वरूपतो घटत्वस्य घटपदप्रवृत्तिनिमित्तस्याऽपरिच्छेदे घटपदादर्थविशेषावगतिः । एवं को निक्षेपः, का वा स्थापना इत्येवं जाग्रति संशये निक्षेपकर्मत्वं स्थापनाकर्मत्वमि-त्यादिपर्यायान्तरघटितवचनसहस्रेणाप्यसन्दिग्धासाधारणस्वरूपप्रतिपत्तेरनुदयात् ।

न च सङ्केतविशेषसम्बन्धेन निक्षेपपदवत्त्वमेव निक्षेपत्वं; शास्त्रकाराणां नाम-स्थापनाद्रव्यभावेषु निक्षेपपदस्य सङ्केतो विद्यत इति सुघटं निक्षेपत्वस्यावधारणमिति वाच्यम् । नामादिषु चतुर्षु प्रवृत्तिनिमित्तस्यैकस्यावधारणं विना सङ्केतस्यैव कर्तुमशक्यत्वात् । न च हर्यादिपदवन्नानार्थक एवायं 'निक्षेप' शब्द इति नामत्वादिकं प्रत्येकमस्य प्रवृत्तिनिमित्तमिति तत्तद्रूपावच्छिन्ने निक्षेपपदस्य-सङ्केतः कर्तुं शक्यत इति वाच्यम् । व्याख्याङ्गत्वाविशेषे सत्सङ्ख्यादिषु न निक्षेपपदस्य सङ्केतो नामादिषु च सङ्केतः कृत इत्यस्य विनिगमकमन्तरेण नियन्तुमशक्यत्वात् ।

यथा च घटपटादिपदानामनादिकालतो लोकव्यवहारशास्त्रानुस्यूतानां सङ्केतः प्रतिनियतार्थगोचरोऽनादिकालत एवागतो न पर्यनुयोगपात्रं, नैवं निक्षेप-पदसङ्केतः; तस्याऽऽर्हतसिद्धान्त एव सुदृढनिरूढत्वादतो भवितव्यं केनचिद् विनिगमकेनेति चेत् ।—

अत्रोच्यते। यथा वाक्यरचनां प्रति वाक्यार्थज्ञानत्वेन कारणत्वेन 'सन्नेव घट' इति वाक्यं प्रति 'सन्नेव घट' इति दुर्नयरूपवाक्यार्थज्ञानस्य, 'सन् घट' इति वाक्यं प्रति 'सन् घट' इति सुनय (नय) रूपवाक्यार्थज्ञानस्य, 'स्यात् सन् घट' इति वाक्यं प्रति 'स्यात् सन् घट' इति प्रमाणरूपवाक्यार्थज्ञानस्य च कारणत्वमिति वाक्यविशेषरूपव्याख्यां प्रत्यपि प्रमाणनययोः कारणत्वमेतच्च व्याख्यास्वरूपाप्रविष्टतयैव तन्निष्पादकत्वमिति न व्याख्याङ्गताव्यपदेशमर्हति। विशेष्यविशेषणभावप्रतिपादनमुखेन प्रवर्त्तमानवाक्यसन्दर्भरूपव्याख्यानस्य यद्विशेष्यस्वरूपाविर्भावकं यच्च विशेषणस्वरूपोपदर्शकं तद् व्याख्यानस्वरूपघटकतया (व्याख्यानविषयिताव्यापकविषयिताकतया) अवयविस्वरूपसन्निविष्टावयववत् अङ्गभावं बिभर्ति। तत्र विशेषणस्वरूपाविर्भावकतया सत्सङ्ख्यादीनामङ्गतया व्याख्यानद्वारता, नामादीनां तु न विशेषणस्वरूपाविर्भावकतया, किन्तु कर्मधारयसमासैकनिविष्टविशेष्यभावापन्नवस्त्वभिधायकपदमात्राव्यवहितपूर्ववर्त्तितया विशेष्यस्वरूपविशेषविवेचनलक्षणविशेष्यस्वरूपाविर्भावकतया। एवं च कर्मधारयवृत्तिसमभिव्याहाराश्रयविशेष्यभावापन्नवस्त्वभिधायकपदमात्राव्यवहितपूर्ववर्त्तिवस्तुत्वव्यापकधर्मावच्छिन्नाशक्तविशेष्यवस्तुस्वरूपविशेषाविर्भावनप्रत्यलवचनत्वं निक्षेपत्वमिति सामान्यलक्षणम्।

इदं च लक्षणं नामस्थापनाद्रव्यभावेषु समनुगतम्। तथा हि—'नामघट' इत्यादिस्वरूपे निक्षेपे कर्मधारयवृत्तिः; समभिव्याहारो नामघटत्वादिः; तदाश्रयो यद् विशेष्यभावापन्नवस्त्वभिधायकमात्रस्य घटादिपदादेरव्यवहितपूर्ववर्त्ति तन्नामपदादि, तद्वस्तुत्वव्यापकसत्त्वादिधर्मावच्छिन्नाशक्तं सत् विशेष्यवस्तुस्वरूपविशेषाविर्भावनप्रत्यलमपि; यतो विशेष्यवस्तु घटादि, तस्य यः स्वरूपविशेषो नामघटादिः, तदाविर्भावनप्रत्यलत्वं घटाद्यव्यवहितपूर्ववर्त्तिनामपदे समस्ति, तथाभूतं वचनं नामपदं, तत्त्वं नामपदे समस्तीति लक्षणसमन्वयः। एवं स्थापनाद्रव्यभावेष्वपि। 'नामघट' इत्यादौ कर्मधारयसमास एव नामनिक्षेपप्रवृत्तिरिति बोधयितुं कर्मधारयवृत्तिसमभिव्याहाराश्रयेत्युक्तम्। 'मृद्घट' इत्यत्र 'मृत्' पदस्य

न निक्षेपत्वमित्यावेदयितुं विशेष्यभावापन्नवस्त्वभिधायकपदमात्राव्यवहितपूर्ववर्त्तीत्य-त्राशेषार्थकस्य मात्रपदस्य निवेशः। नहि नाम्न इव 'मृत्'पदस्याऽशेषविशेष्य-पदाव्यवहितपूर्ववर्त्तिता; तन्त्वादीनां विशेष्यवाचकपदत्वे तदव्यवहितपूर्ववर्त्तित्वस्य 'मृत्' पदेऽभावात्। 'वस्तुत्वव्यापकधर्मावच्छिन्नाशक्ते'ति विशेषणात् सद्घटादि-घटके सत्पदे न निक्षेपत्वप्रसङ्गः। एवं ज्ञेयघटादावपि। 'विशेष्यवस्तुस्वरूपविशेषा-विर्भावनप्रत्यले'त्यनेन अन्यत्र कर्मधारये यथा विशेष्यवाचकपदाव्यवहितपूर्ववर्त्ति-विशेषणपदेन विशेष्यतावच्छेदकधर्मभिन्नप्रकारतावच्छेदकावच्छिन्नो बोध्यते नैवमत्र, किन्तु विशेषणविशेष्यपदाभ्यां सम्भूयैकविशेष्यतावच्छेदकधर्मावच्छिन्नस्यैवावबोधः।

यद्यपि नामनिक्षेपादिर्वचनविशेषोऽज्ञत्वादेव न कस्यचिदर्थस्याऽभ्युपगन्ता प्रतिक्षेप्ता वा, तथापि नामनिक्षेपाभ्युपगन्ता नयोऽपि नामनिक्षेप उच्यते; स वस्तुमात्रस्य नामस्वरूपत्वमभ्युपगच्छति, प्रमाणयति चात्रानुमानमिदम्,-अर्थो नामस्वरूपः, नामप्रतीतौ सत्यामेव प्रतीयमानत्वाद् नाम्ना प्रतीयमानत्वाद्वा; यद् यत्प्रतीतौ प्रतीयते तत् तत्स्वरूपं, यथा मृत्प्रतीतौ सत्यामेव प्रतीयमानो घटो मृत्स्वरूप एवेति सामान्यव्याप्तिः। न चार्थस्य नामरूपत्वे यदर्थस्य यत्कार्यं तत्तन्नाम्नोऽपि स्यादित्यग्न्यादिशब्दोच्चारणे मुखदाहादिकं स्याद्दर्थावस्थानदेशे गुमगुमायमानता च स्यात्। रत्नादिशब्दोच्चारणादेव रत्नादिप्राप्तौ न तदर्थं प्रयासान्तरं कोऽप्यातिष्ठेदिति वाच्यम्। यथा हि घटस्य मृद्रूपत्वे घटस्य कार्यं जलाहरणादि मृत्कार्यं भवति, न हि तन्मृदो व्यतिरिक्ता-देव जातं येन मृत्कार्यं न स्यात्; एवं घटरूपार्थस्य घटनामरूपत्वे घटकार्यमपि घटनामकार्यं भवत्येव। यथा च घटस्य पूर्वकाले उत्तरकाले च मृद एव सत्त्वेन घटकालेऽपि तस्या एव सत्त्वं घटस्य तु तदवस्थारूपतयैव सत्त्वं, न तु स्वा-तन्त्र्येण; तथा सति नामावगमव्यतिरेकेणापि तदवगमः प्रसज्येत। एतदभि-प्रायेणैव चोच्यते—

"व्यक्ते * नष्टेऽपि नामैत—न्नृवक्त्रेष्वनुवर्तते।
तेन नाम्ना निरूप्यत्वाद्, व्यक्तं तद्रूपमुच्यते" ॥इति॥

---

टि. * घटादौ ॥

यच्च नामोच्चारणकालेऽर्थकार्यमापादितं तत् तदा स्याद् यदि यद् यत्कार्यं तत् तस्य सर्वास्ववस्थासु भवतीति नियमः स्यात्; न चैवं; तथा सति घटरूपार्थस्य जलाहरणादिकार्यं न कदाचिदपि विरमेत्। योग्यता तु सहकारिपुरस्कारेण यथा घटरूपार्थस्य, तथा तदात्मकावस्थालक्षणादिसहकारिपुरस्कारेण नाम्नोऽपि। तथा च तत्सहकारिसम्पादनार्थमायासान्तरमपि न निष्फलम्। न ह्यर्थावस्थानदेशे गुमगुमायमानताप्रसङ्गोऽपि; तदवस्थायां सूक्ष्मरूपेणैवावस्थानस्याभ्युपगम्यत्वात्।

न चैवमुक्तदिशा दोषपरीहारेऽर्थरूपतैव शब्दस्यास्तु, शब्द एवार्थाद्व्यतिरिक्तो माऽस्त्विति वाच्यम्। यथा हि तद्घटरूपार्थविरहकाले तद्घटनाम्नः सत्त्वमित्यनुगामित्वं तस्य, नैवं तद्घटनामविरहकाले तद्घटरूपार्थस्य सत्त्वमित्यर्थस्याऽननुगामित्वाच्छब्दस्य चानुगामित्वात्; अनुगाम्यननुगामिनोर्मध्येऽनुगामिसत्तैवाऽऽदृता भवत्यननुगामिनः; यथा रज्जुसर्पमालादिष्वनुगामिन इदमर्थस्येत्येवंनीत्या नामनिक्षेपमतं परिष्कर्तुं सुकरम्।

नामनिक्षेपाच्चाविर्भावो **भर्तृहरिमतस्य**। तन्मते चानाद्यनक्षरं शब्दब्रह्मैव ॐकारस्वरूपं जगत उपादानम्। उपादेयस्योपादानस्वरूपतयोपादानसत्तैवोपादेयसत्तेति सर्वस्य वस्तुनः शब्दरूपता। तन्मते ज्ञानमात्रमेव शब्दसंघटितमूर्त्त्यैवावभासते। निर्विकल्पकमपि किमपीत्येवमव्यक्तशब्दाकाराकारुषितमेव संवेद्यते। अत एवोक्तं—

"न सोऽस्ति प्रत्ययो लोके, यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं, सर्वं शब्देन भासते ॥१॥
वाग्रूपता चेद् व्युत्क्रामे-दवबोधस्य शाश्वती।
न प्रकाशः प्रकाशेत, सा हि प्रत्यवमर्शिनी ॥२॥" इति ॥

**एवं स्थापनानिक्षेपा**भ्युपगन्ता नयोऽपि स्थापनानिक्षेपः। स च सर्वस्य वस्तुन आकाररूपतां शास्ति, प्रमाणयति चानुमानम्। तथा हि—घटादिकं वस्तु पृथुबुध्नोदराद्याकाररूपं, तद्ग्रहणे सत्येव गृह्यमाणत्वात् तद्ग्रहणमन्तरेणाऽगृह्य-

माणत्वाद्वा । अत्रापि व्याप्तिदृष्टान्तादिकं पूर्ववद् भावनीयम् । इदमस्यैदम्पर्यम्—नहि घटादिकं नाम घकारोत्तराकारोत्तरटकारोत्तरात्वरूपानुपूर्वीरूपस्वाकारमन्तरेण क्वचिदपि प्रतीतावभासते । वाक्यमपि 'नीलो घट' इत्यादिरूपं स्वन्तनीलादिपदोत्तरस्वन्तघटादिपदत्वरूपाकाङ्क्षास्वरूपाकाराररुषितमेवावभासते । एवं प्रकरणपरिच्छेदाध्यायादिकं, किं बहुना ? एकोऽप्यकारादिर्वर्णः स्वव्यञ्जकलिप्यादिप्रतिनियतारोपितकाराररुषित एव बालानां प्रतीतिमधिरोहति । भाषावर्गणापुद्गलारब्धस्तु विभिन्नाकारतामन्तरेणाऽसङ्कीर्णस्वभावतया प्रतीतिपथं कथमारोहेत् ? । द्रव्यमपि मृदादि गुणपर्यायविकलं कदापि नोपलभ्यते । उपलम्भे वा स्वलक्षणमेवासौ जह्यात् । अत एवाचार्यदेशीयः द्रव्ये द्रव्यनिक्षेपस्य द्रव्यद्रव्य इत्येवंरूपस्य शून्यतामेवाभ्युपगच्छति । गुणपर्यायसहितं च पर्यायाकृतिरूपतयैवावभासते । सावयवानां च पुद्गलद्रव्याणामवयवसन्निवेशविशेषरूपाकृतिरूपतयैवोपलम्भ इति तेषामाकृतिरूपता निराबाधैव । परमाणोरप्यन्यादृश आकारो वस्तुत्वादेव पक्षधर्मताबलादास्थेयः । धर्माधर्माकाशजीवानां सप्रदेशत्वादाकृतिरूपतयैवावभासः । प्रदेशास्तु तदीयाः प्रदेशिवियुता न भवन्त्येवेति प्रदेश्याकृतिस्वरूपसन्निविष्टतैव तेषाम् । गुणाश्च स्वाश्रयद्रव्याऽजहद्वृत्तय इति तदाकारेणैवाकारवन्तः । नीलाद्याकारप्रतीतिविषयत्वाच्च नीलाद्याकारवन्तः । सामान्यविशेषौ च न स्वतन्त्रौ, किन्तु वस्तुस्वरूपसन्निविष्टाविति वस्तुनो घटादेः साकारत्वात्ताव्याकृतिरूपतां स्वीकुरुतः ।

न च ज्ञानस्य साकारोपयोगरूपत्वात् साकारत्वेऽपि दर्शनस्य निराकारोपयोगरूपत्वान्नाकृतिरूपतेति वाच्यम् । तत्र निराकारत्वं नाकाररहितत्वं, किन्तु सामान्यविषयत्वमेवेति विशेषाकारराहित्येऽपि सामान्याकारता तत्राप्यस्त्येव; अन्यथा वस्तुत्वव्यापकाकाररूपत्वाभावे वस्तुत्वमेव तस्य न स्यात् । उत्पादव्ययध्रौव्यलक्षणसत्त्वमप्याकारमुपादायैव घटते; यथा सुवर्णं कुण्डलाकारतयोत्पन्नं, अङ्गदाकाररूपेण विनष्टं, स्वस्वरूपाकारेण स्थितमिति । अर्थक्रियाकारित्वलक्षणं सत्त्वमप्याकाररूपतायामेव घटते; नहि मृद्द्रव्यं पिण्डस्थासकोशाद्याकारतामना-

साध्य घटरूपोपादेयकार्यं विधातुमलम्; घटोऽपि पृथुबुध्नोदराद्याकृतिरूप एव जलाहरणाद्यर्थक्रियानिमित्ततामासादयति। यस्यापि वस्तुनो विशेषतः कश्चिदाकारो न शृङ्गग्राहिकया निर्देष्टुं शक्यते, तदपि असद्भूतस्थापनामवलम्ब्यैव व्यवहारवीथीमवतरति; यथा गणनाव्यवहारे निर्धारितामुकसङ्ख्यकपणाणककार्षापणरूप्यकादेः धान्यादिमूल्यदानादिना निश्शेषतो विविच्योपयोगं प्रदर्श्यावशिष्टाभावावगतये० एतादृशाकार एव स्थाप्यत इत्येवं स्थापनानिक्षेपः परिस्कर्तुं शक्यः। एतदभिप्रायमाश्रित्यैवोच्यते—

"कुलालव्यापृतेः पूर्वो यावानंशः स नो घटः।
पश्चाच्च पृथुबुध्नादि—मत्त्वे युक्ताऽस्य कुम्भता ॥१॥ इति ॥.

एतन्मूलकश्च **नैयायिकादीनाम**वयविवादं इत्थं प्रसाध्याङ्को भवति। तथा हि—अवयवव्यतिरिक्तोऽवयवी तैरिष्टो द्रव्यरूपतया। परन्तु समवायिकारणत्वलक्षणं पारिभाषिकमेव द्रव्यत्वं तैरुपगतं, न तु पूर्वापरपर्यायानुगामिस्थिरभावलक्षणं 'द्रवति तांस्तान् पर्यायान् गच्छती' तिव्युत्पत्त्यवधृतस्वरूपं पारमार्थिकद्रव्यत्वमूर्ध्वतासामान्यापरपर्यायम्। पारिभाषिकद्रव्यरूपताऽप्यस्य तदा स्यादवयविरूपतायां, यदि यावदवयवगुरुत्वादधिकं गुरुत्वमत्र नमनोन्नमनादिकार्यानुमेयं स्यात्। यतोऽवयविसत्ताकालेऽप्यवयवसत्ता पृथक्कृतयाऽवयविवादे स्वीकृताऽस्ति; आकृतिरूपतायां तु गुणे गुणाऽनङ्गीकारान्न तत्रातिरिक्तगुरुत्वादिकम्। उक्तन्यायेनैव कपालकपालिकादीनामपि न द्रव्यरूपता। नामरूपता च नामार्थयोस्तादात्म्यातिरिक्तशक्तिलक्षणसम्बन्धाभ्युपगमपराहता। मृत्त्व—सुवर्णत्वादिसाङ्कर्यादेकं घटत्वं जातिरूपं द्रव्यरूपे मृद्घटादौ नाभ्युपगन्तुं शक्यम्। मृत्त्वव्याप्यं घटत्वमन्यद् अन्यच्च सुवर्णत्वव्याप्यं घटत्वमित्येवं नानारूपं घटत्वमिति कल्पनं च साधकाभावादेव न सम्भवति। अनुगतप्रतीतिनिमित्ततयैव च जातिकल्पनं; मृद्घटसुवर्णघटपाषाणादिघटेषु 'अयं घटोऽयं घट' इत्यनुगतप्रतीतिर्नाननुगतेनोक्तेन केनापि घटत्वेनेति अवयवसंनिवेशरूपसंस्थानविशेषवृत्त्येव घटत्वमिति तदाश्रयः संस्थानविशेष एव घटो न द्रव्यम्; जलाहरणाद्यर्थक्रियासमर्थत्वमपि

तस्यैवेति। भावरूपत्वमपि तस्यैव, अर्थक्रियासामर्थ्यावच्छेदकरूपवत एव भावत्वात्।

अनया दिशा कपालकपालिकादीनामप्याकृतिरूपताऽवसेया; सूक्ष्मेक्षिकायां परमाणुप्रचयसन्निवेशविशेषरूपतायामेव घटादेः पर्यवसानम्।

नामस्थापनानिक्षेपद्वयमूलकश्च **वेदान्तिनां** जगतो नामरूपात्मकतावादः। यदुक्तं–

"सच्चित्सुखात्मकं ब्रह्म, नामरूपात्मकं जगत्"॥ इति॥

न चैवं निक्षेपद्वयाभ्युपगमे स्याद्वाद इव तयोर्निमित्तभेदापेक्षया विरोधपरिहारेणावस्थानस्य स्वीकरणे एकान्तवादताहानिरिति वाच्यम्। नामनयेन हि नामतादात्म्येन नामरूपताऽभ्युपगता। वेदान्तिना तु नामनिरूप्यत्वेन नामरूपताऽऽदृता। नाम्नश्चार्थेन सह न तादात्म्येन सम्बद्धता, किन्तु वाच्यवाचकभावलक्षणसम्बन्धान्तरेणैव। तथापि नामनिरूप्यत्वं नामनये वेदान्तनये चाविशिष्टमित्येतावन्मात्रेण नामनिक्षेपमूलकत्वमस्याभिधीयते।

नन्वेवं निक्षेपचतुष्टयाभ्युपगन्तृस्याद्वादेऽपि अर्थस्य नाम्ना सह तादात्म्यलक्षणस्सम्बन्धो नाभ्युपगम्यत एव, किन्तु वाच्यवाचकभाव एवेति तत्रापि वस्तुगत्या नामनिक्षेपप्रवेशो नास्तीति वाच्यम्। स्याद्वादे सम्बन्धमात्रस्य भेदसम्वलिताऽभेदलक्षणकथञ्चित्तादात्म्यसम्बन्धनियतत्वाभ्युपगमात्। न च शब्दार्थयोर्भेदनिमित्तं स्वस्वासाधारणरूपं समस्ति, ततो भेदोऽस्तु, अनुगामि तु किमप्यभेदनिमित्तं नालोक्यते, सत्त्वप्रमेयत्वादेरनुगामिनो निमित्तत्वे घटशब्दस्य पटरूपार्थेन सहाऽभेदः स्यादिति वाच्यम्। तुल्यनामधेयत्वस्याऽतिप्रसङ्गानापादकस्याऽभेदनिमित्तत्वात्। वस्तुतो वाच्ये वाच्यताशक्तिः वाचके च वाचकताशक्तिः। तादृशशक्तिद्वयपिण्डितरूपो नृसिंहाकार एव वाच्यवाचकभावः। शक्तिश्च शक्तिमतोऽभिन्नेति वाच्यवाचकभावलक्षणसम्बन्धोऽपि वाच्यवाचकाभ्यामभिन्न इति वाच्योत्पत्तिकाले वाच्यताशक्त्यात्मना स उत्पद्यते वाचकोत्पत्तिकाले वाच-

कताशक्त्यात्मनेति तदभिन्नाभिन्नस्य तदभिन्नत्वमिति नियमेन नामाभिन्नोक्त-सम्बन्धाभिन्नत्वादर्थस्य नामाभिन्नत्वमिति स्याद्वादे नामनिक्षेपाभिमतनामार्थता-दात्म्यं घटत एव ॥ वेदान्त्यभिमतजगत्स्वरूपे च स्थापनानिक्षेपाभिमताकृति-तादात्म्यं स्वरूपत एवोत्पद्यत इति ध्येयम् ॥

**द्रव्यनिक्षेपा**भ्युपगन्ता नयोऽपि द्रव्यनिक्षेपः । स च सर्वस्य वस्तुनो द्रव्यरूपतामेवाभ्युपगच्छति; प्रमाणयति च–घटादिकं वस्तु मृदादिद्रव्यरूपमेव, तद्व्यतिरेकेणाऽनुपलभ्यमानत्वात्; यद् यद्व्यतिरेकेण नोपलभ्यते तत् तद्रूपं, यथा घटस्य स्वरूपं घटरूपमिति । अत्रापि घटादिकार्यस्य जलाहरणादेर्मृत्पि-ण्डाद्यवस्थायां न प्रसङ्गः, तत्तदवस्थाविशेषभावापन्नस्यैव तत्तद्द्रव्यस्य तत्तदव-स्थाकार्यकारित्वाभ्युपगमात् । न चाऽवस्थाऽवस्थातुरन्या; तत्त्वे 'तस्येयमवस्थे' ति प्रतीयमानसम्बन्धस्यैवाऽघटनात् । न चाऽभेदे षष्ठ्यर्थसम्बन्धानुपपत्तिः; 'घटस्य स्वरूपं' 'राहोः शिर' इतिवदुपपत्तेः । न च भेदेऽपि 'राज्ञः पुरुष' इति-वत्सम्बन्धोपपत्तिरिति साम्प्रतम्; राजानमन्तरेण पुरुषोपलब्धिवन्मृदाद्यन्तरेण घटाद्युपलब्धेरभावात् ।

यत्र यदनुगामि तत्र तद्द्रव्यमित्येवं सर्वत्र द्रव्यस्वरूपं प्रतिपत्तव्यम् । वर्त-मानत्वेनाभिमतो घटादिः वर्त्तमानकालेऽपि न वर्त्तते, पूर्वापरकालाऽवृत्तित्वात्; यन्नैवं तन्नैवं, यथा द्रव्यम् । अनेन त्रिकालाऽवृत्तित्वे शशशृङ्गादिवदलीकत्वं तस्य सिद्ध्यति । अत एवोक्तं–

" न व्यक्तेः× पूर्वमस्त्येव, न पश्चाच्चापि नाशतः ।
आदावन्ते च यन्नास्ति, वर्त्तमानेऽपि तत्तथा ॥
अव्यक्तादीनि भूतानि, व्यक्तमध्यानि भारत ! ।
अव्यक्तनिधनान्येव, तत्र का परिदेवना ॥

---

×टि. आविर्भावस्य ।

अदर्शनादापतितः पुनश्चाऽदर्शनं गतः ।
नासौ तव न तस्य त्वं, वृथा का परिदेवना ॥ इति ॥

